वनिषेधात् अत एव सूत्रभाष्ययोर्नवितेधः इक इति सूत्रस्य भाष्यं पूर्वपक्षयु
क्तिरितिदिक् दीक्षमौडादयः पञ्चाप्याचार्याः ईषाति दानेषितिपाठान्तरम् परिभाष
णमनन्तभावेनाम् आषइति अत एवेहतगर्भैपिघातिनीत्यादि संगच्छते गाहे
ति हलोपे पूर्वत्वासिद्धत्वे नलोपविधानसामर्थ्यात् पालइगु अनिटइति चेविशे
षणं धातुविशेषणत्वे तु गुहइत्यस्य सेट्त्वादघुक्षदि त्यादौ क्सो न स्यात् पाल्लि
केऽभावमादायानिट्त्वे तु नित्यमेव स्यात् वल्पारभ्रवादिसूत्रमतेदमनिट् इति विशे
षणादेव कसस्यनोदितरतीह न ग्रहादे। वख्यावोंगुणः स्यात् इगुपधत्वाभावेपि वस

Digitized by Panjab Digital Library | www.panjabdigilib.org

इतिवक्तुमुचितम् अत्ययइवेति सन्नियोगशिष्टत्वेनोभयोपदेशकालस्यैकत्वादार्द्ध
धातुकोपदेशकाले दन्तत्वाद्यतोल्लोपइतिभावः तस्यस्थानिवद्भावादिति एतेनवस्य
लोपएवविधीयतामित्यपास्तम् धिन्वन्तीत्यादौवस्यस्थानिवत्त्वेनार्द्धधातुकत्वाँल्लध
र्मत्वेनानल्लूविति निषेधात् तस्यस्यष्टाचैवंरीति भोभगोइतिसूत्रेभाष्ये अचः परस्मिन्नि
तिसूत्रेभाष्येत्वभ्युपेत्यस्थानिवत्त्वं पञ्चमीसमासेन परिहृतमेकदेशिनेतिबोध्यम् अत्य
योकारइति असंयोगापूर्वादित्यनेनावध्यवधिमतोः सामान्यादुकारएवविशेष्यइति
भावः असंयोगपूर्वोयउकारस्तदन्तोयः प्रत्ययइतिवक्तुमुचितम् अपूर्वादमावीदिति
पक्षिकोगुणोतिसूत्रेभा[illegible]ष्येऽतोल्रेतिसूत्रेवकारप्रश्लेषमुक्त्वा माभवानवीन्नवीदित्यत्रदो
षमाशङ्क्य ह्यन्तेत्यत्राविप्रकर्षेणेतिउक्ते त्रेनित्यनिषेधएवलभ्यतेइति तत्रेमध्येप

Digitized by Panjab Digital Library | www.panjabdigilib.org

इति तु नानभिधानादिति कैयटः कथमुदयतीति शानचूस्यादिति प्रश्नः अनित्यमि
ति इदमाभाष्येन दरपते इटकिटेत्यत्र प्रश्लेषाभाववादिनां मते त्वयं प्रयोगोऽसाधुरेवे
ति बोध्यम् उन्दः औदनी पुनः प्रसङ्गेति द्वित्वे कृते पिसावकाश इत्यभिमानः लि
टीति विप्रवसन्नमीति पदे दीपजनवुधेति तुध्यतेरेवग्रहणं तस्येवात्मनेपदित्वात्
चिलो तक् अकारितरामित्यत्र तरपोन लुक् प्रतिलक्ष्ये तल्लक्षणभेदेन पूर्वचिलोः
लुक् उत्तरचिलो लुक्व सिद्धत्वात् अतोल्वा क्वचिन्नाभाष्ये तो त्त्वान्तस्येति पाठो दरप
ते आगन्तुनाकारेणनिर्द्देशः संकोचइति नेत्रलङ्कोचइत्यर्थः तत्रैव प्रचुरप्रयोगा
त् गतिचातुर्य्यमश्वीयं बोध्यम् छपगतिः कपटगतिः छद्मनम् कौटिल्यम् सन्लि
टोनभिन्नेति सन्लिटोरितिसप्तमी अभ्यासविशेषणञ्चेति भावः सन्लिटपरेपोभ्यास

Digitized by Panjab Digital Library | www.panjabdigilib.org

नव्यवधानात् आत्मनेपदेष्वडित्यर्थस्तु प्रचिकंसिष्यत इत्यसिद्धिः ततो निमित्तपदोपादान
मितिदिक् ततः परेषामिति पर्यपीढ्वं षीध्वमेव पवत्वान्नस्य ततः परत्वं दुरुपपादम् तथा
चिस्कृतिकृतानन्तर्यमात्रेण सामर्थ्यो क्त्वात्स्वरवृत्तिर्बोध्या अन्येतु इटः परस्येषीं धस्येत्य
र्थः षीकारव्यवधानेतु सामर्थ्यात्प्रवृत्तिरित्याहुः अत्राङ्गादितिनिवृत्तं अतएवोपदिद
दीपिढ्वं इत्यत्रविकल्पः अन्यथाङ्गटः परादित्वान्नस्यात् एवं च प्राग्विभाषा लुङ्ग्विधि
श्चेतिसलोपेइवर्णान्तमङ्गं ध्वमिजातमितीर्णः षीध्वमित्यस्यप्राप्तेः परस्योपसर्गस्येति
कृतत्वादवतावित्युपसर्गविशेषणम् अतएवलपतेल्पापतेपल्पयते इत्यादौ सर्वत्र
लत्वसिद्धिः रेफविशेषणत्वेतु सापतेनिलपते इत्यत्र कृतिकृताव्यवधान एवस्यादितिभा
वः आपत इति अचः परस्मिन्निति स्थानिवत्त्वात् पवर्ग इति स्यदेभाष्ये इणोदपमिति ज्ञापयत्राय

धापत्तेः तस्मादकारोत्राद्दष्टार्थः क्रामत्विति उत्क्रामेत्यत्रहेर्लुकि दीर्घो भवत्येव क्रम
इतिसूत्रेनुवर्त्ताङ्गस्य परस्मैपदस्योपस्थित त्रिनिरूपितस्यैव ग्रहणान्नहेर्लुक्यपि तन्निरू
पिताङ्गस्य कार्याभावेन न लुमतेत्यस्याप्रवृत्तेः प्रत्यासत्तिन्यायेन लुमतालुप्ते प्रत्यये
पऽदङ्गं तस्य कार्य्य एव निषेधप्रवृत्तेः स्नुक्रमोः स्नुक्रमोरिति प्रथमार्थे षष्ठी अ
नात्मनेपदनिमित्ते इति प्रसज्यप्रतिषेधः स्नुक्रमौ यत्रात्मनेपदनिमित्ते न भवतस्तत्र प्र
त्यासत्त्या ताभ्यां परस्य वलादे [illegible] रार्द्धधातुकस्येडित्यर्थः उदात्तत्वादिटि सिद्धे नियमोयं
तदा [illegible] हात्रैवेति प्रस्नुतइत्यादौ तु स्नुक्रमोः कितीति निषेध एव श्रास्यात्प्रतिषेधकाण्डारम्भसा
मर्थ्यान्निमित्तत्वं चात्र फलोपहितं न योग्यतामात्रम् तेन प्रस्नवितेत्यादाविड्भवत्येव स्नुक्र
मोरनात्मनेपद इति तु न सूत्रितम् तत्र हि परस्मैपदे इडित्यर्थो चिक्रमिषिष्यतीत्यसिद्धिः स्ये

Digitized by Panjab Digital Library | www.panjabdigilib.org

पृक्षेलोत्पर्थः कैयटेनैवेति एतन्निष्कर्षश्लोक्तः अगितामिति कश्चिद्भन्ततीनामित्य
र्थः येविभाषा जनसनेतिसूत्रेजनग्रहणेन यथाक्लृहोत्यादिदिवादौ ग्रहणम् तथाल
न्यग्रहणेनापि सनतेः सनोतेश्च ग्रहणम् अतएव सनोतेर्नुनासिकलोपादात्वेविप्र
तिषेधेनेतिवार्त्तिकव्याख्यावसरे आत्वेसनोतेर्ग्रहणस्यकोषकाशः सनिचयेविभाषा
च आत्वस्यावकाशोन्येजनादयइत्युक्तंभाष्ये अन्यथान्ययोर्जनवनोर्द्वयोरेवसत्त्वेन
जनादयइतिबहुवचनासंगतिः स्यात् ममत्वेनंसंनमादावनुपपत्तिः स्पष्टैव एतेन
भाष्येसनोतेरित्युक्तस्यास्यनतत्रग्रहणमित्यपास्तम् नचाऽनेपीतिवन्निर्देशेकार्य्येऽ
कारोच्चारणेन यङादावेवास्यप्रवृत्तिर्नतुयाप्तुडादावितिवाच्यम् जनजिआशामजन
स्याशामित्यत्रयत्तियेविभाषेत्यात्वंप्राप्नोतीत्यचः परस्मिन् तत्रैशेषस्यभाष्यविरोध

Digitized by Panjab Digital Library | www.panjabdigilib.org

।काच इत्यनुवर्त्तते सहितस्य काच्येदेशे सन्निधानं अङ्गं च तत्र सन्निहितं तत्राङ्गस्येति कर्म्म
णि षष्ठी कारकविभक्तेर्न्याय्यत्वात् एकाच इति च तेन समानाधिकरणमेवं चाङ्गस्य
न्नके कारकर्म्मके येट् उच्चारणे तयोः पूर्वाभ्यास सन्नकस्य स्य च सन्वदित्यर्थः इ
ट्येकाच्येव प्रवर्त्तिरेतदर्थमेवाङ्गस्येत्यावर्त्तिरिति भावः इदं चाजजागरदित्यादो सन्
वद्भावापादनपरं भाष्यविरुद्धमित्यरुचेराह वस्तुत इत्यादि अत्र पक्षे गंस्येत्युपांत्मक
तयाकर्त्रं चिन्नेयम् ऋतोर्दीर्घ इति स्यादित्यपकृष्यते सन्वत्वं त्वत्र नोपयुज्यते अ
र्थापत्ताविति अर्थ्यैशद्दाभिचित्रकतेरुगिति भावः वस्तुतस्त्वागम इति भा
ष्योक्त पक्षान्तरेण फलाभेदापत्तुरुंस्यानभिधानमेवोचितम् मूलानुरुत्वा चिन्ता
न्याये नेति दिक् नस्यादिति नस्यादेवेत्यर्थः अवस्थयेति अध्यवेत्यापर्वाचीनोक्त

Digitized by Panjab Digital Library | www.panjabdigilib.org

त०प्रे०

४२

सूत्रव्याख्यानभेदेन साधुत्वासाधुत्वयोरापत्तौ न वेति तत्र स्वभाष्यविरोध इति दि
क् सन्यतः अतः किम् लुघुक्षति तपरत्वं स्पष्टार्थम् अभ्यासस्य चन्यप्रकारत्वे
त्यर्थ इति दीर्घे किं तद् इति सूत्रे भाष्ये स्पष्टम् अत एव चिच्छादयिषतीत्यादावन्तरङ्गु
त्वात्तुक्यपि ह्रस्वस्थितिः सन्यतोऽभ्यासस्येत्यर्थः द्विःप्रयोगत्वाद्द्विर्वचनस्याधीयिव
तीत्यादौ सन्यात्वमभ्यासस्य यङो ह्रौ लोपस्य स्थानिवत्त्वात् पापचिषते इत्यादौ न दो
षः धनितं चेदं स्तोतिण्योरिति सूत्रे भाष्ये तत्र ह्यभ्यासादिन्यस्य सनियोगाभ्यासस्त
स्याद्याप्राप्तिस्तस्या नियमो वचास्यात् यङि· योऽभ्यासस्तस्याद्याप्राप्तिस्तत्र नियमो
मा भूत् लोलुप्यतेः सन् सोषुपिषते धातोश्च याप्राप्तिस्तस्याश्च नियमो मा भूत् अ
धीयिवतीति प्रयोजनमुक्तम् सन्ताया कार्य इति तत्पक्षे हि पूर्वोभ्यास इत्यस्य ए

४२

Digitized by Panjab Digital Library | www.panjabdigilib.org

रूपं दृष्टं तादृशस्यैवात्रातिदेशो। न तु कार्य्यस्य न च मीमादीनामभ्यासरूपमस्ति
तोपदेशं च न रूपमित्युक्त्वाऽङ्गान्यत्वात्त्वाद्धा सिद्धमिति भाष्य उक्तम् तत्र केयटः
मीमादीनामङ्गानामभ्यासलोपो विहितो यश्चाभ्यासो लुप्यमानानां अन्ये तु च इ उप
देशो यदङ्गं तदभ्यासस्य सन्वत्त्वात्सौ मीमादीन्येवाङ्गानि तस्मादङ्गान्यत्वादित्यस्या
यमर्थः येषामङ्गानामच इत्यादि विधीयते तस्यात्र ग्रहणाद्ध्यो येन त्वितादिरहितां
नाममीमयादिस्थाने धातोः सन्वत्त्वाभावादभ्यासस्यैव ह्यनेन सन्वत्त्वमिति एवञ्च केय
टेनाप्येवं वक्ष्यत उक्त इति चेन्न अङ्गस्याभ्यासः इत्यत्राङ्गं किं निरूपितं यासं च द्विः रू
पितं ति निरूपितं वा तत्रोपस्थितत्वात्त्वाधान्या च्च ति निरूपितमेव गृह्यत इत्येवं पा
तपाद्दर्बभाष्याविरोधेन तस्य योजयितुं शक्यत्वात् अन्यथा एकस्यैव प्रयोगस्य।

Digitized by Panjab Digital Library | www.panjabdigilib.org

नैवसन्वत्वम् ओन्दिद इत्यादौ चनैवदीर्घत्वं ओर्लनवदित्यत्रचभवत्येवसन्वत्वम् आचिक्ष्यपदचिक्षगादित्यत्रात स्मृ इत्वरेत्यनेनेत्वबाधनार्थेन संयोगव्यवधाने त्रवृत्तिज्ञापनान्नदोषः अङ्गस्येति अवयवषष्ठ्येषः अस्यफलंचिन्त्यन्नात्यरलुघु परान्भ्यासस्येत्येवसिद्धेः माधवानुरोधेन मूलकृतोक्तं तन्मते फलन्नयेस्फुटम् गाविति चङ्परे इत्यस्याबजेरिति भावः अप्यचेति चङ्परे इत्यस्याङ्गविशेषणत्वेङ्गत्वस्यप्रत्ययनिमित्तत्वेनैवलाभात्पविशेषणफलाभइति भावः अपेम्यपक्षउक्ते भाष्यविरुद्धः ओन्दिद इत्यादौ दीर्घापत्तिश्चात्रपक्षे चङ्परेणौयदङ्गमोन्दिदिति तदीयोभ्यासस्त्वङ् मात्रावत्ति लोपस्यस्थानिवत्त्वेनत्तिमात्रावलघुपरइति बोध्यम् नत्वमीमादीनांनतु लोपः प्राप्नोति अमीमपत् सिद्धन्तु सनियादिष्टामभ्यांस

ढुं. २

किम् कारयति उपधाया इति किम् अचकाङ्क्षत् अत्यवस्याङ्गं गांले उत्थिता काङ्क्ष
त्वात् णावित्यस्यैव विशेषणतां नाच इति बोध्यम् तदुक्तम् शार्ङ्गरव इति सूत्रे कैयटे शब्दा
नां नित्यत्वेपि उपायानामवश्यापत्ययलोपो नाटुं वहि टुं भाव इति नित्यः शब्दो वाक्यप
दन्तृपक्षदन्वाख्यानेपीत्यर्थः अवश्येति अन्यथान्वाख्यानविलय इति तदर्थः बहु
व्रीहिरिति परग्रहसामर्थ्यादिति भावः तद्विशेषणश्चलिरेव लघुगंस्येत्यावर्त्याङ्गस्य र
निमित्तमिति व्याख्यानादत एवाभिश्रमतीनां न सन्वत्त्वं तदाहाङ्गस्येत्यादि तत्परः
ह्रस्वावित सन्निधानाच्चङ्परे णाविति लघोरेव विशेषणमिति भावः अत एवेह कस्मान्न
भवति अजजागरत् लघुनि चङ्परे इत्युच्यते व्यवहितत्वात्र लघु चाङ्परे इति भाष्यं
सङ्गच्छते चङ्परे तो यत्र लघु तदभ्यासस्याव्यवहितमित्यर्थः एवं चाचकासदित्यादे

Digitized by Panjab Digital Library | www.panjabdigilib.org

ला० शे०

४०

सामर्थ्येनतत्रबाधकल्पनमपेक्षयापूर्वविप्रतिषेधकल्पकतायाएवानिटीत्यस्योऽ
चित्यमित्याहुः णौचङि लोनाङ्कुस्याव्यवहितपरत्वं तत्फलितमाह चङ्परेणाविति
णाविति किं चङ्परोपधाया ऋत्त्वभाविन्यात्रासम्भवेन सूत्रवैयर्थ्यापत्तेः ऋत्वलृ
दित्त्र इति ऋकारस्यसम्भवः तत्राप्यन्ताङ्कुत्वाद्धस्वावादेशयोः कृतयोस्तदसम्भ
वात् नचऋत्त्वोवृद्धेरपवादः ऋत्त्वप्रवृत्तिकालेवृद्धेर्निष्पन्नत्वेनतस्य तद्बाधक
त्वासम्भवात् पदसंस्कारपक्षेपिनिमित्तनिमित्तिभावापन्नशास्त्रकार्याणांक्रमेणोह
ज्ञानेनधातुसंज्ञातिङुत्पत्तिसमयेएववृद्ध्यावोनिष्पन्नत्वज्ञानेनचङुत्तरकालिकऋ
त्वेनतद्बाधायोगात् नचसामर्थ्येनचङि यः प्रत्ययस्तस्मिन्नुपधाया इत्यर्थोभवि
ष्यतीतिवाच्यम् तदपेक्षयासकलबोधबोधक्षमत्वेनणावित्यस्यैवलघुत्वात् चङि

४७

Digitized by Panjab Digital Library | www.panjabdigilib.org

दल्लोपित्वाच्चेत्यत्र सिद्धान्तमुक्तिरग्रिमं भाष्ये त्वेकदेशयुक्तिः एवमतो लोप इति सूत्रे तालव्यो
पावितिसूत्रे विशतिबोधमुक्त्वा न वक्तव्यः एभ विधिभक्तेषु स्थानिवद्भावात् लित्वेन लो
पो न विध्यति नैवं शक्यं इयङादेशोऽन्यत्र लोपापत्तेरित्युक्तं भाष्ये तदप्येकदेशयुक्तिरेव भो
भगो इति सूत्रस्य न्यायसिद्धभाष्यविरोधात् किञ्च लोन्निटीत्यत्र लकारस्य निर्दिश्य
मानो न्यस्तस्य लोप इत्यर्थ इति एकाचो द्वे इति सूत्रभाष्याद् लभ्यते तत्र हि स्थाने द्विर्वचने
ऽप्यट्टिदित्यादौ तिलोपो न स्यादित्यापादितं एवं चेयङ् अन्त्यस्य निर्दिश्यमानधर्मा
वच्छिन्नत्वाभावात्समुदायस्य चान्त्यालत्वाभावाद्लोपाप्राप्त्या तस्यैकदेशयुक्तित्वा
वश्यकत्वात् वचनसामर्थ्यादिति पात्त्वाकुलादीनां लितो लोपबाधकत्वे इडादावपि गु
णेन बाधसिद्धिरिति भावः तेन कारणादिसिद्धिः यात्वेवमनेकवचनकल्पनापातत्त्व

Digitized by Panjab Digital Library | www.panjabdigilib.org

त् पत्तु यदिपुनः प्रसङ्गः आश्रीयते स्थानिवद्भावेनचलित्त्वंतदालितिलोपांशेवार्त्तिक
मनावश्यकं अतएवचसप्तमशेखरेल्यन्तात्लोपात्वाह्यद्धिर्वृद्धौकृतायांल्लोपस्तत्रास्लोप्य
ङ्मितिभाष्येउक्तमितितत्र आगितिप्रत्याहारग्रहणसामर्थ्येनाकृतायांवृद्धौलोपस्यपूर्वस्य
लोचङीतिसूत्रभाष्येचीवददित्युपक्रम्यैवसिद्धान्तितत्वेनल्पस्लोपावितिपूर्वविप्रतिषेध
परभाष्यविरोधेनचपात्वाह्यद्धिरित्यत्रभाष्यस्यएकदेश्युक्तित्वात् किञ्च वृद्धौतिलोपो
पिकुत्वेभोरोरभावात् नचस्थानिवद्भावः वृद्धिस्थानीकारस्रूपाल्वृत्तिधर्म्मितिलत्वाश्र
यल्लोपस्याल्विधित्वेनतत्रस्थानिवत्त्वाप्रवृत्तेः स्पष्टाचेयंरीतिर्भोभगोइतिसूत्रेभाष्ये
ल्यन्तात्लाचवीवददित्यादाविवदीर्घत्वोपधाकृत्यत्वसिद्धयेलोलिङ्गुपसङ्ख्यानमे
वकार्य्यम् नन्वत्रसूत्रेलोलिङ्गुपसङ्ख्यानमितिवचनाभावेनासिध्यतिलिङ्चाव्यवहितत्वा

Digitized by Panjab Digital Library | www.panjabdigilib.org

त्तः घुणघूर्णे अस्य दीर्घपाठः प्रक्रियालाघवार्थः अन्ये तु ऊस्वमेव पठन्ति स्नुताविस्ये
वेति यद्यपि दृष्टपनिर्देशो यथासङ्ख्यमिति नित्वत्यर्थे इत्यपि वक्तुं शक्यम् तथापि सम्प्रदा
यानुरोधादेवमुक्तम् स्नुतावनुवन्धस्येति आर्द्धधातुकविषये आपादीनाम्वैकल्पिक
त्वेन तदभावे चारितार्थ्यमिति भावः चक्षंस इति अनुनासिकस्येति दीर्घस्तु नक्रिसाह
चर्य्येत्वानि ति ङ्गिन्नस्यैव कृत्वादेर्ग्रहणात् कामयते इति अनिग्लक्षणत्वान्नोपधावृद्धिनि
षेधः अपामेल्लोपापवाद इति णिलोपापवाद इत्यर्थः वस्तुतो यन्नुवादो यं तदनुवाद
वल्लाच्चणिलोपवाधः ध्वनितं चेदं प्रकृतसूत्रे भाष्ये इति उणादय इति सूत्रे निरूपयिष्या
मः ननु परत्वादियङादिषु णिलोपो न स्यादत आह एरनेकाच इति क्विजन्तमिति क्विन्तु उ
लोभाग्रत्ययादित्यनेन बाधात् एवं क्षीबतीत्यत्राप्यवकाश इडभावे इकोऽनतिति किंत्वा

Digitized by Panjab Digital Library | www.panjabdigilib.org

त्वात्तत्राप्मितिवाच्यम् आमर्थम्वार्त्तिकमित्युत्तरमपरआह सर्वप्रातिपदिकेभ्यः क्विबा
वक्तव्यः एवंतर्हि अवगल्भाद्यनुक्रमणेनकार्य्यकार्य्यम्वानुबंधानासंक्ष्यामीति अव
गल्भक्लीवहोडेतिभाष्योक्त्यातदर्थन्तस्यचारितार्थ्येनभोतर्हिक्विानेकाचआमित्यर्थ्य
मानाभावात् आनुबन्धासङ्गःस्वस्वसर्वप्रातिपदिकेभ्यइत्यनेनक्विपिअवगल्भतीत्यादि
बालापावश्यकः इतोवक्तिनेतेभ्योन्यःक्विप् येननाप्राप्तिन्यायेनास्यतद्बाधकत्वात्
सर्वग्रहणन्त्ववगल्भेतिवार्त्तिकापेक्षयाबहुविषयत्वबोधनायेत्याहुः अत्रेदन्बोध्यम्
प्रत्ययग्रहणावनयबादिनोप्येकाचम्यआचारक्विपोनभिधानमावश्यकं अन्यथा
रम्भप्रत्याख्यानयोःफलभेदस्यात् इतिहरदत्तोदाहृतानिसत्वोचकावित्यादीनिचि
न्त्यान्येवेति अतोलोपः आर्द्धधातुकेकिं वृक्षस्य वुत्पत्तिपक्षेसप्रत्ययउपदेशेकारात्

Digitized by Panjab Digital Library | www.panjabdigilib.org

कघटवानांसूत्रादीनांसमुदायानांचक्रियावाचकत्वंतुल्यभावाद्बोध्यम् स्पष्टंचेदंतु
पश्चात्मनइतिसूत्रेनमोवरिवइतिसूत्रेचभाष्ये विवक्षायामिति विषयसप्तमीति
भावः परसप्तमीत्विह्निआर्द्धधातुकोपदेशेयदकारान्तमितिगोपायित्वेत्यत्रत्लोपोन
स्यात् गोपायितेतिचनसिध्येत् इर्वक्तिनएवापत्तेः कास्प्रत्ययान्तेभ्यश्चेति धातु
भ्यइतिशेषः सूत्रेप्रत्ययग्रहणमपनीयेति एतच्चहृदन्तग्रन्थेस्पष्टम् परेतुकासीति
सप्तम्यन्तंतदघटितसूत्रेइत्यर्थः भाष्येकास्यग्रहणोच्चकासउपसङ्ख्यानमित्युपक्र
ञ३ मस्वारस्यात् अतएवभाष्येतं कर्तव्यमितिनोक्तम् अतएवाचारेवेगल्भेतिवार्त्ति
केधातुमित्येवसिद्धमाक्षाङ् क्यावगल्भांचक्रेइत्यादौकास्प्रत्ययादाममंत्रेदत्यामवया
स्यादित्युक्तंभाष्ये तत्राकारस्यानुबन्धत्वेनैकाच्त्वात् नचभोतज्भर्विकानेकाच्त्वं गही

Digitized by Panjab Digital Library | www.panjabdigilib.org

अद्राक्षीत् अत्र हि कित्वे न स्यात् अर्थभेदादिति पूर्वोदैन्यायार्थे इति भावः तत्फल
गुताशब्देन भाविताकाश्वेत्वाद्धित्पदेशाद्धित्वादेकहल्मध्यस्थत्वाभावाच्चु वध्याव
यमप्राप्तेविधिरेवम् नहीजन्त्विति पूर्वसमत्रिश्रवशिवत्वान्न तस्योर्विजन्त्विति स्पर्धाः
अर्थविशेषानिर्देशोदाह त्वोर्थ इति धातोरेकाचइत्यतोधातोरित्यधिकारादस्याऽऽ
धातुकत्वं ऋघावेष्ठकारान्तः तत्फलं तु गोपायतमित्यादौ गोपायेत्यस्य धातुत्वे
ऽऽन्तोदात्तत्वे शवकारैकादेशस्याप्यन्तोदात्तत्वे तमित्यस्यानुपदेशात्सत्त्व सार्व
धातुकत्वे नानुदात्तस्योदात्तादनुदात्तस्येतिस्वरितत्वम् सनाद्यन्ता सञ्ज्ञाविधौप्रत्य
यग्रहणे तदन्तग्रहणानिषेधादन्तग्रहणम् यस्मात्सविहितस्तदादि तदन्तस्यग्रहणं तु प्रवर्त्त
ते एव तेन देवदत्ताश्चिकीर्षतीत्यादौ देवदत्तादेः समुदायस्य न एतत्संज्ञा धातुसञ्ज्ञ

Digitized by Panjab Digital Library | www.panjabdigilib.org

ञनस्यवृद्ध्यभावः नचनेटीति निषेधः नचहलन्तास्येत्यनुवृत्त्या तद्विषये येन नाप्राप्ति
न्यायाभावेनास्यास्तेन निषेधेनाबाधात् अच्छावसरन्यायवस्तुनास्येव नान्तः पादमि
तिपाठेपि एङोतीत्यनुवर्त्त्य एङोतिपधत्वाद्भोति तस्य निषेध इत्यर्थस्य नान्त इति सूत्रे
भाष्ये उक्तत्वेन फलाभावात् कूजनेति अचैकत्वादिति भावः स्यन्तक्षणा· इडादौ
किम् अधाक्षीत् ईयततीति इकारोत्र कृत्वः द्वित्वे कृते एरनेकाचइति यणा सवर्णे
दीर्घयोः आमयोर्वर्णादौ कुमिति परिभाषया यत्र नतु दीर्घ इति बोध्यम् कित्वि
त्यादिप्यो दाहृत्वीत्यन्तं सहुचियस्त्वमिति केचित् कुडि वैकल्पमविवेकः तुडु तोडने
गहत्तो हिंसनं चालनयोश्चेति अचेको डुः स्पष्टः सच शिक्षादेरप्रसिद्धः लिङः सिच
इकोझल् हलन्ताच्चेति असंयोगादित्यतः किदिति चानुवर्त्तते आत्मनेपदेष्विति किम्।

Digitized by Panjab Digital Library | www.panjabdigilib.org

नतु स्तुद्रुस्रुश्रुवां थलि भारद्वाजनियमादिट् स्यात् क्रादिसूत्रस्य स्वादिग्रहणे न तु वे
न नाप्राप्तिन्यायेन क्रादिनियमप्रापितस्यैव बाधो ऽचित्यादित्याशयेनाह नचेति समाध
त्ते योगद्वयेति अयं भावः थल्यनिटो नित्यमित्यस्यानुवृत्त्या तत्पदसम्बन्धवान् ए
इट् निषेधः स भारद्वाजमते ऋकारान्तस्यैवेति नियमेन क्रादिनियमस्य नायं निषेध
इति एतेन भारद्वाजनियमो येन नाप्राप्तिन्यायेनाचस्तास्वदित्यस्यैव बाधक इति जयनि
येत्यादाविट न स्यादित्यपास्तम् ध्वनितं चेदमत्रैव सूत्रे भाष्ये किञ्च पुरस्तात्प्रतिषेधं
काण्डारम्भसामर्थ्याद् दपि स्त्वादिनिषेधेनानन्तरस्यापि भारद्वाजनियमस्य बाध इति नेड्
ववृीत्यत्र वस्वेकाजादित्यत्र च भाष्ये स्पष्टम् सिचि वृद्धिः वृद्धिश्रुत्योपस्थितमिक इति
अङ्गस्य समानाधिकरणो विशेषणमित्याह गन्ताङ्गस्येति तत्फलन्त्वकोषीदित्यादौ ब

Digitized by Panjab Digital Library | www.panjabdigilib.org

नियमेनात्मनेपदत्वासाविड्भावेपिपरस्मैपदेतत्स्यात् अतोभा अचस्तास्व दित्येव

सिद्धे नियमोयमित्याह ऋदन्तादेवेति नचऋदन्तो विकल्पेन निषेधार्थमिदमितिवा

च्यम् अचस्तास्वदितिसामान्यसूत्रप्राप्त[illegible]पनेनभारद्वाजातिरिक्तेऋदन्ते निषेधस्ये

वाङ्गीकारे तासस्तत्पन्नतानुसन्धानद्वारा विकल्पस्य वक्तुमशक्यत्वात् इमादिषुपर

त्वान्नित्यत्वाच्च उतोःपरत्वे ऋदन्तत्वाभावेपूपदेशग्रहणात्कर्मणितुप्राप्तिः नियमफ

लितार्थमाह तेनान्यस्येति अत्रापिभारद्वाजस्येतिसम्बध्यते अन्यस्येत्यस्य ऋकारा

न्ताभिन्नस्य तासौनित्यमनिट् उपदेशेऽजन्तस्यात्वतश्चेत्यर्थः एतेनपपिथेत्यादाव

न्तत्वंसन्निपातेनजातइट् सन्निपातपरिभाषयाआलोपनिमित्तंनस्यादित्यपास्त

म् उपदेशेइत्युक्तेस्तदाह अजन्तइत्यादि आस्योपदेशेइत्यादिः ईहक् तासौनित्यानिट्

Digitized by Panjab Digital Library | www.panjabdigilib.org

दिह्यपक्षेऽप्येतेइतिकृतोभारद्वाजस्येतिसूत्रेभाष्येस्पष्टम् एवंचधेऽदेदृध्विषेत्यादिसिद्धये
ऽप्यहणमावश्यकम् अत्वच्चोपदेशेएतन्तानामात्वविधानेनाकृग्रहणमेवकुर्य्यादिति
दें. तासेनोनित्यानिट्इति तासौसन्नन्तत्रनित्यानिट्त्वार्थः यस्तासावस्तिनित्यानिट्चेति
भाष्योक्तेरितिभावः तास्वदितिसप्तम्यन्ताद्वतिः यथातासौनेट् तथाथल्यपीत्यर्थः नि
त्यानिटः किम् उ धविथ अयं त्वरतीतिसूत्रेणतासौविकल्पितेट् अतोस्यथलिनित्य
मिट् नित्यपक्षाभावेभारद्वाजनियमेनविकल्पः स्यादितिवृत्तिः तासावितिकिम् यस्माथादे
शोऽजेथलिथित्स्यात्कोनित्यंएवेड्यथास्यादिति उपदेशेत्व उपदेशेकिं कर्षा चकर्षिथ अ
त्वतः किम् भेत्ता बिभेदिथ तपरः किम् राद्धा रराधिथ तासौकिम् जिघृक्षति जग्रहि
थ नित्यानिटः किंमान ऽत्रिथेतिभाष्यं चकमिथेत्यपिग्रस्तुदाहरणम् ऋक्रमोरिति।

Digitized by Panjab Digital Library | www.panjabdigilib.org

र्थत्वसंभवाच्च तदर्थत्वम् प्रकृत्याश्रयः एकाच उपदेशा इति क्रादिषु त्रिषु प्राप्तः प्रत्यया
श्रयः ।श्र्युकः कितीति वभ्रादेः प्राप्तः प्रत्ययाश्रयस्य नियमे त्वग्रहणमेव मानम् यावति
ति नम्राशब्दान्यतरप्राप्तिरस्यार्थः तेन विधूइत्यस्य सिद्धेर्धिच्छेत्येकमेव यदि तु नेदृशी
ति प्रक्रमान्नम्प्राप्तिस्यैव नियमः स्यात् तदोपदेशेऽत्वत इति सूत्रे नित्यानिट इत्यस्या
श्रिव्यावर्त्त्य इत्यर्थपरभाष्यासङ्गतिः तत्र नित्यानिट इत्यस्याभावे मो क्रतो भारद्वाजस्येति वि
कल्पः स्यात् तत्सत्त्वेऽप्यूदित्वप्रयुक्तविकल्पस्यैव सत्त्वेन तदसङ्गतिः मम तु क्रादिनियमेन
नित्य इडिति भावः क्रादिनियमश्चेदिडु तर्हि लिट्येवेति विपरीतनियमस्तु न कृतेऽपरिवृत इत्यादि
लक्ष्यविरोधात् अत्र सूत्रे कृ स्मो सुट् इति वक्तव्यं तेन संचस्करिवेत्यादि सिद्धमिति स्पष्टं भाष्ये
ततश्च तुल्यमिति नियमाद्विधिर्बलवानिति भावः उपदेशेऽत्वत इति उपदेश इत्युक्तात् सूत्रा

Digitized by Panjab Digital Library | www.panjabdigilib.org

स्वहलादिः शेषयोर्युगपत्प्रवृत्तौ न ततः परकालोदीर्घ इत्यन्तरङ्गत्वाद्दीर्घत्वं स्यादिति न वा
च्यमिति भावः अनिदितामिति इदं कुञ्चधातुविषयम् कुञ्चौत्व निदितामिति न प्रवर्त्तते
परेऽस्वघेति तत्र त्वं स्य भाष्यप्रामाण्ये नास्य नोपधत्वान्नकाराभावानुस्वारपञ्चमाविति तु प्राप्ति
कम् तत्र कुञ्च्यादिति अकाररहितपाठस्त्वपपाठः इति मते त्विति इदमेव युक्तं फलस्य भा
ष्यानुक्तत्वात् अनेर्ध्व अत्र वा लिटीत्यतो वेत्यनुवर्त्तते तेन व्यवस्थितविभाषया घञ्रूप
वपस्तु नल्लुप्तिवोवलादावार्द्धधातुके वाऽन्यत्र नित्यमेव अघञयोरिति न वक्तव्यम् स्यपं
चेदं भाष्ये एवं चेतद्विकल्पलाभश्च्यवाधोधातोरप्यर्थे सार्वधातुके एव प्रयोगो नार्द्धधातुक इ
ति वोध्यम् स्वरतीर्घेति पूर्वत्रासिद्धीय इति निषेधस्याप्यवं नियम इति भावः चतुर्णामिति
कृत्वादिना चतुर्ष्ठं विनिगमनाविरहे ।ऽ। तेषां सर्वेषां नियमार्थत्वमेव तदुत्तरेषां तु विध्य

Digitized by Panjab Digital Library | www.panjabdigilib.org

षेधबाधापत्तेरेवञ्चविषमउपन्यास अनवकाशं क्तसंस्यकित्त्वं इहपुनरन्तभ्यं सावकाश
मित्यादिस्तद्दुत्तरमो भाष्यग्रन्थएकदेशयुक्तिरित्याहुः उवोवेति द्विर्वचनेचीतिनिषेधात्स्त
र्वंद्वित्वेउकारस्यवार्णादाङ्गस्य बलीयस्त्वात्सवर्णदीर्घम्बाधित्वागुणेकृतेउवङ् एतेन
गुणस्यस्थानिवत्त्वेनानादङ्गत्वात्सवर्णदीर्घः स्यादित्यपास्तम् पूर्वस्यविधौस्थानिव
त्वात् उवङिनुनस्थानिवत्त्वमसवर्णग्रहणसामर्थ्यात् सन्निपातेति आमिसतिधातो
रोल्यरत्वव्याघातः स्यादितिभावः वार्णादिति अत्रह्यभ्यासस्येतिसूत्रंज्ञापकं तद्वीये
षेत्याद्याबियङाद्यर्थंन्तत्रपूर्वंप्राप्तगुणावङ्छोर्द्विर्वचनेचीतिनिषेधेद्वित्वोत्तरप्राप्तेगु
णवङीबाधित्वान्तरङ्गत्वात्सवर्णदीर्घेतद्वैयर्थ्यस्पष्टमेवेत्यन्यत्रविस्तरः परत्वाच्चे
ति अस्यपरकालप्राप्तिकत्वादित्यर्थः एवंचाभ्यासविकारेवाध्यबाधकभावाभावेनङ्क

Digitized by Panjab Digital Library | www.panjabdigilib.org

परेऽणुरल्लुपधविषये तद्धलक्षलोपज्ञावकित्त्वस्यानवकाशत्वमेव नतुक्तभाष्ये उ
।क्तं वाक्सस्यानवकाशत्वादपवादो गुणस्येति यथाक्सस्य कित्त्वसामर्थ्यादलिक्ष
।क्षित्यादौ गुणो बाध्यते तथैव रल्लुपधविषये तद्धलक्षलोपज्ञाव प्रापितातिदेशसा
मर्थ्यात्क्षित्यर्थ इति कैयटः नचपरत्वाद्गुणस्यैतद्विषयलक्षलोपज्ञावएवनेति वाच्यं
असंयोगादिति कित्त्वस्यैतद्विषयेनिषेधातिदेशा [illegible]
त्वेन निषेधाश्च बलीयांसः इति न्यायादत्र विषये विप्रतिषेधाप्रवृत्तेः नच सम्प्रसारण
विधौ कित्त्वस्य कृतार्थत्वाद्दुर्बलत्वेन तेनातिदेशेन प्राप्यमाणो गुणनिषेधो दुर्बल इति विधि
रनेन स्पर्द्धते इति परत्व प्रवृत्तिरस्यैवेति वाच्यम् विचतिग्रहणातीत्यादावतिदेशप्राप्तङि
त्वस्य सम्प्रसारणेन कृतार्थत्वया तदनन्तरप्राप्तगुणेनत्व डुक्तरीत्यातिदेशप्राप्तगुणनि

Digitized by Panjab Digital Library | www.panjabdigilib.org

तस्मादेदिति कृत दीर्घः परामृश्यते उपस्थितत्वात्तदाह दीर्घीभूतादिति अत्रापि लिटी
तिवर्त्तते दं दधस्कस्याः क्रियायाश्चोदाह दंदधस्क्रीयायामिति दंदधस्कोविलोपश्च वदंने
कदेशाइति तत्क्रियायामित्यर्थः आदिति त्रिकारीयतीत्यादौ नेदन्तेषामनभिधाना
त् यत्तूपदेशाइत्यनुवर्त्ततेस्तत्रनदोषइति तन्न तस्यास्वरितत्वात् किञ्च तदनुवर्त्तावा।
दिग्रहणावैयर्थ्यापत्तिः यद्यादिशब्दे उपदेशाभावादेव तदप्रवर्त्तेरित्याहुः द्विचत्वारि
शादिति विभाषाचत्वारिंशत्प्रभृतावितिविकल्पविधानादात्वाभावः अषोपदेश
त्वादिति सेकः पर्युदासादन्ययोर्दन्त्यादिन्त्यादित्वाभावादित्यर्थः ऋदुपधेभ्य
इति यद्यपिविलिदतुरित्यत्र किन्त्वंनित्यन्तस्यापि ऋदुपधेतदनित्यं गुणो संयोगात्
परत्वात् गुणोत्रान्तरङ्गम् किञ्चावकाशाईजतुरित्यादिः गुणावकाशश्चेततीत्यादिः

Digitized by Panjab Digital Library | www.panjabdigilib.org

त्यनुवर्त्तीति। अत्रोपदेशइत्यनुवर्त्त्या णादिना मधातुर्व्याख्यानान्निर्बोध्या नाटीति नत्वत्र वस्येदने चुरादिरेवव्याख्यानात् तेनम्भ्वादित्वोपदेशएव आक्रुषीति भाष्यविरोधोत्रा द्रष्टव्यः उपसर्गाद· पूर्वपदात्संज्ञायामित्यतः पूर्वपदादित्यनुवृत्तौ तदाक्षित्रसमास एवस्यादतोसमासेपीति ननु पूर्वपदाधिकारस्यात्रनिवृत्तेर्व्याख्यानएवशरणं इदं व्यर्थं म् नचासंज्ञायां पूर्वपदादितिनियमव्यावर्त्तितणत्वप्रतिप्रसवाय समासासमासयो विशिष्यविधानार्थम् पूर्वपदादितिसूत्रोपसर्गादसमासइत्यस्यापि सिद्ध्या नियमेन व्यावृत्तेः कर्तुमशक्यत्वात् नचैतत्प्रकरणे प्रकरणमसिद्धं नच सूत्रे सूत्रमित्य। र्थेज्ञापकमितिवाच्यं रषाभ्यामित्यत्र समानपदे इत्यस्यावेलङ्यपदेइत्यर्थे न पूर्वपदा। दित्यस्यविधयर्थत्वेन ज्ञापकासम्भवादिति चेन्न स्पष्टार्थत्वात् तस्मात् तत्खण्डना।

Digitized by Panjab Digital Library | www.panjabdigilib.org

गान्त्यकात्तस्मात्र वाहुलादेरितिसामर्थ्याच्छाङ्ः स्याकारइतिद्वेयधिकल्पेनान्व
यः हलः परस्याङ्गावयवाकारस्येत्यर्थेनतिङ्वे आदिग्रहणंस्पष्टार्थम् अच
कारीदित्यादौतुचकाराकारेनातिप्रसङ्गः सिच्परत्वेनाकारविशेषणबलात् नन्वे
वंलघोरितिव्यर्थम् अतक्षीदित्यत्रापियेननाव्यवधानन्यायेनैववारणसं
भवादितिचेन्न स्पष्टार्थत्वात् अतइतितुअकुटीदित्यत्रापिदोषवृद्धिवारणाय
नेगद अत्राड्व्यवायीतिवर्त्तते तेनाकारादिव्यव धानेपिणत्वम् यद्यपितत्रसू
त्रेरेफषयोर्निमित्तयोर्निमित्तिनश्चनस्याडादिव्यवायअप्राप्तिस्तथापियत्र
यन्निमित्तं निमित्ती च तयोरप्यडादिव्यवायेणत्वं अस्तिचात्रगदादेर्निमित्तत्वं
नेनिमित्तत्वमितिस्पष्टंभाष्यकैयटयोः धात्वाहेरित्यनुवर्त्तनादाह धात्वादेरि

Digitized by Panjab Digital Library | www.panjabdigilib.org

ल० श०

३१

त्वस्यैतन्ना दिग्रन्थेस्फुटीकरिष्यते गङ्गाञ्चिसेधतीति विप्रतिषेध इत्यत्र सेधतेर्गतावितिनि
षेधो न तस्य विरोधार्थत्वेन गत्यर्थत्वाभावात् सिषेधेत्यादावादेशप्रत्ययोरिति षत्वम
वत्येव अनन्तरस्येति न्यायेन सेधतेर्गतावित्यनेनादेशप्रत्ययोरित्यस्यानिषेधात् इति केचि
त् सिचो यङीत्यादि साहचर्यात्सर्वषत्वनिषेध उपसर्गादित्यस्य तु नात्र सम्बन्धो विच्छिन्न
त्वात्तेन गङ्गां सिसेधेत्येव यद्यभिधानमस्तीत्यन्ये स्वरतिसूति सूतीत्यत्र उत्वाभावः सौत्रः
धसम्भः सानुबन्धकनिर्देशो धूञ् विधूनने इत्येतस्यावृत्त्यर्थः इड्सनिवेत्यनुवर्त्तमाने वाग्र
हणं लिङ्सिचोरात्मनेपदेष्वित्यस्य निवृत्त्यर्थम् न च स्वरतिग्रहणसामर्थ्यादेव तन्निवृत्तिः
सिद्धा ऋतश्चेति इड्विकल्पस्य सिद्धत्वादिति वाच्यम् स्वरतिग्रहणं नित्यार्थं स्यादिति तस्याज्ञा
पकत्वादिति कैयटः ऋकारादिति तौफलन्तुनान्तोपीति कृत्स्न निषेधः अतो हलादेः अन्ते

३१

Digitized by Panjab Digital Library | www.panjabdigilib.org

स्तुनोत्याद्यवयववत्वमिव तत्समुदायावयवत्वस्यापि अत्र षष्ठ्यर्थत्वात् यद्वात्र प्रकरणे तत्त्
धातोरिव तदानुपूर्वीकस्य च ग्रहणमित्याख्यानात् अत एवानुषस्यन्देह त्यादावनुविपर्यभि
निभ्य इति अभ्यासस्य षत्वं स्यादिष्विति नियमस्तु प्राक् सिताच्चेदभ्यासस्य षत्वं तदा स्यादिष्वे
वेत्येवमिति नात्र तस्य प्राप्तिः सुषिसतिसमा इति सूत्रे भाष्ये सर्वमिदं स्पष्टम् तत्र हि भाष्ये वि
सुष्वापेति अभ्यासस्य षत्वम्प्राप्नोति न च स्यादिष्विति नियमान्न भविष्यति प्राक् सितसे शब्द
नान्नियमः उक्तश्च सुपिः एवं तर्ह्यनर्थकत्वान्न न चैवं विषुषुपुरिति न सिध्यतीति वाच्यम्
सुपिभूतस्य द्विर्वचनादित्युक्तं सुपिभूतस्येति प्रतीके यद्यपि कैयटेन द्विःप्रयोगे स एव च सुपिर्द्वि
रुक्त इति समुदायस्य रूपमेव षत्वमिति व्याख्यातम् तथापि दयते दिगि इति सूत्रस्य भाष्य [illegible]
विधात्समुदायस्य सुपित्वानुपपत्तेश्च मदुक्तव्याख्यान एव भाष्यतात्पर्यं दिगीति सूत्रस्य भा

Digitized by Panjab Digital Library | www.panjabdigilib.org

सुनोतिम्प्रतिक्रियायोगः किन्तर्हि सावयतिम्प्रति सुनोतिम्प्रत्यत्र क्रियायोगो नासावेवं
प्रेष्यते सुनु उग्रम्मीति किन्तर्ह्युपसर्गविशिष्टामस्तोत्प्रेष्यते अभिषिञ्चतीति अत्रवच
नस्यात्याख्यानयोः समाफलत्वावनासावेवमित्यादिभाष्येणाच मदुक्त एव तात्पर्यं ल
भ्यते सदिरप्रतेः अप्रतेः किं प्रतिससाद ननु सदेरालम्बनाविदूर्ययोर्वस्त्वभावादेवा
सम्बन्धसिद्धोऽतआह किन्त्वेति अवाच्चा आविदूर्यं सामीप्यं अवष्टम्भागोः नित
घ्यसतिसमीपेआस्तेइत्यर्थः पर्यभिनिविभ्यः सेवत्यकोऽडचारलोर्थः सितसयो बिन्
प्रकृतिकोव्याख्यानात् स्यादिष्व प्राक्सितादित्यस्य सम्बन्धार्थम् प्राक्सितादित्युत्त
रमिदंपठितम् नवाभ्यासस्यनेरर्थेक्यात्तस्य षत्वाप्राप्त्याकथमस्यनियमार्थत्वमिति।
वाच्यम् द्विः प्रयोगत्वादभ्यासस्य कारस्यापि अर्थवत्सुनोत्यादिसम्बन्धित्वात्सतेः अर्थेव

Digitized by Panjab Digital Library | www.panjabdigilib.org

न्तोपादे इड्ढदि संयोगान्तस्येत्यतो लोप इति तत्तस्येत्यतस्तस्येति चानुवर्त्तते वदव्रज
हलन्तत्वादेव सिद्धेऽतो हलादेरित्यस्य बाधनार्थमनयोर्ग्रहणम् तदन्तविधिनैव सि
।द्धेन्त्यग्रहणं स्पष्टार्थम् नन्वज्ग्रहणसामर्थ्यान्नेटीति निषेधाच्चानन्त्यस्याचो ग्रहणे
।सिद्धे हलन्तग्रहणमव्यर्थमिति चेन्न इतआरभ्य वद्धिनाज एव सिच्यात्वेन न विशेष्यन्ते
।इत्यर्थज्ञापनार्थत्वात्तत्त्वात् एवं चाताङ्क्षीदित्यादि सिद्धये वर्णग्रहणे जातिग्रहणं
।यतदावश्यकम् अतएव लोवस्यायामेऽङागमे याक्षीदित्यादावटोन वृद्धिः विलोड
।नं क्षोभणम् उपसर्गात्तु अभिषावयतीतिण्यन्तेपि षत्वं भवत्येव शाश्वशाक्ति स्वर
।भावेनोपसर्गेणाम्न कृत्यर्थविशेषणताया एव स्वीकारात् तदुक्तम् भाष्ये सनोत्या
।दीनां षत्वे ण्यन्तस्योपसङ्ख्यानमधिकत्वादभिषावयति नवानन्यत्वात् नचनात्र

Digitized by Panjab Digital Library | www.panjabdigilib.org

धातुः सेजितिभाष्ये क्वचिद्दृश्यान्तस्य क्वचित्स्तू इतिदीर्घान्तस्य पाठदर्शनादुभयोपा
दानम् यद्यप्येकाच्च इत्यत्र भाष्ये षक्कृतिर्न दृश्यते तथापि सुप्रधातुष्ठिवुष्वष्कतीनां

त्व३ सत्वप्रतिषेध इतिवार्त्तिकबलात्पठितः स्विदेस्तुनसत्वं पादित्वादिति बोध्यम् नुरपदे
तिसूत्रेसृपिसृजिस्पृशिस्पृहीनामषोपदेशत्वेपि पूर्वपदादिति सूत्रेण षत्वप्राप्ते
निषेधार्थं ग्रहणम् तत्र हि आदेशप्रत्ययोरितिनसम्बध्यते अतएव द्विषाहः
स्त्रमित्यादौ छन्दसितेनषत्वातिद्धिरितिवृत्तौ स्पष्टम् सर्वपदादितिसूत्रेच छन्दसी
तिसम्बध्यते यद्यपि छन्दसिदृष्टानुविधिस्तथापि छान्दसान्यनिषेधावदिद
मपीतिबोध्यम् यद्यपि कौटिल्ये कौटिल्यंप्राप्य चक्रतावास्मा धावामितित्र वि
घमानगुणसम्बन्धज्ञापनं श्लाघा अध्यायप्रत्रिंशादिति अष्टत्रिंशादितिपाठेमि
ते

Digitized by Panjab Digital Library | www.panjabdigilib.org

तत्सर्वकमाशिषोर्वचनञ्च स्वन आलस्यं निद्रागतत्वस्याविशेषश्च नशास गुण
शब्दोच्चनादेङ्मात्रपरः शासिददिग्रहणावैयर्थ्यापत्तेः व्यपदेशिवद्भावेन गुणत्व
पवत्त्वसंभवात् अतो व्याख्यानाच्च लक्षणया गुणशब्देन भावितपरः सङ्गति बोधम्
अयमित्यादि आस्वादनमनुभवो हर्षश्च धात्वादेः अत्र सम्प्रधातुव्यावृत्तये उ
पदेशात्प्रवृत्तेः तावद्रूपकतया षडित्यादे रविते नैव व्यावृत्तो धातुग्रहणं स्पष्टार्थम् आ
देरिति लाघवतिव्यावृत्तये बोपदेशफलं त्वसिद्धं ददीति उर्द माने मानं तुलवम् वाक्ष
स्वादने उपधायाश्च सिपिधातोरित्यतो धातोरिति वर्तते हलुपधाया इत्यतो वेति क इति हलि
चेत्यतो हलीति चानुवर्तते धातोरित्यस्याभावे पदाधिकारस्य सत्वेन पदोपधाभूतयो
रित्यर्थे ऊर्दत्त इत्यसिद्धिः स्वन क्विबन्तो दित्यादौ चरितार्थम् कुर्द खुर्द गुर्द गुदेति पञ्चाप

Digitized by Panjab Digital Library | www.panjabdigilib.org

र्थम् तेषिति देधेइत्यादिषुदकारादिषुसत्स्वपीत्यर्थः एकेत्यादिकिमिति आदृतुरित्या
दोहल्ग्रहणइत्येतावतापिबाल्लोसम्भवादितिप्रश्नः नचबभारतुरित्यत्राभ्यासे चर्त्वेत्यस्या
सिद्धत्वादेत्वादिस्यादितिवाच्यम् फलभजिग्रहणेनैवाभ्यासलोपयोरभ्यासादेशस्याति
द्धत्वाभावज्ञापनात् अनादेशादेरित्यादिग्रहणान्नुहलादिःशेषमादायस्त्रस्यासम्भव
वाल्लाघवस्यापक्षार्थम् उत्सवनमुत्सुत्पगमनम् इदितो इदित इतिकर्मधारयेणधातो
र्विशेषणम् तेनेदिदं तस्यधातोर्नुम्विधानाचक्षिङादौनदोषः धातोरितिधातूपदेशाव(
स्थायांनुमर्थम् तेनकुण्डेत्यादौगुणेश्चहलइत्यप्रत्ययासिद्धिः अनुवर्त्तमानमङ्गस्येति
अङ्गत्वयोगस्येत्यर्थकंबोध्यम् तासौतुनदोषः तासएवकर्त्तुंयुक्तत्वात् सिच्यपिनदोषः
सचएवकर्त्तुंशक्यत्वादितिस्पष्टंभाष्ये छिन्दतइति श्वोतोभवतीत्यर्थः अभिवादनंनति

Digitized by Panjab Digital Library | www.panjabdigilib.org

तथापिलिटोड़ित्वासम्भवात्किंतीत्युक्तम् अभ्यासलोपइति विशिष्टविधित्वे आभाश्यक
प्रविवेकेनचविधेयतापर्य्यवस्यति यद्यसमासेप्युद्देश्यविधेयतयान्वयोस्तिसतितात्प
र्य्येकचित् लिटीतिकिं पापच्यते अभ्यासविकारेबाध्यबाधकभावाभावेनदीर्घात्पूर्वं
कृतेबाभ्यासदीर्घएत्वाभ्यासलोपोप्राप्नुतः किञ्च परत्वादेत्वाभ्यासलोपस्यदीर्घत्वेन
बाधः सकृद्गतिन्यायाच्चनपुनस्तावितिभाष्यउक्तम् प्राप्तानाम्अप्याचलोपोननित्यः अ
भ्यासविकारेषुनबाध्यबाधकभावइतिज्ञापकसिद्धस्यासार्वत्रिकत्वान्नाश्रीयतेइतितदा
शयः एतेन यत्रान्यतरस्मिन्कृतेसर्वेषांप्रवृत्तिस्तद्विषयः सन्यायइतिकैयटोक्तमपास्तं
दीर्घकृतेएत्वस्याप्राप्त्याचीकरदिति गुणोयङ्लुकोरितिसूत्रोक्ततदुदाहरतापरभाष्यवि
रोधापत्तेः पतिचसे सेटीत्येवसामर्थ्यादेवाकित्विद्विषयत्वेलब्धेपचलुग्रहणंस्पष्टा॥

त्र वसतिक्षुधोतिङ् नुदविदोदत्रामहिनशेर्ऽलीत्यादिगमकाच्च ततवद्धातुन्नावद्देतिभा
व्यप्रयोगाच्चेतिभावः अकर्म्मकइति देवदत्तो यज्ञदत्तं स्पर्द्धतेइत्यत्र स्पर्द्धापूर्वके शब्देनेव
त्तिर्बोध्या शार्दूवाः हलादिरित्यतः शेषइत्यनुवर्त्तते तत्रशब्दव्यतिरिक्तवर्त्तापेक्षया धात्वा
दिभूतारइत्यर्थः तेनवव्रश्चेत्यत्रचस्यनशेषः रवपः किम् सत्रम्भ शार्दूवाः किंस्पूर्वी
इत्युक्तावुत्वादिष्वपिविषयः शेषापत्तेः आशिष्येवेति आशीः प्रतिपादकनाच्यएवेति बाच्यो
र्थः अर्थान्तरेशेषादितिपरस्मैपदमेव अतएक एकशब्दोसहायवाची द्विवचनाम्मे
नसमासः द्वयोरेवमध्यसंभवादाह असंयुक्तेत्यादि । लिटीत्यादेशाविशेषणमेकदेशा
न्वयेपिसौत्रत्वाद्वृत्तिस्तदाह लिटिनिमित्तेति तन्निमित्तादेशाभिन्नामित्यर्थः निमित्तंचप्र
त्यासत्योपस्थितो लिङेवत्याशयेनाह किति लिटीति गमहनेत्यादितो यद्यपि किङ्तीत्यनुवृत्तं

Digitized by Panjab Digital Library | www.panjabdigilib.org

डुपाधेः प्रतिषेधः शब्विकरणस्यविभाषालुग्विकरणस्यचायमितियस्यविभाषेतिसूत्रेभा
ष्येउक्तम् तौदादिकस्यापिसेट्त्वेऽविदेरितिवार्त्तिकेतद्ग्रहणमेवस्यात् एवञ्चयदुपाधेरि
त्याश्रयणेपितदर्थम्वार्त्तिकस्यावश्यकत्वेनतत्रत्याख्यानासङ्गतिर्मतत्रयाणामप्यु
दात्तत्वेनवार्त्तिकेलुग्विकरणस्यैवग्रहणमितिनदोषः अतएवजृषंपरित्यज्यदारान्नश्री
भ्वलब्धवानित्यर्थेपरिवेत्तेतिनजन्तप्रयोगः संगच्छते पञ्चकेपठेनतत्रत्यंभाष्यमुदाहृ
पवेतित्रेविवक्षितोविड्लाभेइत्यस्यतुप्रतिषेधोभवत्येवविन्नाइतिविद्यतिविन्त्योस्तूदा
त्तत्वादिट्प्रतिषेधः सिद्धइतितदेतेनपरास्तम् तौदादिकस्यापिसेट्त्वेऽविदेरित्यनेनवेत्तेरे
वग्रहणेबीजाभावात् नवेति तेनत्क्तंतदस्मिन्नन्नंप्रायेक्तोकृतमितप्रतिपन्नाः प्रकृध
ष्टोक्तेननभूविशिष्टेनेतिनिर्द्देशात् नुन्नोमग्नः उद्वेमंक्तामंक्तव्यमित्यादिभाष्यव्यवहारा

Digitized by Panjab Digital Library | www.panjabdigilib.org

ला० श्लो०

२६

आलिङ्गनेऽइति सूत्रभाष्यप्रामाण्यात् तत्र हि श्लिष इति विहितकास्य पुष्याद्यङ्वाधकत्वमु

क्तम् अनिटइत्यनुबर्त्तनाद्याहार्थस्य सेटोग्रहणाभावइतिकैयटः सर्वैर्भाष्येनार्षः पाठः

मृषस्तितिक्षायामिति सेटनिष्ठायामकित्वविधानात् अतएव मूले मर्षितिर्नोक्तः पुष्येतिश्य

नानिर्द्देशो माधवादिप्रामाण्यात् वसतिर्भ्वादिः वसिः प्रसारणीति भाष्यात् प्राकृइति च

गोमिमतेन वस्तुतो भाष्ये ल्टदित्पाठाभावेन दिवादेर्ण्यद्विमेव विद्यतिर्विन्दिति विकरण

निर्द्देशस्य व्यावर्त्त्यव्यावर्त्यान्तरखण्डनव्याजेन दर्शयति विन्दतिरिति भाष्ये चेति विद्यति

विनत्ति विद्यतीति पाठ इति भावः तत्रत्युपलभ्यमाने विन्दि विद्यतीति पाठे पि विन्दिग्रहणेनो

भयोर्ग्रहणम् विन्नेर्विन्दातीति प्रयोगस्य विन्देरनुकरणादिकः सत्वात् अतएव वस्य विभाषा

इविन्देरिति वक्तव्यम् इह माभूत् विदितः तत्र हि वक्तव्यम् न वक्तव्यम् यदुपाधेर्विभाषात्

८२

२६

Digitized by Panjab Digital Library | www.panjabdigilib.org

कोनविभक्ताविल्यस्योच्चारणमात्रफलाकेऽप्रवृत्तेरच्छ्वधेरित्यचोपपादितम् लभ्ज्ञयानिवर्त्तते
षत्वमिति तास्यभेदात्पुनः प्रवृत्तिरितिभावः युगपदेववोभयोः षत्वम् ढधयोरिति मतभेदे
नेतिशेषः ढस्येत्येवानुयुक्तं इतिमतेत्वित्यनेन तन्मतेभाष्यानुग्रहरूपस्ययुक्तभावरूपस्य
चाल्चरस्यबोधनात् ऊहदन्तेरिति दीर्घीकारान्तानामुदात्तत्वादेववमस्यात तंचेतीऽभा
वनिपातनमारब्धम् एकाचइति जागृदिधीत्यादीनामव्यावृत्तिः शाकिति भाष्येत्वनुब
न्धरहितः पाठोदृश्यते पचिति डुपचेवप्रसिद्धत्वात् स्त्रजिर्द्दिवादिश्तुदादिश्च श्रध्यतीति
यद्यपिभाष्येश्यनानिर्द्देशोनास्ति तथापिमाधवादिप्रामाण्यादुक्तः रुध्यति दृप्यतीति
अतएवश्नमुचादीनामितिसूत्रभाष्येतृपितोदृपितइत्युदाहृतम् लुप तुदादिरेवनदिवा
दिर्व्याख्यानात् राध्धातोर्न्वादेर्द्दिवादेश्चग्रहणम् क्लिश्यतीति श्यनानिर्द्देशः क्लिशस्

Digitized by Panjab Digital Library | www.panjabdigilib.org

ल॰टी॰

२५

तिबर्त्तते॰ तेन ऋधातो रुशाधातोश्च यङ्लुकि नायं दीर्घ इति केचित् आर्द्धिय हलन्ताद
त्तविधिनित्यसार्थ्यम् थिच धादेशत्यय इति तेन पपो धावति पपोधावनमित्यादौ न
लोपः अतएव भाष्ये सङ्गीत्युक्तम् सनः सकारमारभ्य माहिङो ङकारेण प्रत्याहारः च
काधीत्येवेष्यत इति भाष्योक्तेरयं सिचो लोप इति सङ्गीत्यस्यैकदेश उक्तं प्रत्याख्यानं नयु
क्तम् तत्र सङ्गे न्यपस्य धादेः सान्तादसम्भवेन प्रत्यय इत्येवाध्याहृतं मूलकृता
पत्तुपदस्येत्यधिकारेण प्रत्यासत्त्या व्याख्यानेन चात्र एवैकपदस्थयो र्निमित्त निमि
त्तिनोर्ग्रहणमिति कैयटेनोक्तम् तत्र वतिङ्किष्टम् ततो वचनमेव ज्याय इति परे हए
ति तासस्त्योर्लोप इत्यत स्तासस्त्योरिति सः सीत्यतः स इति च वर्त्तते लोट इति लोडा
देशस्येत्यर्थः सलोप इति लिङ्स्सलोप इत्यनेन इकोत् तकार उच्चारणमात्रफल

Digitized by Panjab Digital Library | www.panjabdigilib.org

डादिनिमित्तकमवतेरइत्यादिस्थननिर्देशावन्नार्थेसाधकाइत्याहुः इतः षीध्वं
षीध्वमिषकारोन्नात्तंतत्रुवीध्वमित्यादौवेकदेशविकृतन्यायेनसीध्वमः सत्वे
नढत्वबारणाय अङ्गात्किम् वेविषीध्वं अत्यषीध्वमो नर्थकत्वेप्यर्थवत्यतिभा
र्थपात्अनित्यत्वज्ञापनायेदम् तेनानिस्मन्ग्रहणानीतिसिद्धमितिकेचित् कृस्त्वे
ति यद्यपिकृमित्युक्तौलाघवमस्ति तथाप्येकस्यैवलाभार्थमत्राहाग्रहणेत्वे
शोऽदुर्ज्ञेयताचेतिभावः तदुक्तमत्रउत् सार्वधातुकइतिसूत्रेभाष्येऽनुप्रयोगेतुभु
वास्त्ववाधनंस्मरन्तिकर्त्तृर्वचनात्मनेपिताइति पररूपापवादइति पररूप
पदमेकादेशोपलक्षणम् आन्जेइत्यादौगुणस्यैववाधेः अभ्यासविकारेवा
ध्यवाधकभावाभावेन ऊर्वोपधस्येतिहलादिः शेषोन्तरंदीर्घइतिभावः अचालिटि।

Digitized by Panjab Digital Library | www.panjabdigilib.org

ल० प्रो०
२४

यङ्लुकि दोषानुपन्यासेन तत्रेडिष्टः यङ्लोपश्चेत्यादिभाष्यन्तूपक्रमोपसं
हारबलेन न यङ्लुङ्विषयम् किञ्च तस्य तद्विषयत्वे यङ्लोपे स्थानिवत्त्व
स्यैव यङ्लुक्यप्यापात्तदर्शनेन न्यूनतापत्तिरिति वाच्यम् इड्विषये यङ्लुको
लोकेनभिधानेन छन्दसि सर्वविधीनां वैकल्पिकत्वेन न चेतत्र दोषानुपन्या
सेनादोषात् भाष्ये कोऽयं ग्रहणं किमर्थमिति प्रश्नस्योत्तरत्वेनागत्यर्थमित्यु
त्तरस्य च भाष्यस्य निरालम्बनतापत्तेः भाष्ये घो बेभिदीतीत्यादौ श्नम् श्यनाद
यस्तु चर्करीतं चेत्यस्य धातुपाठे पाठेन यङ्लुगन्ते न गुणान्तरप्रयुक्तत्वाभाव
घ्यान छान्दसत्वादेव कार्यान्तराणामपि छन्दसि दृष्टप्रयोगे घ दृष्टानाम
भावो बोध्यः भाष्यानुक्तादृशानामभाव एव तिपश्शपावादिनिर्देशात्तु लि

२४

Digitized by Panjab Digital Library | www.panjabdigilib.org

उपदेशोवोत्वान् हलादिरेवेति नच घत्तिरघुपदेशो हलादिरिति कैयटेनोक्तम्
यद्वा यस्य साक्षादुपदेशः सम्भवति तस्य मुख्यत्वात्स एव गृह्यते नतु स्थानु
पदेश इति न दोषः इयमपरीतित्पदेशत्वतइति सूत्रशेषे कृतो भाष्ये ग्राजस्ये
तिसूत्रे च भाष्ये परत्वेकाजग्रहणव्यावर्त्त्योत्त्रिवाधिरेव किंचोत्ततात्पर्येमेका
जग्रहणमत एव जागरितवानित्यादावुपदेशोऽजन्तत्वमादाय प्राप्नुकइट्नि
षेधो न तत्रोपदेशानुवृत्तिश्च स्तीर्णमित्यादाविट्निषेधायेत्याकरे स्पष्ट
म् रित्तपाशापेति मा स्येव भाष्यानुक्तत्वात् नच भाष्ये पङ् लोपे वित
दितेस्वैवयं स्तुकमपापाजदर्शनेवाविड प्रवृत्त्यर्थमुपदेशोऽनुदात्तादेकाचः
श्रूयमाणादित्यर्थे सनीट्प्रतिषेधो वक्तव्यो विभित्सतीति दोषोपन्यासवत् ॥

Digitized by Panjab Digital Library | www.panjabdigilib.org

ल०शे०

२३

शाजस्तपत्वारोपेरोतिभावः सिद्धेरति शब्दविशेषमनादृत्यार्थविशेषपुरस्कारेत्तोवोक्तपरिभाषाप्रवृत्तेः स्वपदत्वादिति सामर्थ्यादिति उपदेशमात्रे पएकाजेवेत्यर्थकल्पनयेत्यर्थः अनेकाच्त्वादिति हनोबधेतिसूत्रेऽस्यादन्तावाभाष्येउक्तत्वात् अतएवावधीदित्यत्रोतोहलादेरितिवृद्धिर्नो एवञ्चाधुदात्तनिपातनं तस्यनिष्फलमिति भावः वस्तुतआरोपितार्थबोधकत्वेतात्पर्यग्राहकत्वाभावेनाजन्तस्यात्यर्थवारणायचैकपदस्यावश्यकत्वेप्यवच्छेदकावच्छेदेनान्वयस्यौत्सर्गिकत्वेनलक्ष्यानुरोधेनचतथैवान्वयाद्धधिव्यावृत्तिः स्पष्टाचेयंरीतिस्तपदेशोत्वतइतिसूत्रेभाष्यकैयटयोः तत्रहिवसौप्रतिषेधाभावायहलादिग्रहणंकर्त्तव्यमितिभाष्यमुपादायोपदेशग्रहणात्तुभाष्यंसन्बध्यते

२३

भावेप्यङ्गसंज्ञाघाताऽस्य पतनिमित्तत्वम् नियमतः पत्वुद्धेः पूर्ववत्तितयापरं
निमित्तत्वात् एवञ्चकरीत्यजर्घाइत्यादौदोषशङ्कैवनेतिदिक् ननूपदेशेऽनु
दात्तस्यैकाच्त्वाव्यभिचारात्किन्तेनेति पृच्छति एकाचइति किमिति नचवधि
व्यावर्त्यपर्यन्ततत्सामर्थ्येनोपदेशमात्रेएकाचोग्रहणादितिवाच्यम् आद्युदात्त
निपातनेनसिद्धेरित्यभिमानात् आद्युदात्तनिपातनेन एकाच्ग्रहणेनेति त
दर्थकेनाचइतिपदेनेत्यर्थः अन्यथोपदेशेनेकाचामुदात्तत्वस्यैवसत्वेनत
द्वैयर्थ्यंस्पष्टमेवेतिभावः ननुवधावाद्युदात्तनिपातनेपिनसिध्यति हन्त्युपदे
शस्यानुदात्तत्वाक्षतेः नचतत्सामर्थ्यंगोत्वादतआह अचइत्येवेति उपान्त्यवि
मत्तसर्थ्येत्यागेमानाभावेनतद्विवक्षेतिभावः नचतइति समुदायेएकत्वविशि।

Digitized by Panjab Digital Library | www.panjabdigilib.org

त्वेकृतेहलादिश्शेषइतिबोध्यम् अत्ययेकिमिति अड्डुः नप्रत्ययाक्षेपः किम
र्थइतिप्रश्नः बव्रश्चेति अन्ययोर्दत्व(त्व)स्यापरनिमित्तत्वात्स्थानिवत्त्वाभावेन।
नसम्प्रसारणमितिनिषेधानापत्तिः अतएवासप्तमसमाप्तेरङ्गाधिकारउक्तोभ
गवता नच प्रागभ्यासविकारेभ्योङ्गाधिकारेप्यभ्यासेनप्रत्ययाक्षेपोभविष्यती
तिवाच्यम् अभ्यासस्यैकवाक्यतयालिटिपरेयेद्वेतयोः पूर्वस्यकृतोदित्व(
र्थलाभेप्य(त्)त्वस्यपरनिमित्तत्वानुपादानात् किञ्च सन्यङोरित्यस्यषष्ठीत्वे
नतद्विषयेसन्नन्तस्ययेद्वेइत्यर्थेनसर्वथापरनिमित्तत्वंदुरुपपादम् अङ्गस
ञ्ज्ञैकवाक्यतयातुप्रत्ययइत्यस्यावृत्त्यानदोषः अजघोश्चर्करीतीत्यादौयङ्
लुगन्तेनलुमतेतिनिषेधानित्यत्वेननक्षतिरितिभावः वस्तुतस्तेनतदाक्षेपो

शास्त्रे बुद्धिकृतमेव निमित्तत्वादि इदमेवाचीति ईदृशानिमित्तत्वाश्रयते लोलिङ्कुम्
आवस्याकात्वावधारणमपीत्याह छित्वे कर्त्तव्ये इति अचः किम् ईजाप्ये त
च हि कित्वनिमित्तत्वात् सम्प्रसारणस्यादेशो भुक्ते तेषु प्रवत्स्याः ञिनिमित्तत्वात्
अत्र तन्निषेधे छित्वे हलादिः शेषे उत्तरखण्डे सम्प्रसारणे पूर्वखण्डे सम्प्रसारणे
सम्प्रसारणं न स्यात् न सम्प्रसारण इति निषेधात् लावस्थायान्तु न कित्वम्
परैस्तिवादिभिर्बाधात् अत एवासंयोगादित्यत्रोपिदित्यनुवृत्तिश्चरितार्थे
तिदिक उरत् चच्छृदतुरित्यादावभ्यासविकारे वाध्यबाधकभावाभावेन पू
र्वं हलादिः शेषे ततोन्तरङ्गत्वात्तु किउरदत्वसिद्धये आह अभ्यासस्य रबर्णस्ये
ति इदञ्च दीर्घो कित इति सूत्रे भाष्ये स्पष्टम् ननु ते इत्यादौ तेनैव न्यायेनोरद

Digitized by Panjab Digital Library | www.panjabdigilib.org

मस्ति तत्र लोके समवायिकारणातिरिक्त एव निमित्तकारणत्वव्यवहारात् दरिद्रिबतीत्यादौ ने
तइकारस्य वाद्धित्त्वनिमित्तत्वमिति न गुणनिषेधः इत्तो द्वित्वाश्रयत्वात् तदाहु र्नहि कार्य्यमनु
भवन् कार्यीनिमित्तत्वेनाश्रीयते इति तस्य समवायिकारणत्वादिति तदाशयः एतेन शावि
तरित्रतइति ज्ञापकसिद्धं परिभाषान्तरमिति वदन्तः परास्ताः भाष्ये स्यानुक्तेश्च व्याकरणे
पिकार्य्यिलोपश्लिष्टस्यैव निमित्तत्वव्यवहाराच्च नचाशिश्रिबतीत्यादाविस्तथा उपश्लेष
स्य सप्तम्यर्थस्य समीपसम्बन्धरूपस्य भेदनिबन्धनत्वात् अत्रिकिम् अधिजगे गाङः लिटी
त्यत्र द्विलकारकनिर्देशेन लावस्थायां गाङादेशस्य सत्त्वात् लिटि आर्द्धधातुक इत्यादौ नो
विषयसप्तमीत्वेपि तज्ञाव भावित्वेपि तद्बुद्धिभावभाविता मात्रेणापि निमित्तत्वस्य वक्तुंशक्य
त्वात् अत्र तत्त्वोपात्त लिङ्बुद्धिभाव एव निमित्तमित्यजनिमित्तत्वाभावः सर्वत्रैव चात्र

Digitized by Panjab Digital Library | www.panjabdigilib.org

णादिषु कृतेषु लक्ष्ये लक्षणस्येति न्यायेन नैत्वमिति लुटः प्रथमस्येत्यत्र भाष्ये स्पष्टम्
कित्स्यादिति क्ङिद्वत्स्यादित्यर्थः द्विर्वचनेचि स्थान्यचः पूर्वत्वेन दृष्टस्यैव चक्रे इत्यादौ
कार्य्याभावादचः परस्मिन्नित्यनेनासिद्धेरिदमारब्धं द्विर्वचनेचीत्यनयोः सामानाधि
करण्यासंभवाद्द्विर्वचनशब्देन तन्निमित्तं लक्ष्यते तेनाचीत्यनेन सामानाधिकरण्यं तद
द्वित्वनिमित्तेचीति प्रत्यासत्त्या तन्निमित्तनिमित्तकादेशस्यैव स्थानिवत्त्वम्बोध्यम्
ऊर्णुनविषतीत्यादावपि तद्भावभावितामात्रेण निमित्तत्वात्प्रयत्नाश्च तन्निमित्तत्वम्
किञ्च लक्ष्यानुरोधेन साक्षात्समुदायघटकतयावाद्वित्वप्रयोजकत्वं निमित्तत्वमिह
तिचकत्तुरित्यादिसिद्धिः एवं चद्वित्वेऽजादिप्रत्ययस्य निमित्तत्वे चोपितत्वम् अल्पचो
निमित्तत्वेऽजादिप्रत्ययस्यापि सन्यङोरित्यस्य षष्ठ्यन्तत्वेपि सनोद्वित्वप्रयोजकत्व

Digitized by Panjab Digital Library | www.panjabdigilib.org

ला०पो०

२०

गानुकूलव्यापारवाचित्वेन तस्यापि विशेषवाचित्वात् एतेन कृत्स्नजातीयानां धातूना
मेवमन्योन्याहारग्रहणात्सम्पदे विशिष्टस्य धातुत्वाच्चिन्त्यमिदमित्यपास्तम् अनडुले
ति आमन्तस्यात्मनेपदानर्हत्वात् प्रत्ययग्रहणाच्चेति भावः तृतीयान्ताद्वृत्तिः अनुप्र
योगस्येति कर्मणि घञः पञ्चम्यर्थे षष्ठी अत्र नप्रत्याहारग्रहणम् अनुप्रयोगस्येव
सिद्धेः कृञ्ग्रहणात् पूर्ववदिति तृतीयान्ताद्वृत्तिः पूर्वशब्देन पूर्वोपादानकात्मनेपद
मवलम्ब्यते तदाह पूर्ववदेवेति पूर्ववाक्ये आम्प्रत्ययवदिति त्विन्दांचकारेत्यादावं
कर्त्रगामिक्रियाफले एतद्विहितात्मनेपदवारणाय नतङिति इदमनुपलक्षणं कान
चोपि एकारोच्चारणमिति न्यासः सेड् इत्यत्रत्यमप्येवम् तेन डे स्यादि इति आत्मनेपदा
नामित्यत्र भाष्ये स्पष्टमिदमेकदेशयुक्त्या वस्तुतः परत्वादेत्वे पुनः प्रसङ्गविज्ञानेन

२०

Digitized by Panjab Digital Library | www.panjabdigilib.org

आमन्तादिति पञ्चम्यानिर्दिष्टपरीभाषया अप्राद्येन चाव्यवहित एव प्रयोग अनुशब्दात्
पश्चादेवेति बोध्यम् कृञ्चाहतोति कृञ एवानुप्रयोगे नुप्रयोगस्येत्येव सिद्धे तद्वैय-
र्थ्यंस्पष्टमेव तेषांक्रियेति एधमन्यादयः फलानुकूलव्यापारवाचकाः कृञुत्पत्त्यनुकू-
लव्यापारवाची भूस्तीच सत्तानुकूलव्यापारवाचकौ आम्प्रकृतिसमभिव्याहारे चोत्प-
त्यादिकमामन्तार्थ्यफलनिष्ठमेव एवं चैधांचक्रे इत्यस्यैककर्तृकवृद्ध्यनुकूलव्या-
पाराभिन्नपरोक्षानद्यतनभूतउत्पत्त्यनुकूलव्यापारइति बोधः सम्पदि त्विति अभि-
विधौ संपदा चेति सूत्रपठित इत्यर्थः अनन्वितार्थत्वादिति सम्पदेर्हि सिद्धवस्तुनो यो-
ग्यरूपान्तरापत्तिरूपार्थकत्वादिति भावः द्रव्यं संपादयतीत्यादौ तु धातूनामनेकार्थ-
त्वात्त्वसत्ताक्रान्तताकरणमर्थः केवलपदे त्वप्यनुप्रयोगो नापाद्यः उक्तादेशासंयो

Digitized by Panjab Digital Library | www.panjabdigilib.org

ला०टे०

१९

द्वेष्वामनापत्तेः तत्रहि नुतुगुत्तारं गुरुमत्ता आन्त्छइत्यस्यवैयर्थ्यापत्तेश्च आदिग्रहणा
न्नुव्योजादेरेवग्रहणं नतुव्यपदेशिवद्भावेनेजादेरित्यपि नयुक्तम् ईङ् गताविप्यादेरयां
चक्रे इतिमाधवाद्युदाहृतस्यासङ्गत्यापत्तेः नचऋच्छेत्योर्लिटि गुणविधानसामर्थ्यादेव
तत्राममावेसिद्धे नच्छइतिव्यर्थम् आन्वाधापेक्षपातद्वित्वनिमित्तिपरिभाषाबाधेन
व्यवधानेपिगुणप्रवृत्त्यातत्सामर्थ्याभावेनतत्सार्थक्यादितिसूत्रतात्पर्यम् ज्ञापका
दिति ननुमित्वादन्नपादचः परत्वसामर्थ्यादसञ्जातविरोधिन्यायेनसवर्णदीर्घबाध
धोस्त्वितिचेन्न प्रधानसवर्णदीर्घबाधापेक्षयेत्त्वबाधस्यैवौचित्यात् इञ्चानु
कास्यप्रत्ययादितिसूत्रादनुवर्त्तमानमिति पञ्चम्याविपरिणम्यते लिटि परत उपाश्लि
ष्टस्य कृञ्ञ आमन्तादनुप्रयोग इति सूत्रार्थस्तत्फलितमाह आमन्तान्निहि परा इति

१९

Digitized by Panjab Digital Library | www.panjabdigilib.org

एवमप्युच्यन्ते तेनानस्यनेतिभाष्ये स्पष्टम् सार्वधातुकम् अपिदित्ति पर्य्युदासः नचच्यवे
इत्यत्र परत्वादिवङ्भावे प्राविटो रेकादेशस्यापित्वा नूङि त्वे गुणानापत्तिः एकादेशस्य पूर्वविवि
धौस्यानिवत्त्वेनादोषात् यन्तु पिदार्द्ध धातुकयोरिति पठित्वेदं त्यक्तुं शक्यमितितन्न स्व
ष्टइत्यादौ मृजेर्वृद्धिः क्ङितिचेति निषेधानापत्तिः घासःसे तङानादेशानां टेरेत्वं नेतिज्ञा
पनादेकारोच्चारणम् इणादेस्चतु धातोरेकाच इत्यतो धातोरिति कास्प्रत्ययादित्यत आ
मृ लिटीति चानुवर्त्तते इयेषेत्यादौ तुनाम् सन्निपातपरिभाषाविरोधात् लिटिनिमित्ता
हि तस्य गुणमत्वा इणादेर्गुणमतो विहिते लिटीति वाच्यो नत्वदोषः इचोयुतो रित्येवा नच्छ
इति पर्य्युदासादर्थान्तरस्यासम्भवाच्चेजादेर्गुणमत इत्यपर्थलाभे मतग्रहणमादिग्रहणंच
स्पष्टार्थम् मतग्रहणादौपदेशिकगुणमतो ग्रहणमिति तुनयुक्तम् इविच्छजीत्यादेर(

माधवाद्युक्तिं
एडयति. यन्तु इति स्

Digitized by Panjab Digital Library | www.panjabdigilib.org

उक्तन्दिर्निशामनेत्यकर्त्तृगतिशोषणयोरिति तेननेरिताम्भिदिद्विधिरिति भाष्येउक्तम् तथ्या
नमोवरिवइतिसूत्रेभाष्येउक्तम् कः खल्वपिपचादीनांक्रियावचनत्वेयत्नंकरोतीति अर्थं
खल्वप्याचार्य्यश्चित्रयतिक्वचिदेकंक्वचिन्नेति उपलक्षणमिति अनेकार्थाअपिधात
वोभवन्तीतिभाष्यमत्रमानं तच्चप्रयोगानुसारेणैव नत्वमर्य्यादंभाष्यस्यापिप्रामाण्यात्
एवंचसेधतेर्गताविति सूत्रेगताविस्युपादानात्विधागत्यामितिनिर्द्देशोऽपाणिनीयइति
बोध्यम् द्योतकाइति अतएवानुभवत्यादेः सकर्म्मकत्वम् अत्रोपसर्गाणांत्विस्युत्तपानि
पातानांद्योतकत्वंवाचकत्वंचास्युपेति एधवृद्धौ अकर्म्मकः वृद्धिक्षयभयजीवि
तमरणंलज्जासत्तास्थितिजागरणं शयनक्रीडारुचिदीप्त्यर्थंधातुगणंतमकर्म्मक
माहुरित्यभियुक्तोक्तेः दितआत्मनेपदानाम् आत्मनेपदशब्देनात्रप्रकृतास्तङादय

अर्थंचप्राद्यान्तमेकं
पर्णमितिचलोपतु
त्यान्तपाठेतुअ
र्थआद्यन्तनाम्बो
ध्यम्

Digitized by Panjab Digital Library | www.panjabdigilib.org

नचाष्टमिकद्वित्वस्य स्थाने द्विर्वचनत्वे पूर्वभागस्य कथं पदत्वमिति चेत् द्वितीयवत्त्वशब्दरूपमादेशः ॥ अर्थके
द्विरुक्तिवर्त्तमानेषु इति द्विवचनबलेनानेकामिताव्ययवर्गे दसमुदायस्यैवादेशात्प्राप्त्यिकत पदसमुदा
यात्मकस्य विधानात्प्रत्येकमप्यनयोः पदत्वात् ॥ ४

अयनं चेत्युत्तरसूत्रमपि कृत्यच इति सिद्धे देशप्रतिषेधार्थमेव शेषे विभाषा अक
खादाविति छेदः ननु संहिताधिकारात्तद्विवक्षाविवक्षाभ्यां रूपद्वयसिद्धौ विभाषा
ग्रहणं व्यर्थमत आह संहितेति अत्रैकपदशब्देनाखण्डपदं अत एव नित्या समा
स इति चरितार्थम् अत एवायं अग्रेरित्यादौ पदद्वित्वे संहिता नित्यैव अखण्डत्वं च पदत्वा
भाववदुत्तरखण्डत्वे तेन राज्ञीपत्नीत्यादौ न दोषः अन्यथा तत्र पक्षे शषैकादेशो चिन
स्यादिति बोध्यम् अर्थनिर्देशश्चेति भ्रस्जाद्यामित्यादिभिरभियुक्तकृत इत्यर्थः स च क्रि
यावाचित्वबोधार्थ इति भावः पाठितिविस्तु कांश्चिदर्थरहितान्पठति कांश्चिदर्थसहितान्
अत एव भ्वादिसूत्रे परिमाणग्रहणं कर्त्तव्यं कुतो ह्येतत् भूशब्दो धातुसंज्ञो भविष्यति
न पुनर्भ्वेधशब्द इति भाष्ये उक्तम् चुट्ठ इति सूत्रे पदपमिरितः कांश्चिन्नुमनुबन्धान्पठति

Digitized by Panjab Digital Library | www.panjabdigilib.org

आप्त्वादेवेति विपरीतनियमस्तु न व्याख्यानात् लिङ्लुङीत्यत्र प्रकृत तत्सूत्रे च भाष्ये स्पष्टमे
तत्सर्वम् अडाटाविति लुङादिषु परं तु कृतं तन्नेति व्याख्यानादिति भावः लिङ्निमित्ते हेतुहे
तुमद्भावादित्यादिनाऽऽशंसावचने लिङित्यपि गृह्यत इत्येके अतिपत्तिरनभिनिर्वृत्तिः
उदाहरणे सुवृष्टिभवनसुभिक्षभवनयोर्हेतुहेतुमतोर्भविष्यत्कालयोरनभिनिर्वृत्तिरितो
वाक्याद्गम्यते प्रमाणान्तराच्च तयोरतिपत्तिं बुद्ध्वावगत्य वाक्यं प्रयुङ्क्ते आनिलोट् उपस
र्गात्परसमुदायावयवानिशब्दनकारस्य णत्वमित्यर्थः प्रहिमानीत्यादौ तु न दोषः अ
नर्थकत्वात् प्रादीनामनुपसर्गत्वाच्च एवञ्च लोड्ग्रहणमनर्थकमिति भाष्ये स्पष्टम्
दुरः षत्वणत्वेति दुरः कृतरेफसान्तस्याप्यत्रानुकरणात्तस्याप्ययं निषेध इति निरूपित
म् अनितेः शब्दस्येति हन्तेरत्पूर्वस्येत्युत्तरमन्तादेशा इति तु देशे प्रतिषेधार्थमिति भावः

Digitized by Panjab Digital Library | www.panjabdigilib.org

भुसुवोः अत्रपितीत्यनुवृत्तावननुवृत्तौ वा फलदोषयोरभावेन तदनुक्तिः भत्वमिति
तेन कुत्वजश्त्वे न कर्मधारय इति अत एव तिशब्दोच्चारणम् विद्यमानादिति तत्त्वञ्च सर्व
देशे नापहृतत्वं अत एवासीदित्यादौ न दोषः भाष्ये तु अस्तिसिचोपृक्त इति सूत्रपाठोल
भ्यते तत्र स इति मध्यमणिन्यायेनोभाभ्यां सम्बध्यते सान्तादस्तेः सान्तात्सिचश्चेत्यर्थः
लुक्यपि स्थानिवत्त्वं नाल्विधित्वात्प्रत्ययलक्षणात् सूत्रन्तु नियमार्थम् विध्यर्थत्वे पिसा
न्तादिति विशेषणासामर्थ्येन श्रूयमाणसान्तपरम् अत एव वार्त्तिककृता सकारः सिचए
व विशेषणमित्याशयेन भुवईट्स्थानिवत्त्वप्रतिषेध उक्तः ननु सिजन्तलुकोपितन्निषेध
प्रारब्धः सिचस्स इति प्रश्लेषे द्विसकारको निर्देश इत्यस्य भाष्यस्यासङ्गतिः सत्त्वोच्चारणाभा
वादिति भाष्यप्रदीपोद्योते विस्तर इत्याहुः इति प्राप्ते इति प्रत्ययलक्षणेन प्राप्तिः॥ ॥

Digitized by Panjab Digital Library | www.panjabdigilib.org

हे तुमति सत्र प्रयो
ग मिति छिती यान्त
मिति भावः २

विभक्तेः कारकविभक्तिर्वलीयसीतिन्यायेन यस्य च भावेनेति सप्तम्या युक्तेत्यप्युक्तम्
लिङ्गसाध्यन्यायस्य परिभाषया बाध एवोचितः तन्निमित्तग्रहणेन सामर्थ्याद्दूरता
पकेन बा परिभाषा बाध इति लक्षितम् इकइति च स्वरूपपरमत्रानुवर्त्तते ऽर्थाधिका
रान्नदाह इग्लक्षणेति इक्पदलक्षणोत्पत्त्यः नस्यालामिति धातोर्विहितत्तस्यादी
नामित्यर्थेनपरत्वादाद्गुणान्तच्चेति सत्र भाष्यरीत्यानल्यपासुरित्यत्र ङ्. त्वाद्याप्तर्वेवा
सुप्यपि निर्दिश्यमानपरिभाषया नक्षतिः माङि लुङ् मास्त्वित्यादौ निषेधार्थे माशब्दे.
न माङितिनदोषइति केचित्तन्न आङ् माङोश्चेति सूत्रे स्येन माङो विशिष्टस्य ग्रहणाम् कि
मर्थमप्रतिषेधार्थकसमस्तपदार्थस्य मौ छत्रमित्यादौ मा भवदिति भाष्यस्य तदभावबोध
नादितिपरेगापाविहेति व्याख्यानादिति भावः अतएव गापोर्ग्रहणेइत्यापिवत्योर्ग्रहणा

हे तुमति चेति सूत्रे पठस्य तु मा भवान् अनुयुक्ता मा भवान् इति भाष्यप्रयोगमूलिकमाह नीत्यादि ४
मपर्वका माङ् आतश्चोपसर्गेइत्यङ् टाप् अत्रैव घापि धातुर्ङित् तथा चिट्टावृत्तो

Digitized by Panjab Digital Library | www.panjabdigilib.org

ननु ककाराननन्तरमेवत्रासिद्धक्रममनुसृत्य गकारप्रश्लेषे तत्रपरो त्वनासिकइति ङे. हलोयमामिति त्वोपेनि
र्दिशोपपत्तोपत्यम् हलेगिदादक्रमेलवृत्तिलेवेनमसङ्कुः तमित्यतश्चाह इहेति कास्यूर्वमिति शेषः मोद्विवचा
लक्ष्यसात्वत्वेन सत्त्वीकदाहन्यायेन पूर्वं गत्र प्रश्लेषे गकारस्य चर्त्वेन के तस्मात्परस्य कस्य परतो नुनेति ङे. तद्यो
पेचहतेप्रहृतनिर्देशोपपत्तिरितिभावः २

भिन्दुरित्यसिद्धावत्याऽर्थवत्परिभाषावाध्यव पदागमा इत्यस्याश्रयणात् विषये प्रवृत्तेः
अन्यथागमसत्त्वे केवलेऽत्वस्याप्यभावेन तदसिद्धिः स्पष्टैव क्ङिति च इह चर्त्वेन ग
कारोपि निर्दिश्यते तेन जिष्णोः सिद्धिः स्थास्नुरित्यत्र त्वापत्त्या नायं किदित्याशयेना
ह गिदित्यादि निमित्त इति क्ङिति चेति गुणवृद्धी प्राप्नुत इत्यध्याहारेणासिद्धसाध्यस
मभिव्याहारन्यायेन निमित्तत्वमुच्यते इति केचित् वार्त्तिककृता तु तन्निमित्तग्रह
णं कर्त्तव्यमित्युक्तं भाष्यकृता तु क्ङितः किल्वेन ज्ञापकेन प्रत्याख्यातम् गुणवृद्धि वि
ष्णोषतात्वपि क्ङिति अव्यवहिते उपाधिलिष्टस्य पूर्वस्येव प्राप्नुत इत्यर्थे सम्भवेन परि
भाषाप्राउर्बीजत्वात् अनुवादे परिभाषा नेति तु इको गुणवृद्धी अचश्चेति सूत्रद्वय
विषयमेवेत्युक्तम् भाष्ये तस्य निषेधस्यानुलम्भाच्चाधिकल्पोतत्ज्ञमीसम्भवेऽपपद

ननु गकइ इति स्थिते परत्वेत दृष्टाचर्त्वस्यासिद्धत्वात् कत्वे ङे. तत्परत्वाभावाच्चर्त्वाप्राप्तिरिति चेन्न कमेणा
न्वा...

Digitized by Panjab Digital Library | www.panjabdigilib.org

तः सार्वधातुकग्रहणमनुवर्त्तते अन्यथापचेदित्यादौदीर्घत्राभ्याचिकीर्ष्यादित्यादाव
तोलोपश्चाभ्यासस्यानर्थकत्वेनोभयोरपिबाधः स्यात् मध्येपवादन्यायेनलोपमेवबाधेत
स्पष्टंचेदंभाष्यकैयटयोस्तदाह मध्येपवादेत्यादि उत्यच अपदान्तात्किम् काउत्वा
कोत्वा नचात्रलाक्षणिकत्वमुसः अपदान्तादित्येतत्सामर्थ्येनात्रपरिच्छेदकन्या
याप्रवृत्तेः अतएवानर्थकप्रत्ययेचभिन्द्युरित्यादौपररूपसिद्धिः अवर्णा दुसाव
यवेऽचीतिसूत्रार्थस्तदाह इतिप्राप्तइति पाशब्दाकारेणेतिभावः नित्यत्वादिति एं
कादेशस्यपूर्वान्तत्वेनग्रहणादितिभावः पासित्येतस्येति बालादाङ् मित्यनपेक्ष्येद
दम् सन्धितार्थइति अत्रानेमुक्सूत्रभाष्येऽतोयाऽइयइतिव्यक्तपाठ एवदृश्यते नन्वे
वमपिभवेत्यकारेणोसः पररूपंडुबौरं यदागमाइतिन्यायेनेवुसउत्वादितिचेन्न

तिभाष्यनयेप्यमद्विर्वचनस्यद्वितीयद्विर्वचनेनबाधवत्सुटापिलीयुटोबाधोद्
र्वोरइतिचेत्सत्यम् यासुड्विषयेलीयुटः प्रतिषेधोवक्तव्यइतिवचनेनात्रप्रकरतो
बाध्यबाधकभावाभावज्ञापनेनादोषादितिनिरूपितंभाष्यप्रदीपोद्योते अत
एवन्ऊर्णुयादिविषयेयासुड्सिद्धिः अन्यथानुस्तायासुटोबाधापत्तिरितिदिक्
लिङः स रुदादिभ्यः इत्यतस्सार्वधातुकइत्यनुवर्त्तते सकारद्वयस्यापीति युगप
त्प्रवृत्त्यालक्ष्यभेदात्पुनः प्रवृत्त्यावेतिभावः यलोपइति नचतत्रकर्त्तव्येऽङ्गसञ्ज्ञा
सापेक्षस्ययलोपविधौबहिरङ्गतयाऽसिद्धत्वमितिवाच्यम् तस्यामङ्गशब्देनरूपस्यसम्प्र
यलोपात्तस्यानिमित्तस्यैवग्रहणान्नतुसञ्ज्ञायाअर्थस्यवेत्यदोषात् एवंचयलोप
रनिमित्तकत्वेनान्तरङ्गत्वमितिबोध्यम् सार्वधातुकावयवस्येति रुदादिभ्यइत्य

Digitized by Panjab Digital Library | www.panjabdigilib.org

सं०प्रे०

१५

तुतत्समकालमेवनिघातइत्यन्यत् अलावीदित्यादौ सिचश्चित्वेनेट उदात्तत्वा
न्ननिघातइत्याद्युदात्तश्चेति सूत्रे भाष्यप्रदीपोद्योतेनिरूपितम् अनेनयाशुट्टोङि
त्वेप्यवयवेऽचरितार्थीतिकृं समुदायेविशेषतामितिन्यायेन समुदायेङित्वम्बो
ध्यम् ङित्वोक्तेरिति अत्रयद्वक्तव्यंतदिङ्कोतिसूत्रेउक्तम् लुटयानुङ्नेति आ
त्मनेपदेचारितार्थ्येपि परत्वात्स्मोबाध्योनेत्यर्थः विषयभेदादिति एवंचयौ
गपद्यासम्भवरूपविप्रतिषेधाभावान्नापरत्वेनबाधइतिभावः एतेनैधिषीर्
तिस्त्रापसूत्रे भाष्ये उक्तं महाराजीति टच्चिमस्यात् इति पुंवत्वे टिलोपे महाराजीतिस्यादिति भा

Digitized by Panjab Digital Library | www.panjabdigilib.org

ल०प्रो०

३०७

त्यनन्तरमपि पचाम्सहितस्य धनक्रीतेत्यादौ प्राक्सुबुत्पत्तेरिति स्त्रीप्रत्ययोत्पत्तेः प्रागित्य
पि बोध्यम् अश्वक्रीतीति अश्वेन क्रीतीति कर्तृकारकस्य कृता समासः क्रीतात्करणपूर्वादिति
ङीष् सुबन्तेन समासे पूर्वं तदन्तत्वाभावात्स न स्यादिति भावः व्याघ्रपामपि आङेन अप्रा
ष्ठेन वेराप्रशब्देन गतिसमासः कच्छपीत्यत्रापि सुपीति योगविभागात् केकच्छेन पिवतीत्यर्थे
उपपदसमासः अमैवेति तुल्यविधानमित्यध्याहारलब्धं सञ्ज्ञावाक्तुल्यविधानत्वमा
श्रित्य तत्सञ्ज्ञकस्य तुल्यविधानत्वमुक्तः येनामैव विधीयते तेन यस्योपपदसञ्ज्ञा विधी
यते तदुपपदमव्ययेन समस्यते नान्येन तुल्यविधानमित्यर्थस्तत्फलितमनुवदति त
देवेति कालादय्येऽप्रमन्तेस्वामैव तुल्यविधानत्वाभावान्न दोषः अमिति रामुत्वमनुजोः
सामान्यग्रहणं तेन चोरंकारमित्यप्युदाहरणं तृतीयाप्रभृतीन्यसमस्यन्ते इति यद्यपि उप
पदनिमित्तकृद्विधौ समर्थपरिभाषोपस्थितेरुपपदसञ्ज्ञासूत्रे भाष्ये उक्तत्वेनोपपदकृद
न्तयोर्व्यपेक्षा दुरुपपादा कृतीः साधुत्वापत्तेः अत एव महान्तं कुम्भं करोतीत्यत्र महाविशेषता
त्वेनासामर्थ्यान्नामोति तत्रोपपदमित्यत्र भाष्येऽस्य षष्ठं विशिष्टस्य पतनुनोपपदसञ्ज्ञा ५ पदट

३०७

तिङिति वार्त्तिके न समासः तत्रातिङ् त्यस्य तिङ्ग्रहणे तेनैतत्पर्यः सहेति योगविभागेन वा तत्रार्थ १

धिकारानुरोधेनाप्यत्रापि अतिङन्तस्समास इति व्याख्यातं अत एव तत्र कृत्स्नमर्थयोरिति सूत्रे

किम्ब्रूतं स्यान्नाधिकारादेकिं वृत्तग्रहणानर्थकमित्युक्ता सामर्थ्यादुपपदसञ्ज्ञार्थ नृहीत्या

शङ्क्य अतिङिति प्रतिषेधात्सञ्ज्ञानर्थकमित्युक्तं संगच्छते अतिङन्तस्योपपदविशेषण

त्वे तदसंगतिः स्पष्टैव उपपदमतिङित्येनेति तु नार्थः अतिङिति ज्ञापयति अनयोर्योगयोः।

निवृत्ते सुप्सुपेति केनेदानीं समासः समर्थेनेति भाष्यासङ्गतेः सुप्त्यन्तीयान्तत्वकल्पने

मानाभावाच्च भाष्यरीत्यात्रानुदाहरणाभावाच्च नचैवं तरवन्तेतदाहरणापत्तेः तत्र तस्य चारितार्थ्य

कर्यं तत्र सुपेत्यस्यासम्बन्धे तस्य ज्ञापकत्वमिति वाच्यं उपपदमिति सूत्रसम्बन्धेनैवानेन

तिङन्तव्यावर्त्तकेन प्राचीनपरिभाषानुरोधेन सूत्रेष्वपि सुप्सुपेत्येतदसम्बन्धज्ञापना

त् तदुक्तं भाष्ये अतिङ्ग्रहणं ज्ञापयति अनयोर्योगयोर्निवृत्तं सुप्सुपेति तत्र पूर्वसूत्रेग

त्यंश एव तदसम्बन्धः परिभाषानुरोधादेव तदाह तयाचेति कारकांशोप्येकदेशानुमेयो

ध्व इति गम्यते भाष्याच्च कर्त्तृकरणे कृता इति सूत्रविहितसमासो बहुलग्रहणात् क्वचित्तद्वृत्ये॰

Digitized by Panjab Digital Library | www.panjabdigilib.org

एवयहणस्य गतिकारकोपपदादिति सूत्रे प्रकृतसूत्रे च भाष्ये ध्वनितत्वात् प्रकृतसूत्रे उपपद
क्रियेति न्यासे क्रियेत्यस्येदं मस्तुदाहरमाशेङ्ः त्रास्य क्रियावाचित्वाभावादूषितेम् तत्र क्रियावाचि
त्वाभावादत्र प्रत्युदाहरणत्वेन तुमुन् भवतीत्यस्यान्याय्यत्वात् नच धातोः क्रियावाचित्वेन
तन्निर्वेधनस्तुमुन् स्यादेवेति वाच्यं उपपदमिति महासंज्ञया तुमुन्विधावपि पदत्वपर्य्यन्तोनि
वेशात् तस्मात्तत्र तुमुन्नेव लोकसाधुत्वमेव भाष्यतात्पर्य्यं अर्थमात्रग्रहणे तु गुणीभूतादेरपि ग्र
हणमिति गतयाकादियोगेपि कारकविभक्तिकृत्वमुनर्घ्यकादीनां साधुत्वं भवत्येवेति भाष्यप्रदीपो
द्योते विस्तरः कारको ब्रजति तरामित्यादेस्त्वनभिधानमेवेति भावः सुपेत्येतदिति॰ सुविस्यस्या
प्युपलक्षणमिदं किञ्च कारको ब्रजतीत्यस्येव भाष्यप्रत्युदाहृतत्वेन तद्व्यावर्त्तेः सुवितिप्रथमा
न्तानुवर्त्येव सिद्ध्यात हेत्वपर्य्यमिति प्रथमान्तानिवर्त्तेविवेन बोधयितुं युक्तापतिभावान्न
करणलाघवानुरोधेन तु भाष्येत्सामान्यापेक्षज्ञापकमाश्रित्योभयोर्निवृत्तिरुक्ता एवं
सूत्रेपीति तत्र गत्यंश्रोऽतिङ इत्यस्य सम्बन्धे फलाभावेन तिङन्ताघटितः समास इत्येवं समा
स विशेषणत्वेव अत एव प्रचल्लतितरामित्यादौ न गतिसमासः किन्तु तदानीं वतागतिसन्ततावा

Digitized by Panjab Digital Library | www.panjabdigilib.org

कृताचदंष्ट्रोश्रमात्तंनोपन्यस्तंपरिभाषानकर्त्तव्येति अत्रकृतस्सूत्रभाष्यन्तु विशिष्टापादकत्वमत्त्व
परं अतएवभाष्येप्रत्याख्यानोत्तरमपिगतिकारकेतिसमासवचनादित्युक्तं तेनकारकोपप्रो
वचनत्वमेवबोधितमितिदिक् माभवानिति समासेसतिव्यवहितप्रयोगोनस्यात् इति।
सूत्रपितुंभवानिति इदमुपलक्षणंकारकोव्रजतीत्यादेर्भाष्योक्तस्य किञ्चमाङ उपपदत्वे
महासंज्ञाकरणबलान्माकदाचिद्वर्त्तिभूदित्येचइतिसूत्रस्थभाष्यप्रयोगे माकदाचिदव्य
वत्तिर्भूदिति तद्भिन्नार्थेतिसूत्रस्थभाष्यप्रयोगेऽपित्रिपदव्यवधानेप्रयोगोनस्यात् कर्त्तुन्देवद
त्तोघटंयामेव्रजतीतिप्रयोगः किञ्चमाङोनोपपदत्वेलुङ्विधौमाङीतिसप्तम्याः प्रथमा
र्थत्वेमानाभावात् तस्योपपदसंज्ञायांफलाभावाच्च तुमुन्विधौतुक्रियार्थोपपदस्येत्यर्थ
मुपपदसंज्ञावश्यकीतिदिक् अतिङ्ग्रहणमिति नचकारकोऽपि तद्वत्पत्र सुबन्तोपपदस्यस
मासव्यावर्त्तये तिङन्तार्थक्रियाबोधकापिदितित्यर्थकं तदितिवाच्यं तस्यद्रव्यवाचितया तिङ
न्तार्थत्वाभावेन तेन तद्वारणासंभवात् किञ्चगतादेरद्रव्यवाचितयाक्रियावाचकेऽपद
त्वाभावेनएवलएवतत्रास्थाः क्रियावाचकेशब्दग्रहणेक्रियायाः साध्यमात्रावस्थायाः

Digitized by Panjab Digital Library | www.panjabdigilib.org

राजपुरुषेत्यादौ न लोपः एवमाहाहार्कोऽजनतीत्यत्र अतिङिति बहुव्रीहिणातिङन्ताघटितः समा
सइत्यर्थे न तद्प्रवृत्तेस्तदाह अतिङन्तश्चसमासइति कथमघितिङन्ताघटितइत्यर्थः स्या
सइति नत्सञ्ज्ञकः सम्पुरण्यइत्यर्थः कुम्भकारादिति नन्वनाकृतानपीति न्यायेनेतत्सञ्ज्ञालोपस्यैलु
काबाधादिदमयुक्तं इतिचेन्न स्वलोपबाधाबाधयोः फले विशेषाभावेनानाकृतानपीतिन्या
याप्रवृत्तेः अलौकिकस्याक्रियाबाधस्य इत्यस्य समासमात्रवृत्तियोग्यं लौकिकप्रयोगानर्हमित्यर्थः
हरिङेत्यत्रामीत्सञ्ज्ञायुक्तस्यैव समासो लोके प्रयोगानर्हत्वस्योभयत्रापि सत्वेनाविशेषादप्रवृत्ते
त्सञ्ज्ञालोपमेवोच्चारितमित्यलं कृयोगलक्षणाचात्र षष्ठी नचानाकृताद्वितीयाप्रकल्प्या
पवादविषयमुत्सर्गप्रवृत्तेः अत्र षष्ठीसमासोन उदन्तपदे विभक्त्युत्पत्तेन पूर्वमेवाप्रयत्नव
स्यान्ताकृत्वात् कारकषष्ठीत्वेन षष्ठीसमासस्याप्रिततः पूर्वप्रवृत्तो तु अस्तुसः अस्यनित्यत्वेन त
त्कृततत्पुरुषसञ्ज्ञाप्रयुक्तकार्याभावाभावेष्येतत्कृततत्सञ्ज्ञाप्रयुक्तस्य न स्यापगमेन्यायाद्दोषात्
एकस्याएवसञ्ज्ञायाउभाभ्यामपि प्रवृत्त्याः विरोधेन युगपद्द्वाभ्यां सास्पष्टं चेदं भाष्ये एवंच।
द्वितीयाश्रितेत्यादिसमासेष्वुत्तरपदेष्वुत्पत्तेः प्रागेव अतएव कारके तिसामान्यत एकोक्तं भाष्य

Digitized by Panjab Digital Library | www.panjabdigilib.org

तत्र हि सुबन्तमेवोपपदं न तु तत्प्रकृतिकं आवश्यार्थे उपपदत्वे गौरवं महासंज्ञाविरोधश्च सुप्य
जातावित्यादिविषये सुबन्तस्य सप्तम्यन्तपदवाच्यत्वस्य तत्स्थत्वमादायोपपदत्वं बोध्यम् वि
भाषायां प्रथमे त्यादौ सुपीत्यधिकाराभावेपि महासंज्ञाबलात्तेषां तत्प्रकृतिकसुबन्तानां लाभो बोध्यः
अत एवोपपदमिति सूत्रे इति ग्रहणादनयोर्विभागयोः सुप्सुपेति निवृत्तेरिति भाष्ये उक्तं उप
समीपे उच्चार्यते पदम् उपपदं सामीप्यं च सप्तम्यन्तपदघटितसूत्रविधेयप्रत्ययप्रकृत्यर्थे नित्यान्वयि
त्वमेव न त्वानुपूर्व्यं व्यवधानं कर्मण्यणादि सूत्रे उभयप्राप्ताविति भाष्योदाहरणात् आतोऽनुप
सर्गे क इत्यत्रानुपसर्गग्रहणाच्च गुरुं नमस्करोति कन्यामलंकरोतीत्यादौ हिमवन्तं स्पृशतीत्या
दाविवानभिधानान्नाण् अभिधानलक्षणाः कृत्तद्धितसमासा इत्यकर्तरि चेति सूत्रे भाष्ये उक्तेः
नन्वेवं तत्रग्रहणमनर्थकं कृत्धात्वर्थाधिकारविषयतावधिकारे सिव सिद्धत्वात् अत आह तत्रेति
अनेनोपपदसंज्ञासन्नियोगशिष्टत्वं प्रत्ययविधेर्बोध्यते अन्यथा न्यायचयशिष्टत्वसंभवे
त प्रातिपदिकार्थे सप्तम्यामेवास्य प्रवृत्त्या भावे भाव इत्यादौ न प्रवृत्तिः तथ्यवस्थात्वनुशासिता
त्वादिवत्संज्ञया तु रोधेनेवेति बोध्यम् उपपदं सुबन्तमिति महासंज्ञाबललभ्यम् अतएव

Digitized by Panjab Digital Library | www.panjabdigilib.org

वस्यार्थानीतिभावः कर्म्मप्रवचनीयानामिति तासंज्ञात् प्रतिसत्त्वनमित्यादौ ऽर्थत्वाभावा
द्ध्यर्थेति बोध्यं येन कर्म्मप्रवचनीयानाम्प्रतिषेधः वक्ष्यम्प्रति विधीयते प्रवेती नांच
धोवक्तव्यः आमन्त्रेस्त्रिहाशिमिर्व्याहित्युक्त्वा सिद्धं तुल्यादुर्गतयः प्रादयः कार्थ इत्यनेन द
बचन त्वपमपिप्रत्याख्यातं एतदेव सोनागोर्विस्तारके गपठितत्वती प्रज्ञायांदुर्निन्दायामङ्गीपद
र्थे कुमायार्थे प्रादयो गताद्यर्थे इत्युक्तं एवञ्चे वामावप्रयकत्वेन कर्म्मप्रवचनीयप्राप्तिरेव नेति तद
शयः तत्रोपपद अपमधिकारः अतएवामे वतुल्यविधानमित्यादि संगच्छते येनामेव विधीयते
तेन यस्योपपदसंज्ञा विधीयते इति तदर्थात् कर्म्मण्यण् आत्ति त्यादौ कर्म्मणी त्यादिः सोत्री प्रथ
मार्थे सप्तमीधातोरणभवति कर्म्मचोपपदसंज्ञमिति तदर्थः अत्र सत्रेस सप्तमी पदं तदन्तपरं तत्र
स्थं तद्वाच्यं तदाह सप्तम्यन्तोपदइति महासंज्ञयाप्र थमार्थे सप्तमी बलेन च लब्धमर्थमाह तद्वा
चकं पदमिति पदमत्रविभत्यन्तं सम्वकर्त्तर्यौ रित्यादौ सुपीत्यधिकारात् न तत्र कृत्तिकसर्वेन्ते लक्षा
ता अन्यथाउपपदमिति महासंज्ञा त्वध्वायपरत्वन्ताभावात् सन्वेरमेइत्यादौ समासानापत्तिः
समासविधायके उपपदमकृतिकम् स्वन्तायहरुणं सुप्यजातावितितिनो राजदर्शीत्यादौ समासा

नापत्तिः

Digitized by Panjab Digital Library | www.panjabdigilib.org

त इत्याशयेनाह मान्तमव्ययमिति तेन कांडमस्तं कृत्वेत्यत्र नत्वस्तं सिद्धं जलमस्तं गच्छतीति प्राग्री
श्वरादित्यधिकारान्निपातत्वेऽव्ययत्वे च विभक्तिलुक् स्यादिति भावः सप्तमीनिर्देशोपि तस्मिन्नेवेति प
रिभाषा न प्रवर्त्तते क्रियायोग इत्यनुवृत्तेः एतेनानुत्याव्यवधानात्कथमत्र प्राप्तिरित्यपास्तम्
उपाजेत्वाजे शब्दौ एतदन्तौ विभक्तिरूपकौ निपातौ दुर्बलस्य बलाधाने वर्त्तेते व्यर्थे इति च्व्यन्तेन पूर्व
विप्रतिषेधेन नित्यं वत्संज्ञेति भाष्ये स्पष्टं इदमाधिकमत एव नमस्करोतीत्यादौ च गत्यभावेप्यने
न गतित्वमाह अन्ये तु स ऊर्यादौ स्वरादौ चेति विकल्पफलसिद्धिमाह मान्तत्वमिति मति।
सान्नियोगेन लवणमुष्णं शीतमुदकमार्द्रमिति पञ्चानामित्यर्थः उरसि मनसीति विभक्तिप्र
तिरूपकौ निपातौ मध्येपदे विभाषा कृञि नित्यमत्याधाने इति चानुवर्त्तते तत्र चैषामेदन्तत्वं नि
पात्यते सप्तमीं तु न मध्ये पदे कृत्वा च निपत्येति च प्रत्ययेन तस्या अनन्वितत्वात् अनत्याधान इति किं।
हस्तिनः पदे कृत्वा शिरः शेते नित्यं ह० उदाहरणे तत्पुरुषे कृतीत्यलुक् उपयमने किं हस्ते कृ
त्वा कार्षापणं गतः प्राध्वं इदं मान्तमव्ययं बन्धनेनानुकूल्ये वर्त्तते कृतीत्येव जीविको०
जीवनोपायः उपनिषदिति क्रियायोगाभावाद्गतित्वं अत्रेति अव्यवस्थया समासप्राप्तौ

३

ल०शे०

३०३

धात्वर्थनिर्देशेण्वुल् दासीश्लोकवाचिनस्तु न ग्रहणं व्याख्यानात् इति भावः अनितिपरं किमि-
तिते श्राकृ धातोरित्यस्य सञ्ज्ञानियमार्थमिति भावः प्रयोगनियमार्थत्वाभिप्रायेणोक्तं ना-
ष्पन्नत्वात्तु सञ्ज्ञानियमार्थत्वमाश्रित्येदं छन्दसि परेपि व्यवहिताश्चेति सूत्रद्वयं चरितार्थमिति त्वाप्ता ततं
अन्तवस्तु कटं करोति ग्रामं गच्छति त्यादिभाष्य प्रयोगः सं गच्छते कटं सुकरोती त्यादि त्वनभि-
धानेन बालोपि मन्त्रपक्षेत्वाप्तुतीति एतदुद्देशबलाभावे प्रयोगनियमपक्षात्प्रदेवं प्रयोगसिद्धि
रेवस्यादिति भावः अनितिपर इति चात्र बहुव्रीहिरनितावितिवक्तव्ये पर्युदासान्न अनुकरण-
कृतावनितिपारत्वविवक्षार्थं तन्नञ्जो बहुवीहाविति चुत्वे साक्षाद्व्यवहितेपि निषेधसिद्धिरेतदुला-
देवेश्राणात्पादावपि गत्याकृ विनिर्देशः एतत्प्रकरणे आकृतिपरतापांतस्य नात्पर्ययग्राहकत्वा
देतएवाभ्युद्धतीत्यादावुभयोः पूर्वं प्रयोग इति दिक् आदरानाः अनादर इति बहुव्रीहिरतः पा
त्वेऽपि नयतद्भूतकन्येत्यादिसिद्धं न त्वसुरुषेपि यदा त्रादराश्र सक्तिस्तदीयानादर एव स्याद् दुष्कर
सत्कृत्येत्यादौ केवलमनसीशब्दस्वरूपे इति विशेष्यं कलोहत्येति परावरयोगे चेति क्त्वा पूर्वो
अपवरोमयवरोपत्येत्यत्युदाहरणं कृप्योगे एव वा निवमेपि नाभावात् अव्ययपदमनुवर्त्त

३०३

Digitized by Panjab Digital Library | www.panjabdigilib.org

मासेऽनेकधेत्येव स्यात् अत आह नञ्शब्देनेति एकशेषः स्यादिति भावः ततो धात्वकारे ऽकारोऽने
कस्य ऽव्ययत्वप्रतीतेः एवमेव नभ्रेट् नाराच नान्तरीयकादयः साधवः शत्रन्त इति पातेः
क्विपि निपातनान्नाचुगित्तुभेव नभ्राणनपादित्यत्र समेववृत्तिः नासत्या इत्यन्तानि दृश्यक्रपदानि नि
पात्यन्त इत्यर्थः समासे हि नञो नासत्येति स्यात् नासत्या इति बहुवचनं वैचित्र्यार्थं ननु ब
हुवचनान्तस्यैव साधुत्वार्थं नासत्यावश्विनौ दस्रावित्यमरविरोधात् अश्विनोश्चापि साधु
त्वेनान्यत्र नसत्य इत्येवेति हरदत्तः नमुचिशब्देऽप्यौणादिकः किः प्रत्ययः क्षीयतेरिति प
ठित्वा सूत्रे तापामिति दिवादेस्तस्यां कृतिगणत्वात् क्षिपतेरिति क्वचित्पाठः क्षिणिवा सगत्योः
तुनादिः एष नञ्समासः पूर्वपदप्रकृतिस्वरार्थः निषेधार्थकत्वेऽन्यादेः तत एव भावाच्च
कुगति कुशब्दः पापार्थो व्ययमेवात्र गत्यादिसाहचर्यात् तेनाव्ययपूर्वपदप्रकृतिस्वरः स
मर्थेनेति समर्थपदं तत्तीयपाविपरिणम्यते इति भावः ऊर्यादिच्चि डाच इति उपसर्गा इत्यत
स्तदनुवर्त्तते अत एव सञ्ज्ञाविधावपि द्विडाजन्तः तदन्तविधिः उपादयो निपातास्तथा ते
निपातास्सन्तो क्रियायोगे गति सञ्ज्ञाः इत्यर्थः कारिकाक्रियेति मध्ये दानालेतिपदं सर्वं पेन्

Digitized by Panjab Digital Library | www.panjabdigilib.org

पितः सन्देह इति भेदेनारोपज्ञानात्तदत्यन्ताभावप्रतीतिः किंचाव्ययीभावशब्देन यो घटकतया सू
त्रगृहीताव्ययीभावः सूत्रगृहीताव्ययेनाव्ययमितिसमासाभावस्यतत्र सूत्रे उपपादितत्वात्
अत्रचेदं भाष्यमप्यमानं असंहितमित्यत्र सन्धानं संहितमिति भाववक्तः आरोपितसन्धानं अ
रोपितः परः सन्निकर्ष इत्यर्थः तदभावात्संहितासंज्ञा न प्राप्नोतीत्यर्थ इति न तदसङ्गतिः संहित
शब्दः परः सन्निकर्षः इति सूत्रबलात् स्त्रीलिङ्गो वार्तिकप्रामाण्यात् क्लीबोपि अतएव संहित

ता०

वदिति प्रातिशाख्येत भाष्ययोः प्रयुक्तं अतएव परः सन्निकर्षः संहितश्चेद्द्रुतायामसंहित
मितिवार्तिकं परः सन्निकर्षः संहिता चेद्द्रुतायामसौ संहितासंज्ञा न प्राप्नोति इति शेषः पूर
रोन व्याख्यापद्रुतायामेव परः सन्निकर्षो नाद्रुतायामित्यनेनासंहितमित्यस्य शोर्थो तो हेतु
त्वेन व्याख्यानाभाष्येन प्राप्नोतीत्यंशस्यतथ्याख्यामत्वेहि व्यसामर्थ्यात्समासापत्तिः ।
त्वद्रीत्यागृहीतासंज्ञाभावः प्राप्नोतीत्येवं व्यवदेतत् वार्तिककर्तीहेत्वकथनेनन्यूनताचेस्या
हुः प्रसङ्गादाह नञ्ब्रोत्वलोपस्तिङीति तिङन्तेनसमासाभावात्प्राप्नोवचनं अपचसीत्यस्य
कुत्सितं पचसीत्यर्थः अतएवनन्समानार्थोऽशब्दोप्यपेक्षप्रामाणिक इति बोध्यं नञास

Digitized by Panjab Digital Library | www.panjabdigilib.org

दौ हेमन्त्वाद्याश्रयगतलिङ्गसङ्ख्यो ऽसङ्ग इति कैयटोक्तं मपास्तं अभावे नञिति योगि
नो विस्त्रता नाद्याश्रयतो न तस्याव्याश्रयत्वात्तद्घटितसमासघटके नोपस्थित्याच्च तस्ये
वाश्रयस्याग्रहतो ऽनौचित्यं अन्यथा तद्दोषदृष्टितपक्षोर्ध्वमाश्रितेऽपि पक्षे तद्दोषानुद्धृतौ
भाष्यस्य निर्दुष्टतापत्तिः एतत्समकक्षतयाथवा पुनरस्तूत्तरपदार्थप्रधान इत्युक्ते
रसंगतिश्च त्वन्नीत्याहि अस्तु तर्ह्युत्तरपदार्थैकमुच्चितं एतत्पक्षद्वयेप्यतेकमित्यादा
वेकवचनासिद्धि वक्ष्यमाणमेनत्तिन्निधायोत्तरपदार्थप्रधानत्वं सिद्धान्तितं तत्पुरु
षस्योत्सर्गतस्तत्प्रधानत्वाच्च अत्र पूर्वपदार्थप्रधानत्वपक्षे पवादत्वेनाव्ययीभावा
स्यबाधनात् नचाव्ययीभावाभावो वश्यं स्वीकार्यः अन्यथाव्ययीभावसिद्धस्य पदस्य
लोऽनुपन्यासेन भाष्यस्य न्यूनतापत्तिः तस्मादत्यन्ताभावार्थकनञः क्रियादिप्रति
योगिकाभावबोधकत्वेनोत्तरपदार्थेनान्वयादसामर्थ्येन नाव्ययीभावः माक्षिक
मित्यादौ न सन्देहः त्यादौ सन्देहस्य गुणत्वेन भवत्येव तदभावबोधो नञा एतदेवा
भिप्रेत्य भाष्ये उक्तं अमन्यापेक्षिपाउलौ ततः प्रतिषेधतीति अमनेहः त्यादौ चात्र।

Digitized by Panjab Digital Library | www.panjabdigilib.org

ल०श्रे०
३०१

न्तिकं कृताभिन्नायां मध्या विलम्बितावृत्तौ संहिताभाव इति तदर्थः परे तु भाष्यं नञ्तत्पु
रुषोऽन्यपदार्थप्रधानः उत्तरपदस्य धर्मिपरतया न विधीयते यथाब्राह्मणः यस्मिन् सो ब्राह्म
णाः बहुव्रीहिस्तु तस्य धर्मिपरत्वे च तिनार्थः अत एव नञोऽस्त्यर्थानामुत्तरपदलोपश्चेत्यने
कमिति सूत्रस्थमन्यार्थिकं संगच्छते एतेन नत्वे अपवादत्वाद्ययं बहुव्रीहेर्बाधकः स्यादिति।
कोऽयं टीका मया पालं असइत्यादौ सुबादिकार्यं न्तु एतत्वादेः सुलोपोऽकोरनञ्समास इति
ज्ञापकात् सिद्धं अत्र पक्षेऽवः वर्षहिमना इत्यादौ विशेष्यगतलिङ्गवचनापत्तिर्दोष उक्तः
तत्रयद्यपि लिङ्गदोषो। लिङ्गमशिष्यं लोकाश्रयत्वादिति परिहर्तुं शक्यते तथापि वचन
दोषः स्थितः ततः पूर्वपदार्थप्रधानस्तर्हि भविष्यति अत्रापि पक्षे असइत्यादि सिद्धेः प्राग
वदेव न च पूर्वपदस्याव्ययत्वेन तदर्थप्रधानस्याव्ययलिङ्गसङ्ख्याभ्यां कथं योग इति बाच्यं
शब्दशक्तिस्वभावाद्वाक्येन नञो सत्त्वभूतार्थाभिधायित्वेपि समासे सत्त्वभूतार्थाभिधायि
त्वेन तद्योगसम्भवात् यद्वा गुणवचनानामाश्रयतो लिङ्गादिवत् समासार्थः प्रतियो
गितयापदव्याप्रितस्तस्य लिङ्गादि समासस्य भविष्यति तेनात्र पक्षेऽवर्षहिमना इत्या

३०१

Digitized by Panjab Digital Library | www.panjabdigilib.org

द्वित्वे बहुव्रीहिवज्ञावे पि नानेन लोपः उत्तरपदशब्दस्य लुप्तसमासचरमावयवे एव रूढत्वे
रित्याहुः तस्मान्नुड् नञो नुडभावापत्ता कं नासत्यपो नलोपाभावे तद्वारणाय चेतस्मा
दिति नतो व्याख्यानाच्चाचीति सप्तमी षष्ठ्यर्थे सप्तमी निर्दिष्टस्तु यस्मिन्विधिरिति परिभाषा
प्रवृत्तये तदाह अजादेरिति ननु तुक् तु नकृतः ङमुट्प्रसङ्गात् अनश्व इति आरोपि
तोऽश्व इति बोधः नञ् द्योतकः तत्र तादात्म्यारोपस्य भेदसादृश्ययोः सतोरेव सत्वेन सं
सर्गारोपस्य तदभाव एव सत्वे तादात्म्यारोपितत्वबोधे सादृश्याभावादीनामर्थतो बोध इति नाब्रा
ह्मणपदात्त्रोष्ट्रादिप्रतीतिरित्यन्यत्र विस्तरः अघटो भवि इति तत्राप्यारोपितो घट इत्येवं बो
धः भेदेन तदारोपबोधे त्वन्ताभाव बोधस्तादात्म्येन तु तदारोपबोधे भेदबोधोऽत्र च प्रकरणा
दिकं नियामकमिति बोध्यं विकल्पत इति पूर्वपदार्थप्राधान्येऽव्ययीभावः उत्तरपदार्थप्राधा
न्ये पमिति दीत्यति भावः न्यायसिद्धेर्थे लिङ्गमप्याह रक्षोहेति असंदेहा इत्यस्य आरोपितः
सन्देह इत्यर्थः सन्देहाभावः प्रयोजनमिति यावत् अव्ययीभावेन द्वन्द्वे हि परवल्लिङ्गे ना सन्दे
हा इत्यनुपपन्नमिति भावः इदं पस्पशायां भाष्य असंहितमिति संहितासंज्ञासूत्रे भाष्यवा

Digitized by Panjab Digital Library | www.panjabdigilib.org

इहपाठः एहीडादिषु तिङन्तपूर्वपदोत्तरपदकसमुदायानामित्यर्थः कर्त्तेति उक्तेरि
त्यादिः जहिजोडमित्याभीक्ष्ण्ये पचाहसजहिजोडः चिन्मात्रमिति अत्रानुनासिक
नित्यत्वान्निपातनात् एवार्थमात्रशेषेनात्रसमासः मयूरव्यंसकादयश्चेति चकार एव
कारार्थः तेन एषां समासान्तरघटकतानेति परमो मयूरव्यंसक इत्याद्येव इष्यते इति
अकृतेत्यस्य स्थाने इदं तदाह ईषदकृतमिति नञ् नकारो निषेधार्थकनशब्देन समासे
तत्पुरुषत्वाभावापत्तेर्नैकधेत्यादौ पूर्वपदप्रकृतिस्वरो न अत एव नलोपं वारयितुं लोप
विधायके नकारोच्चारणं प्रसिद्धतरत्वान्नञ्ञावव्ययं न तु स्त्रीपुंसाभ्यां नञ्स्नञौ येतु नेत्यव्ययं ने
च्छन्ति अत एव नलोपो नञ इति सूत्रे नञः सानुबन्धकस्य ग्रहणमित्यर्थं नस्येत्येव सिद्धे न
च प्रकृतसूत्रे दोषः सानुबन्धकत्वात् अव्ययेष्वपि नेत्येव पाठ इत्याशयः यथा मनपु
त्र इत्येतद्वारणार्थं तु सानुबन्धकः पठित इति भाष्योक्तं संगच्छते इति वदन्ति चैतेषामुभय
त्रापि नकारः स्पष्टार्थः नैकधेत्यादिना नाशीयकमिति च पृषोदरादित्वात्साधु। नलोपोऽत्र
जो। शिति सिद्धे लोपवचनं साकच्कार्थम् तेनाकज्ञालका इत्यादि सिद्धमित्येके नने त्यादौ

Digitized by Panjab Digital Library | www.panjabdigilib.org

धारयेत्किं कडारपुरुषको ग्रामः एतदेवेति एतदपीत्यर्थः युवाखलतीति सूत्रे जातीय
हणस्याप्रज्ञापकत्वात् चतुष्पादो जातिग्रहणं कर्त्तव्यमितिवार्त्तिकलब्धमर्थमाह जा
तिवाचिनइति मयूरव्यंसकइति केचित्तु मयूरइव व्यंसकइत्यर्थः उपमानसमासाप
वादोयं प्रतिपक्षे क्लीपमानेन समासविषयक पूर्वपदप्रकृतिस्वराभावायेत्याहुः उ
च्चावचमिति उच्चावचादेशोत्र उच्चनीचमित्यर्थः इदमित्यन्ये निश्चितप्रचितयोर्नि
श्चमचादेशः एतदन्तर्गणत्वात्कृत्याभ्याह आख्यातमिति क्रियाप्रधानमित्यर्थः अ
श्नीहीडादपइत्यतोन्यपदार्थइत्यनुवर्त्तते गणेतस्यपरिभाषणात् इहत्यसातत्यत्वा
र्थमानान्तस्यधर्मपिंतुक्रमेणपाठस्तदाह पचाभिधीयतेइति अश्नीतपिबते
ति अन्यपदार्थेस्य क्रीडादिरूपात्वेन स्त्रीत्वात्समासत्वेन प्रातिपदिकत्वाच्चपत· खाद
तमोदतेति मोदन्तामित्यस्यस्थानेमोदतेत्यादेशः एऽहीडादपइति लडुत्तमपुरुषे
कवचनस्यइडादेशः एहिपवमित्यत्रपोमीत्यस्यपवादेशः उद्धरकोष्ठादिति· उद्धरो
त्सृजेतिविग्रहः उत्सृजेत्यस्यविवरणं देहीतिकोष्ठादिति तदुद्धरेत्यस्याकाङ्क्षापूरणाय

Digitized by Panjab Digital Library | www.panjabdigilib.org

सि॰२ शे॰ ०

२९९

पूर्व इत्यादौ षष्ठीसमासो बोध्यः यद्वा बाहुलकादेतद्विषये सन्नाहदित्यस्यैव प्रव
त्तिः सामर्थ्यादिति पूर्वनिपातस्तोभयत्रापि समत्वादिति भावः जातिभिन्नावाचकेन
समासे हि पूर्वनिपातानियमे प्राप्ते तन्नियमार्थमिदं सार्थकमिति अन्नान्यत्वे त्यत
यर्थस्यादिति तत्सामर्थ्याद्विशेषणसमासबाध इति तात्पर्यम् इदमाचामनुतेषे
न पदेनु अजासेति उक्तार्थस्य स्पष्टतया लाभायेवात एव कुरु नार्हपतेति सूत्रभाष्यो
दाहृते पटयकम्बलः पटयहस्तीत्यत्र विशेषणेनेति समाससिद्धिः भोज्य औदन इ
त्यत्रासमासस्येष्टत्वे सबाहुलकाद्बोध्य इत्याहुः समानाधिकरणेनेति वर्णवाचिना
ताध्येन वर्णवाचि समस्यते इत्यर्थः सारङ्गः शिवत्रः कृष्णशब्दस्तद्वयके लाक्षणि
क इति सामानाधिकरण्यं विशेषणेनेत्येव सिद्धे इदमर्थम् नच वर्णो वर्णेषु नेतर
ति स्वरविधायके प्रतिपदोक्तस्यास्यैव ग्रहणार्थमिदं अत एव सारङ्गस्यावयवः कृष्णः
सारङ्ग कृष्ण इत्यत्र तेन पूर्वपदप्रकृतिस्वरो नेति वाच्यम् कर्मधारयस्वरप्रकरणे तत्
पाठेन सिद्धेरितिदिक् बहुवचननिर्देशा[illegible] इति कर्म

२९९

Digitized by Panjab Digital Library | www.panjabdigilib.org

महानवमीति पुंवत्वे आत्मा तद्रूपात्वं तस्याकोपधादेरिति एते न निषेधप्रकरणात्
पूर्वमेतत्पाठं पुंवदिति च न कार्य्यमित्यपास्तं मध्येपवादाः इति न्यायेन परनिषेधबाधा
नापत्तेः न कोपधायाः सम्ज्ञापूरण्योश्च वृद्धिनिमित्तस्य तः स्वाङ्गाच्चेति जातेश्चेति प
च्चसूत्रेष्वत्यर्थः विद्युन्मालाकत्वेरूपयुक्तिमालकस्य निषेधाप्रवृत्तीयां स इत्यस्य तु न वि
षयः तद्बाधविना कर्मधारयांशे स्वविधेश्चारितार्थ्यात् बाधसामान्यचिन्तया चवत।
र्वबाधः इभी पोटेत्यादिविग्रहः जातेः पूर्वनिपातार्थं पोटायुवतीति सूत्रे प्रशंसा च जातिरि
ति वर्त्तते ननु मतल्लिकादिः स्त्रीत्वात् प्रश—स्ता इत्यर्थो न युक्तः प्रशस्ता गौरित्यर्थ इति पाठ
उत्पादेः पुंस्त्वात् प्रकाण्डस्य क्लीबत्वाद्युक्तोऽतमाह नतु विशेष्यमिति प्राइति युवत्याम्
वेति जरत्यां युवती धर्मीति येन युवतीपुरुषस्य विशेषणत्वेन विशेषणानामिति समासे वि
पूर्वनिपातनियमलिङ्गा जरतीग्रहणस्य वैयर्थ्यमेव स्यादिति भावः कृत्यतुल्याख्या
आत्मस्यात्र कृत्यप्रत्ययान्ताः तुल्यवाचकाश्च । जातिभिन्नवाचकेन न समस्यन्ते इत्यर्थः
तुल्यमहतिमित्यादौ पाल्यादश्ने नैव समासः पूर्वनिपातनियमार्थमिदं न तद्रूपस्य परम

Digitized by Panjab Digital Library | www.panjabdigilib.org

सि॰ को॰

२९८

पिमुत्वार्थेशाकप्रियपार्थिवइत्यादिनिदर्शनार्थमिदं॰ सन्महत्॰ महापापपतितित्यादौ कृना
भावेपिविशेषणसमासोबाध्यः अत्रापिमहत्वेनपापस्यपतितत्वगुणाशोक्तिर्नास्त्येवेत्यन्ये।
•वृन्दारकनाग॰ वृन्दारकशब्दोदेवजातिवाची द्वितीयोगजसर्पवाची अन्त्यागजवाची
तेषामुपमानत्वेनपूजावाचित्वादाह व्याघ्रादेरिति सामान्येति गोकुञ्जर॰ स्थलइत्यादौ
कतरकतमौ॰ द्वयोरेकस्यवाबहूनांमिति सूत्रयोरुपाधिस्त्वयाख्यानात् कतमोभवत्वेप।
तिउत्तइत्यादौसमासाभावायजातिपरिप्रश्नइति यथान्यासेपि कतरत्यर्थेतत्र किराजेति॰।
किमः क्षेपइतिसमासान्तनिषेधः क्षेपेकिं कोराजापाटलिपुत्रे तत्पुरुषः तत्पुरुषाधि
कारेस्तत्करणेत्वेकसंज्ञाधिकारात्तस्यात्रनवाबाधः स्यादितिवाध्यः क्षेपेकिं कोराजा
पाटलिपुत्रे॰ तत्पुरुषः समानाधिकरणेपदावयवकइत्यर्थोत्रव्याख्यानात् पुंवत्कर्मधा
रयेपाः पुंवद्भाषितपुंस्कादनूङ् इत्यनुवर्त्तते अपूरणीप्रियादिष्विति तु नानुवर्त्तते व्याख्या
नान्नदाह पूरणीप्रियादि एतेनाश्रियाः पुंवत्ताभित्याद्विभीतिसिद्धेदम्यस्यैवनित्यपात्वम्॥

२९८

Digitized by Panjab Digital Library | www.panjabdigilib.org

मन्यथाकर्म्मधारयेपूर्वनिपातानियमेनतृतीयासमासेचतन्नियमेतदसङ्गतिः स्पष्टैव द्वयो
रप्यवयवयोरवृत्तेर्वैनियमः एवंचसोमपाजिडित्यइत्येवोचितं डित्यसोमपाजीत्याद्यसाध्वे
व॰ कुभ्रवश्चः खञ्जकुब्जइत्यादौविशेषणतापात्रपिशाचबोध्येमानाद्बोध्यविशेषइतिदि
क्॰ पूर्वापर बहुलग्रहणात्तुवस्त्यात्क्रियाशब्दैः पाचकादिभिरेषांनसमासइतिसमर्थसूत्रे
भाष्ये एवंचापराध्यापकइत्युदाहरणंचिन्त्यं अपरमीमांसकइत्याद्युचितं तमुदाहरणं भत्त्व
भातीत्यादौविशेषणमितितुप्रवर्त्ततएवेत्यपितत्रैवभाष्येस्पष्टं स्वार्थेति तेनपुलीस्थाना

ना२

मेवदत्तादीकरणोक्त्ये नसमासः स्वन्तानान्तुपरत्वात्कुगतादिनित्यसमासः कृतादिरा
कृतिगणः केनननञ् केनेतिविभक्तिविपरिणामेनानन्वितेऽत्रापिसम्बध्यते तेनोभयो
क्तान्तत्वेएकप्रकृतिकत्वेएवचायंसमासः नञ्ग्रहणंचक्रियागुणनासमासेद्योतकत्वो
पलक्षणं तेनकृताकृतादिपकृतादिसंग्रहः पूर्वनिपातनियमार्थञ्चेदं देवब्राह्मणारति देवपूज
कोब्राह्मणइतिवृत्तिः यद्यपिपूर्वपदस्यतत्त्वदर्थेलक्षणायांविशेषणतासमासेनसिद्धंतथा

Digitized by Panjab Digital Library | www.panjabdigilib.org

उपात्तधर्म्मसत्वेतेनैवसाम्यप्रतीतेरनुभवात्सकलाकलः पुरुषचन्द्रोदयतेइत्यादावुपात्तधर्म्मातिरिक्त
धर्म्मस्यसाम्यप्रयोजकस्याभावाच्चेतिदिक् पुरुषव्याघ्रइतिउपमानशब्दव्याघ्रादिभिन्नाः शूराः पुरुष
उपमेयइतिबोधः व्याघ्रएवशूरइति नचशूरत्वापेक्षत्वेनासामर्थ्यादत्रसमासाप्राप्तिः प्रधान
स्यसापेक्षत्वेप्यसामर्थ्याभावात् विशेषणमुपमानन्तु नित्यसापेक्षमितितत्सापेक्षत्वेनदोषः
साधारणधर्म्मवत्त्वेनपरिच्छेदकत्वंतत्त्वं तच्चतत्त्वेनज्ञातस्यैव यद्युपमेयत्वंतद्रूपत्वेनपरिच्छेद्यत्वमे
वतथापितस्यतत्त्वमविधेयमेवेति तन्नानित्यानित्यसापेक्षमितिदिक्· विशेषणं· अत्रविषयताबि
शेषरूपंविशेषणं अत्रविषयताविशेषरूपविशेषणत्वादिग्रह्यते व्याख्यानात् वस्तोर्भेदकमेध
प्रसिद्धाभ्यामपितदेव व्यावर्त्तकत्वरूपंतच्चनीलसामान्योपक्रमेउत्पलस्याप्यस्तीत्यव्यावर्त्तकं अत्र
जातिसत्त्वयोर्गुणक्रियाभ्यांसमभिव्याहारेविशेष्यतैवगुणयोः क्रिययोः गुणक्रिययोर्व्वानियम
एवव्याप्यव्यापकभावापन्नजात्योरप्येवंयथाम्रतरुस्तवयोः नत्वापन्नयोस्तुव्यापकस्यविशेष्य
तैव यथाशिंशपावृक्षइति यत्रैकोवयवशब्दः परःसमुदायशब्दः तत्रावयवस्यविशेषणता
त्वमेव अतएववर्त्तीवर्त्तीनेतिसूत्रेभाष्यकृताऽ· रत्नगुणाहत्यतृतीयासमासेनेदंसिद्धमित्युक्त

Digitized by Panjab Digital Library | www.panjabdigilib.org

नविभक्तिकत्वनियमः समासेत्वस्यार्थस्य समासशक्तिबलाद्बोधः उपमानानीत्यस्योपमानत्वेन
बोधकानीत्यर्थः अन्यथा ससम्बन्धिकत्वात्सामान्यवचनैरित्येवतेन समासलाभे तद्वैयर्थ्यं स्पष्टमेव
एवमुत्तरसूत्रे उपमितमित्यस्योपमेयत्वेन बोधकमित्यर्थकं एवमेव भाष्यस्वरस इत्याहुः उपमितं
उपमेयत्वमुपमानपरिच्छेद्यत्वं उपमानोपमेययोः समभिव्याहारे उपमानस्य विशेषणत्वेव
तदाह विशेष्यस्येति एतच्चोपमितमित्येतत्स्वारस्यात् तस्योपमानेनित्यमाकाङ्क्षत्वाच्च
व्याघ्रादीनामुपमानत्वे एव उभयोः समानलिङ्गत्वे एव च प्रवर्त्तते अत एव परवल्लिङ्गमिति
सूत्रे द्वन्द्वैकदेशिनोरिति भाष्ये सङ्कलत्वात् पुरुषव्याघ्र हतां प्रत्याख्याते अन्यथाऽस्य पूर्वपदार्थप्रधानस्य
भाष्यादिरित्यादौ उपमानपरवल्लिङ्गविध्यर्थेन पुरुषव्याघ्र हतास्यावरूपकत्वेन तदसंगतिः
स्पष्टैव भाष्याद्भिः क्षतिर्गम्भीर इत्यत्र सामान्यधर्माप्रयोगोपि लिङ्गभेदेपि मयूरव्यंसकादित्वा
त्सिद्धः सचराजा नारमित्यादौ पूर्वपदार्थप्रधानोपि द्वन्द्वः परवल्लिङ्गतापि तत्रपाठेनैव विशेषण
समासेन तान सिद्धिरुपमानस्य विशेषणतया पूर्वनिपातापत्तेः एवञ्च भाष्याद्भिरित्यादौ रूपक
मेव यत्तु अनुप्रयोग धर्मेण साम्य विवक्षणादनेन समास इति तन्न एव उपमानवैयर्थ्यापत्तेः

Digitized by Panjab Digital Library | www.panjabdigilib.org

स्या

षस्य समासान्तष्टजित्यर्थस्तत्फलितमाह गोन्तादिति नत्विति तेन पञ्चभिर्गोभिः क्रीतः पञ्चगुरि
त्यत्र न एकार्थीत्यत्रापि समाहारे द्विगुः एकमपरं काम्बितरूपलोदद दनेकं मन्यसे इति तत्राते
पितबहुत्वाख्यपसमाहारसत्वात् एकभिक्षीतितुनानभिधानात् द्विगुरेकवचनमिति कर्त्तीति तु
द सामान्येन पुंसकं इदंस्त्रं समाहारद्विगावेव· अनुवादत्वे लाघवात्· अत एव पञ्चपूलीनामे
कशेषेन· अनुवादफलन्तु द्विगुवाच्यस्य समाहार एवेतरेतरयोगपदे नोच्यते· स नपुंसकमित्य
त्रतच्छब्देन समाहारद्विगोर्द्वन्द्वस्य च परामर्शस्तदाह स नपुंसकमितीति· कुत्सितानि· वर्त्तमाने
क्तो व्याख्यानात् कुत्सनैरितिकरणेल्युट् डुईरूदोडुष कर्म्मकर्त्तरि क्तः लाक्षणिकमिति· अतए
व समानाधिकरणाधिकारस्याबाधः येनेव तत्त्वनोरंसुवनि धर्म्मत्वेन परिच्छिद्यते तदुपमानं
सामान्यवचनत्वं चोपमानोपमेयसाधारणो धर्म्मो विशिष्टोपमेयवचनत्वं येन तु स्वसमभि
व्याहृतनिष्ठमुपमानत्वमिवादिद्योत्यं साधारणधर्म्मसम्बन्धस्योभयत्र बोध्येतास्पेव्याह
कतावचोपमानस्यामयनाभिन्नः श्यामउपमेयइतिबोधः अत एवोपमानोपमेययोः समा

Digitized by Panjab Digital Library | www.panjabdigilib.org

णाविभाषयेति भावः तत्तस्तु पक्षे टजभावे पञ्चगोधनः इत्याद्यपि स्यादिति भावः स्पष्टं चेदं भाष्ये
एवं चोभयत्रापि नित्यत्वमात्रबोधकम्वार्त्तिकमिति बोध्यम् अत एवैतद्वार्त्तिकमुक्त्वा किम्प्रयोज
नं समुदायपक्षस्तावदयथा नो कदाचिदप्यवृत्तिर्मा भूदित्येवं प्रयोजनमुक्तं द्वन्द्वस्तु बहुव्रीह्यव्ययपदोत्त
रपद एव· वाक्य एव त्रिपद इत्यादौ त्रिपदशब्देनोभयोस्सामानाधिकरण्ये न द्वन्द्वोऽव्ययोत्तरपदे· च
२ तुल्यान्वर्थोत्तरपोत नेष्टोऽज्ञातादिति प्रयोगेण तदनभिधानात्· पदयोर्निष्कृष्यैकार्थीभावा।
भावेपि समासादिप्रवृत्तिरस्तीति निरूपितम् एवन्तयोर्निष्कृष्य सामानाधिकरण्याभावेपि यथा
कथंचित्सामानाधिकरण्यमादायैव तत्प्रवृत्तिरत एव पञ्चिमस्थाला। त्रिपदात्यादौ पुंवत्वसि
द्धिः पुंवत्वे यथा कथंचित्सामानाधिकरण्यं नियामकम् समासे निष्कृष्यैवेत्यत्र न विनिगम
कं अन्यथा त्वन्यपक्षे एकविंशतिर्भरद्वाजा वंश्याः त्रिवाचस्पत्यादि बहुव्रीहौ अव्ययीभावादि
तु नानभिधानात् वस्तुतो नित्यत्वांशोऽन्यायसिद्धः अपाणामेकार्थीभावे द्वयोर्व्यपेक्षायादुष्
यपादत्वादित्यन्यत्र विस्तरः गोरत· तद्धितलुकीति तत्राह इत्यतष्टजानुवर्त्तते· गोन्तस्य तत्पुरु

Digitized by Panjab Digital Library | www.panjabdigilib.org

स्याः श्रोत्वं नियमार्थमिति विशेषणमित्यवसिद्धे नियमोयमितिभावः विशेषणमित्यस्यैवार्थं नियमः तेनपञ्चगुपञ्चगवमितिचसिध्यति पूर्वसूत्रमित्यादौसंख्यालक्षणाभावोपिकालवाचकत्वात्समासः एवं देशवाचकेनापीतिबोध्यं॰ तद्धितार्थो॰ वैषयिके आधारेसप्तमी विषयत्वंचानेकप्रकारकं दित्याह विषयेइत्यादि तद्धितार्थेवाच्यइतितुनोक्तं पांचनापितिरित्यादौसमासेनोक्तत्वात्तद्धितानापत्तेः अतएवद्विगोर्लुगनपत्ये इतिसूत्रेद्विगोर्लुगितिबलवत्वपरिभाषाप्रवृत्तिः इत्यर्थः इति भावः गहणं स्पष्टार्थम् मत्वर्थेनायमनभिधानात् तदर्थपरेणबहुव्रीहिणास्यबाधाच्च समाहारः समूहः भावघञन्तत्वात् अतएवपञ्चानांवेदानामितिनियमेनषष्ठ्यामेकविभक्तत्वेनोपसर्जनत्वात् कस्वेइद न्तद्विगुत्वात्पञ्चवेदी त्यत्रङीप् सचावयवाभिन्नोबुद्धिकल्पितभेदवानपिसमूहस्यतद्धितार्थेलविसामर्थ्यात्कस्यलुकिपञ्चगवमित्यत्रगोरतद्धितलुकीतिटजन्स्यात् पञ्चकुमारीरित्यादौलुक् तद्धितलुकीतिस्त्रीप्रत्ययलुक्स्यादितिपृथग्ग्रहणं तत्सामर्थ्यादेवात्रवाच्यइतिव्याख्यातम्।
उदात्तइति सतिशिष्टत्वात्तत्पुरुषप्रयुक्तसमांसान्तोदात्तत्वेनेतिभावः विकल्पप्राप्तेइति॰ म

Digitized by Panjab Digital Library | www.panjabdigilib.org

त्यलुक्: अपेसमासोऽप्यत्र त्यपान्तेनैवाभिधानत्वाभावात् । तन्नेत्येतत्सम्पन्नमिति । अधि
करणबाधायाधिकरणेऽशक्तिप्रधादपि सप्तमीति वक्तिकृत् । तेन पूर्वपदअर्ध्नित्स्वरसिद्धिः अव्ययत्वे
नञ्नसः अव्ययेन नञ्कुनिपातानामिति परिगणनात् अवतश्चेन कुत्रेति चापलादिति भावम्
हृग्रहणं परिभाषयानुकूलस्थितशब्देन समासः तत्पुरुषे कृतीत्यलुक् अव्ययस्थितत्वप्रति
पत्त्यात्रनिन्दा गेहेनर्दीति । नर्म्मदशब्दस्माल्लिनिः तत्पुरुषे कृतीत्यलुक् सर्वत्र समासान्तरे
इति समासप्रकरणादिति भावः तेन पात्रसमितिरित्यादि भवत्येव समासश्चानन्तरत्वात्कर्म्म
धारय एवेत्याहुः प्रवेशनेति तेन परमाः पात्रसमिताइत्येव समितेति निरनुस्वारं पूर्वकालैक
अत्र पूर्वकालशब्दोऽर्थपरो न्यवबहुस्वरूपपरः पूर्वः कालो यस्य तद्वाचकः शब्दः प्रस्यास्त्यापर
कालवाचकेन समस्यतेऽरत्यर्थः सिद्धपूर्वनिपातेति । एषां विशेषणत्वस्यानेपत्यंपि एषामेवत
त्वार्थमिति भावः । नियमबाधनार्थं चेति । मुख्यार्थपर्यं कैकशब्दस्य तु अत्र सिद्धत्वान्नात्र ग्रहणमि
ति भावः नवशब्दः पुराणसाहचर्य्यान्न तनार्थः जरन्बद्धः समानाधिकरणेनेति किं एक

Digitized by Panjab Digital Library | www.panjabdigilib.org

ल०प्रो०

२९४

इति ग्रहणस्य निर्दिष्टत्वात्त्वापत्तेरस्तु स्याद्वृत्तिविग्रहयोः समानार्थत्वनिर्वाहः मयपक्षपात उभयविषयोग्र
हणउक्तं चेत्युचितम् अन्यथोत्तरपदार्थप्रधानोयं तत्पुरुषस्तेनान्येषूत्तरपदार्थप्रधानेस्सधर्म्मे
णाभवितव्यं अन्यत्र चोत्तरपदेयान्तर्वर्त्तिनी विभक्तिः सेव समासेपि भवति इहतु वाक्ये षष्ठी समा
सेत्र प्रथमा केचित्तु दित्यवाग्राहकेनाप्रातिपदिकेनोक्तत्वेन प्रातिपदिकार्थतयाः शेषत्वान्नषष्ठीत्यु
त्तरं तुल्यमेवेत्याहुः समासज्ञातइत्यादौ मासत्वेनैकमासव्यक्तिरेवबुध्यतेऽन्यथावच्छेदकत्वेना
स्यात् मासेज्ञातस्येत्याद्यर्थेतु नसमासोऽनभिधानात् उत्तरपदेनेति इदंवार्त्तिकमेतत्सूत्रवि
षयमेव तद्धितार्थेति सूत्रेपाठ्यत द्विषयस्येवभाष्यकृतोदाहरणात् पूर्वत्रत्विति ग्रहज्ञातइत्य
त्रेत्यर्थः अक्षशौण्डइति अधिकरणकारकस्य कर्त्तृकर्म्मद्वाराक्रियान्वया च्छौण्डादिभिस्साम
र्थ्यं आसक्त्यादिक्रियान्तर्भावेण सामर्थ्यमितितु नयुक्तं तदप्रतीतेः सांकाश्यसिद्ध इति संका
शेननिर्वृत्ते बनेतपसासिद्ध इत्यर्थः सांकाश्यनगरे सिद्धोज्ञातइत्यर्थोवा ध्वांक्षेण व्याख्याना
दर्थग्रहणं इवेति तत्र स इव यो गुरुकुलादौ नचिरं तिष्ठति सएवमुच्यते एवं हि निन्दा भवति ऋणग्र
हणमावश्यकोपलक्षणमित्याह आवश्यकेइति तत्फलमाह पूर्वाह्णेगेयंसामेति तत्पुरुषेकृती

Digitized by Panjab Digital Library | www.panjabdigilib.org

पदिकार्थत्वेनाशेषत्वात् परिहृता । अन्यथा मासस्य माना इति विग्रहे तत्प्राधान्यं दर्शितं स्यात् ।
यत्र षष्ठीप्रसक्तिरेव न । षष्ठीति सूत्रेणासिद्धेः इदं सूत्रे जातमासः इत्येतन्निवृत्त्यर्थं तदेव ममापि । का
लाः परिमाणिना समस्यन्ते न तु परिमाणी कालेनेत्यर्थात् । किञ्च मासो जातो यस्येति बहुव्रीहिणा
ऽतीतमाससम्बन्धिजननक्रियाकर्तुरिव तत्सम्बन्धिगमनादिकर्तुरपि मासशब्दस्य प्रतीत्यापत्तिरि
त्यनयो बहुव्रीहेरनभिधानमेव । अत्र विग्रहे वृत्तौ चोभयत्राप्युत्तरपदार्थप्राधान्येन च । विग्रहे पित
त्वे जातात्वषष्ठ्यनुपपत्तिर्विशेषणत्वादेव षष्ठीविधानादिति वाच्यं वाक्यस्य बहुत्वर्थबोधकत्वविव
क्षायां विशेष्यविशेषणभाववैपरीत्येपि पूर्वेणानसंस्काराऽनिवृत्तेः । अन्यथा समासे ज्ञातप्राधान्ये
न विशेषणविभक्तिषष्ठ्यापादनस्य भाष्ये ऽसङ्गत्यापत्तेः । मन्मते न दोषः । विग्रहे तस्यैव प्राधान्यं
पितास्यपीतिवत्समासाद्पितदापादनसम्भवात् । तदुक्तं षष्ठ्येव तत्र मासविशेषणता कसम्बन्ध ।
प्रतीतिवत्समासेपि विशिष्टोत्तरषष्ठ्या तत्सम्भवऽत्याशयात् शब्दस्वभाव एव चात्र व्यत्यासे बीजं
। यत्तु एकार्थीभावबलाद्वृत्तौ विशेष्यविशेषणभावव्यत्यास इति तन्न । एकार्थीभावफलेऽभ्युपगमा
भावऽस्यागलनात् । वृत्तिविग्रहयोः समानार्थत्वभङ्गापत्तेश्च । किम्प्रधानोयं समासः

Digitized by Panjab Digital Library | www.panjabdigilib.org

ति॰ नचभेदविवक्षायांषष्ठीसमासबाधापत्तिरिष्यत एवषष्ठीसमासोऽग्रामार्द्धमित्यादिवत् पि
प्पल्यर्द्धमित्यादिभवितव्यमेवेतिभाष्यात् द्वितीयपारे इति नचात्राश्लेषद्वितीयांतस्यैवा
कारः स्यात् नप्राप्तापन्नयोरितिवाच्यं प्राधान्येनतयोरेवादेशात् ॥ चकारस्यभिन्नक्रमइ
ति[illegible]भावः प्राप्तापन्नेइत्युक्तेसेकारप्रश्लेषः प्रगृह्यत्वेसोत्रत्वान्नेतिभाष्यस्वारसः एकाद
शस्यपूर्वांतत्वेनग्रहणात्प्राप्तादेशेनसमासः ॥ जीविकाशब्दस्यैकविभक्तौत्युपसर्जनत्वात् गो
स्त्रियोरितिह्रस्वेतदन्तादावितिबोध्यं ॥ चबहुव्रीहिरिष्ट एव गतार्थतायारविशेषात् कालाः परि
माणस्यजातइतिषष्ठीसमासेसिद्धेजातमासइदमनिष्टनिवृत्तयेइदम् ॥ यद्यपिबहुव्रीहिणेतदंसि
द्धंजातिकालसुखादिभ्योनाच्छादनात् क्तोवाजातइत्यनेनान्तोदात्तत्वेन स्वरेविशेषाभावात् ॥ जा
तिकालसुखादिभ्यः परनिष्ठेतिवचनात् नजातस्यपूर्वनिपातः तथापिजातवच्छब्देनसमासे[illegible]
समातवानित्यादौवन्तोदात्तार्थमावश्यकमिदमितिकेचित् ॥ परेतु परिच्छेद्यपरिच्छेदक[illegible]
भिव्याहारेपरिच्छेद्यादेवषष्ठीस्वीकारेणमासस्यजातइतिविग्रहस्यतत्रषष्ठीसमासस्यचाव्यु
त्पन्नमाणता अतएवभाष्येउत्तरपदार्थप्रधानत्वेसमासात्षष्ठीमाशङ्क्यसम्बन्धस्यप्राति

Digitized by Panjab Digital Library | www.panjabdigilib.org

तमाह एकत्वेति मध्याह्न इति । तमाहुरिति च अर्द्धाद्धकः इत्यङ्गादेशः अर्द्धं नः. निर्द्देशादेव नपुंस
कत्वे लब्धे नपुंसकग्रहणं सूत्रनिर्द्देशे लिङ्गाविवक्षाज्ञापनार्थं नच समांशवाचिनित्यनपुंसक
ग्रहणार्थं न्यात्. एओङ्. ऐऔच् इतीति सूत्रे एचोर्द्धह्रस्वश्च समे अर्द्धे काराकारयोर्विधानमाशंक्य
नवेदनैव लोकेऽर्द्ध एकारः ऽर्द्ध ओकारो वास्तीति भाष्यप्रयोगात् समांशवाचिनोपि नित्यनपुंसक
त्वाभावात् अवयववाचीतु पुंल्लिङ्ग एव अर्द्धग्रामार्द्ध मित्याद्यपि समप्रविभाग एव स्याद्
पिपल्याः एकविभक्तौ त्युपसर्जनत्वं ह्रस्वत्वं स्यादत आह. एकविभक्ताविति. नन्वेवं पञ्चानां खट्
वानां समाहार इति विग्रहे पञ्चखट्वीति न सिध्येदत आह एकदेशीति. इदं चापत्यं नपुंसकमिति सूत्रेप
ञ्चखट्वीति भाष्योदाहरणात् ज्ञापते निषेधस्त्वाधिक्यति भागार्थकात्प्रत्ययान्तेपि त्वाधिकत्वात्
हरणार्थं इति भाष्ये स्पष्टं पूर्वसूत्रादि विहित एकदेशिसमासः पञ्चखट्वि इति सूत्रस्यमेकदेशि
समासपरं तत्पुरुषग्रहणं च पञ्चखट्वि इति सूत्रे भाष्यप्रत्याख्यातं द्वन्द्वैकदेशिनोरिति व
स्यामिश्रामादिषु चात्राप्तिरेव तदेकदेशिग्रहणमपि न कार्य्यं कथं एकदेशिसमासो नारभ्यते।
अर्द्धपिप्पलीत्यादिस्तु समानाधिकरणसमासः अवयवसमुदायरूपारोपादर्द्धं सा पिप्पली

Digitized by Panjab Digital Library | www.panjabdigilib.org

ल०श्री०

२९२

ति धात्वर्थनिर्देशे ण्वुल् कर्म्मणि षष्ठ्या समासः कर्त्तुः प्रयोगाभावेनोभयत्राप्राप्तावित्यस्याप्राप्तेः
कर्म्मणि चेति निषेधो न शङ्क्यः पर्य्यायार्हर्णोत्पत्तिधिति स्वेकैवेद एतत् · कर्त्तरि चे अत्र साम
र्थ्यात्कर्त्तरीति षष्ठ्या एव विशेषणं भवतः शायिकेति पर्य्यायेति ण्वुच् धात्वर्थनिर्देशे ण्वुल् वा
नित्वं क्री जीविकायां निषेधस्य सिद्धे नित्यग्रहणाच्च विधिरियं दन्तानां लिखितेत्यादौ जीविकायां
त्वेनाभिधानात् क्रीडायां तच्चोसंभवादिति भिन्नत्वाच्चेतस्यानासम्बन्ध इत्याह अकेनेति अके ।
जीविकार्थे इत्यत्राकग्रहणं त्वर्थे ग्रहणावतस्पष्टार्थं · प्रतिपदोक्तत्वेनेतद्धितसमास एवतत्स्व
त्ति सिद्धेः संज्ञायामितीति यद्यप्यत्र धात्वर्थनिर्देश इत्येव सिद्धे संज्ञायामिति त्वधिकारार्थमि
ति वदन्तो वक्ष्यते तथापि तदर्थस्याभावे पि प्रवृत्तिर्न्याय्या संज्ञायां विशेषविहितत्वात् अचारिता
र्थ्यो भावे पि तस्य प्रथमप्रवृत्तिमुख्यारोहणं प्रथमम् अवृत्तौ नियामकत्वमसतीत्यन्यत्र प्रपञ्चितं · संज्ञाया
मिति ण्वुलित्यवपाठः उदाहरणाधिकरण इति तत्त्वे षष्ठीसमासप्रयोगेन तदपाद मेकदेशिस
मासमाह · पूर्वापरेति अवयवित्वं चावयवापेक्षं तथा च कारकापास्थितत्वात् पूर्वादय एवेत्याह
पूर्वादय इति अधिकरणं द्रव्यं एकत्वविशिष्टद्रव्यवर्त्तमानेनावयविवाचकेनेति वाच्यार्थः फलि

२९२

Digitized by Panjab Digital Library | www.panjabdigilib.org

कदेशमाह राज्ञः पाटलिपुत्रकस्य प्रष्टाहमेतदस्ति असामर्थ्यादित्यत्र न भविष्यति उक्तं आश
यउदाहरणं एकदेशमाह· राज्ञः पाटलिपुत्रकस्य प्रष्टाहमेतदस्ति· असामर्थ्यादित्यत्र न भविष्यति
उक्तं आशयउदाहरणबाधकदेशमाह· कथमसामर्थ्यं अष्टैकदेशमाह समानाधिकरणे मत्व
मर्थवदिति उदाहरणबाधकदेशमाह अधात्वभिहितमिति तच्छेषात्सर्पिषः पीयमानस्येत्युदा
हरणमिति उपसर्जनसञ्ज्ञासूत्रस्य भाष्यैकवाक्यतया स्येकृष्णाख्यानस्यैवौचित्यादित्याहुः व्याख्या
नात्सूत्रापामिति सूत्रोपलक्षणमित्याहुः मतिबुद्धीति राज्ञांमत इति क्तस्य च वर्त्तमान इति षष्ठी
शेषषष्ठ्योरुभयोरपि समासस्य निषेधः तयोस्समासयोः स्यात्पूर्वादिस्वरासमासस्वराभ्यां म
नोदात्तस्यैव प्राप्त्या फले विशेषाभावात् तद्ध्वनयन्नाह भूतेक्तान्तेनेत्यादि· न च वर्त्तमानेक्तो
भूतेक्तस्य बाधकस्तत्र कोविन्यन्यापावितिवाच्यं भूतेकेवश्य प्राप्ते वर्त्तमाने क्तस्यानारम्भात्·
भूतत्ववर्त्तमानत्वयोर्युगपद्विवक्षायां असंभवात् दधितानेवशंपत्राप्ते तत्र कदानारंभाद्युक्ते
क्तेनदधिवाधइतिबोध्यं· कर्म्मेतिच अस्यक्तेननसम्बन्धः इग्नापांप्रतिषेधानर्थक्यात् तदा
ह कर्म्मणीतिर्पषष्ठीति चशब्दइतीत्यस्यार्थइतिभावः एवंचक्तस्यानुवृत्तिरेव इच्छमाह्निके

Digitized by Panjab Digital Library | www.panjabdigilib.org

तक्षकस्य सर्बस्येत्यादौ तयोः समासयोरत्र फले विशेषाभावादिति भावः एवमप्रथमान्तेन स
मास इति पक्षे विषष्ठ्यन्तत्र प्रयोगाभाव एवानभिधानादिति बोध्यं एतच्च भाष्यवदुदाहृतप्रयो
गविषयमतएवान्यस्य पदस्यार्थे इत्यर्थे कोन्यपदार्थे इति भाष्यस्तत्र प्रयोगः संगच्छते. एवम्ध्वनी
लोत्पलास्य गन्ध इत्यादि साध्वेव निषेधसामर्थ्यादिति तु नोक्तं गमनस्य प्रश्रयस इत्यादौ कर्म्मा।
धारये कृत्यात्वमकन्यापवत्तु भावे कर्म्मधारये इत्यनेन पूर्वपदप्रकृतिस्वरः षष्ठीसमासे त्वन्तोदा।
त्तत्वमिति भेदेन तत्साधेक्यात् फलान्तरमप्याह गोर्धनोरिति तत्र हि षष्ठीसमासे गुणात्रवतानि
मित्तकत्वेनाप्रधानत्वात् प्रथमानिर्द्दिष्टत्वाच्च धेनोः पूर्वनिपातो विशेषणसमासे तु गोरिति भेद इ
ति भावः आदिना भोज्यस्योष्णस्येत्यादिसंग्रहः येन यसज्ञेन सञ्ज्ञामन्वर्थानां प्रयन्ते तेषां ष
ष्ठीसमासे पूर्वनिपातानियम इति तद्व्यापनिषेधो विशेषणसमासत्युक्त्यादेवेति केयटः प
रे तु प्रथमानिर्द्दिष्टमित्यादिसूत्रभाष्योक्तरीत्या षष्ठीति सूत्रे प्रत्यासत्त्यायेन लुवन्तेन समासस्य
दूर्ध्वं निरूपितस्य वन्ध्यकार्थ्यं कषष्ठ्या ग्रहणमेव अन्वन प्रकृते समासप्राप्तिरिति समानाधि
करणग्रहणं वार्थमेवं च वनितं चेदमत्र भाष्ये तथा च भाष्यं समानाधिकरणेनेति किमुदाहरणं एव

Digitized by Panjab Digital Library | www.panjabdigilib.org

द्विषन्नुपुरारस्त्वं स्यहितोतीत्यादौ द्विषः शतुर्वा वचनं तोसुन्कसुनो इति निषेध इति कारकषष्ठी सत्वा
तत्रोदाहृतं भाष्ये तस्मादीदृशे विषये कर्म्मणः शेषत्वविवक्षायां तादर्थ्यस्य सम्बन्धत्वविवक्षा
यां षष्ठ्या भाव एव यालिलिनि तासर्व्व निर्णयायैव भाष्यप्रवृत्तेरित्याहुः स्वकर्त्तव्यमिति कर्तृषष्ठ्या
समासः तक्षकस्येति पतिनिष्ठितविभक्त्या समासः तत्र परत्वात् समानाधिकरणसमासस्याधि
त्वात् षष्ठीसमासः प्राप्तः कर्तरि च कर्म्मभीष्मादयोपीति पक्षेपि नच समानाधिकरणमसमर्थ
वदित्यसामर्थ्यं समानाधिकरणाधिकारे समानमध्यमवीराश्चेति पाठेन तस्य समानाधिकरणाधि
कारस्य समासाविषयत्वेप्यन्यत्राप्रवृत्तौ मानाभावादिति वाच्यं अधात्वभिहितमित्युक्त्या धातु
तत्प्रत्ययेन कर्म्माभिधाने कृत्प्रयोगः वीपमानस्येत्याद्यर्थमावश्यकत्वात् स्पष्टंचेदं भाष्ये समर्थ
सूत्रे भाष्योक्तेः प्रकरणान्तरस्येदमुत्सारितं स्वलेपित्त्वाप्रवृत्तिरित्यन्यत् ननु षष्ठीसमासस्य निषे
धेपि विशेषणसमासे तृजकाभ्यां इति निषेधे फलाभावात् आह विशेषणसमासस्त्विति विशेषणं विशे
ष्यं चेत्युभयोपादानेन नत्वावच्छेदकधर्म्मयोः परस्परं व्यभिचार एव विशेषणसमासप्रवृत्तेः।
रितितु नयुक्तं कैलासाद्रिरित्यादौ समासानापत्तेः तदेको भवोपादानं स्पष्टार्थमिति कैयटः इह

Digitized by Panjab Digital Library | www.panjabdigilib.org

सा०प्रो०

२९०

द्वाः शते गोविंशतेर्गोविंशतिरित्यादौ चनायं निषेधः तथा च पङ्क्तिंविंशतीति सूत्रे भाष्यं तत्र एते।
विंशत्यादयः समुदाये सम्बन्धभाववचना भवन्तीति विंशत्यादिषु भाववचनेष्विति च यत्तु तत्रैवं
गुणवचनभावेपि सत्तु तत्साहचर्यात् अध्ययनपदार्थगतवाधनमित्युपक्रम्याध्ययनमेको गुणः अ
यत्यमेको गुणः इति भाष्ये एकैवैवाध्ययनं चैवाध्यापत्यमित्यादिस्त्यादिति वदन्ति स्वैः संहितेति भावकः ते
नफलानां नित्यादिरित्याद्यवन्निषेधस्यादाह तृज्यकाभ्यामिति तृतीयेति तत्र करणत्वेन भाने षष्ठीसमा
सेसम्बन्धत्वेनेति भावः श्रौतविशेषमप्याह स्वरे विशेषस्त तृतीयासमासे तृतीयाकर्मणीति पूर्व
पदप्रकृतिस्वरत्वस्याद्यादिस्वरापवादः षष्ठीसमासे त्वन्तोदात्तः तृज्यकाभ्यां सकर्मकत्वात्कर्मतिकः
छिद्विमिमेत्यपेक्षया न कर्मणीति षष्ठी नलोकेति निषेधात् नापि पदाद्यपेक्षया सामर्थ्यात्समा

वैदुत्साके प्रतने .

सानापत्तेः किन्तु शेषे इत्याह किंकारयार्थः रक्षित इति अत एव सर्वपश्चादिति भाष्यप्रयोगः स्व
इ गच्छते प्रकृतसूत्रे भाष्ये आकृद्व्यपेक्षत्वेरादिभिः सामर्थ्येन समासाभावमुक्त्वा कृद्व्ययमेवो

त्मा२

दाहृतं तेनोभयथैः सति सामर्थ्ये समास इति स्फुरतीति गम्यते परे तु छित्वस्य कुर्वन् कृत्वेत्यादौ कारके
षष्ठ्या निषेधात् करणाद्यपेक्षया शेषषष्ठ्यां त्वसामर्थ्यात्समासप्राप्तिरेव नेत्याशङ्क्य छिजस्य।

२९०

Digitized by Panjab Digital Library | www.panjabdigilib.org

पदानुपादानात् तदेदमिति अन्यथा ब्राह्मणायेदं ताइत्यर्थे पुरुषपदेनासामर्थ्यात्समास
प्राप्तिरेव नेति भावः इदानीं तु पुरुषशब्द एव विशेष्यतात्पर्यम् परं तु एवमपि सामर्थ्यं तु रूपपा
दं षष्ठ्यन्तेन समर्थप्रकृतिकेन प्रत्ययेनोनसमस्यते इत्यर्थेनादोषात् अत्रापि प्रत्ययेनेन शुद्धा इति पदेन
वाक्यैकदेशान्वयेन शुद्धादन्तादित्यर्थे बोधः एवं च सुबुत्पत्तिः शुद्धशब्दात्तच्चार्थ एवेति न समर्थत्र
कृतिकताप्रत्ययेनास्य अतएव ब्राह्मणस्यगामनंगतइतिवाक्ये प्रकरणादिना ग्राममित्यर्थे स्योक्तन्या
येनगतइत्यनेनोक्तो समासेन नेष्यते च तत्रसमास इति कर्मत्त्विचेति सूत्रे भाष्यकैयटयोः स्पष्टम्॥
त्वात्कार्थी दृष्यएवात्रोदाहरणं गुरुपरतोपि पुरुषादीनां विशेष्यद्वयोपादानेन प्रकरणादिना तद
वगतो वा नान्यत्राभिधानस्वाभाव्यादित्याहुः अनित्योयं गुणेनेति पूरणार्थेनेति च बोध्यं इत्यादी
ति लोपे चेत्यादः पूरणमित्यादिशास्त्रार्थः तेन कुंभपूरणं भवउभयपृष्ठ इत्यादि सिद्धं परं तु एव
कुम्भसम्बन्धि पूरणं मुण्डसम्बन्धि पृष्ठ इति मध्यमपदलोपी समासः तएव भाष्येऽनित्यत्वं नो
क्तमन्यत्रास्यानभिधानमत एव सर्वश्वेतः स्पादौ गुणेन नेति निषेधात् कथं समास इत्याशंक्य
गुणान्तरेण समासस्त्वलोपश्चेति वचनमात्र सर्वं गुणेति सूत्रे भाष्ये॰ सह ब्राह्मणाभावः।

Digitized by Panjab Digital Library | www.panjabdigilib.org

ल०प्र०
२८९

तत्र शेषग्रहणानिवृत्तेस्तावत्सम्मतत्वात् । कृत्वोर्थ इत्यत्र तत्सम्बन्धे भाष्यानुग्रहाभावात् एवं
ज्ञोऽविदर्थस्येति सूत्रेऽपि तत्सम्बन्धे न्यासत्वन्त भाष्यानुग्रहः अधीगर्थदयेशां मण्डूकानुवृत्तिः एत
च्चाधिवश्यतिसूत्रे विस्तरेणोपपादितं शेषस्य देवितृत्वादीनां योगे कर्तृकर्म्मणोरित्यस्य निषेध्ये
नानेनैव षष्ठीसमासनिषेधस्य भाष्ये गावदृष्टत्वात् अत एव भाष्येनेदं प्रत्याख्यातं अत एव प्र
तिपदविधानाकेति प्रश्ने सर्व्वा प्रतिपदविधानाकेति प्रश्ने सर्व्वाऽप्रतिपदविधाना शेषलक्षणां ।
वर्ज्जयित्वा कर्तृकर्म्मणोः कृतीति तु च्छकयोगे भाष्य उक्तं । तत्र शेषलक्षणामित्यस्य शेषमात्र
लक्षणामित्यर्थः प्रतिपदविधानेत्यस्य कारकविशेषोपादानेन विहितेत्यर्थः तेन तुल्या
र्थैरित्यादेर्न तत्त्वमित्यपास्तं पूरणगुणेति आदिना गुणात्सहितो अत्र पूरणार्थेन पू
रणात्त्वार्थेनोपादानेति अन्योन्यस्यापि ग्रहणम्भाव्यानात् । गुणार्थशब्देन केवलगु
णवाची सन् गुणोपसर्जनद्रव्यवाची गुणबोधकप्रकृतिकभावप्रत्ययान्तश्च गृह्य
ते व्याख्यानात्तेदृक् काकस्येति आकडारसूत्रोक्त गुणवचनानां तु नेह ग्रहणं वचन

Digitized by Panjab Digital Library | www.panjabdigilib.org

श्चेत्यस्य हेतोराह पूरणेत्यादि द्व्यान्तताधेयश्चेताये क्षपास र्वीषां पदानां मधिको गुंश्चेतो गु
णा इत्युदाहरणार्थः एवं च तरवस्पुपन्नः हू योगाचेति प्रतिपदविधानान समस्यते इत्य
स्या पवादः न निर्धारणे हिमादिशब्दैः प्राप्तस्य निषेधोयम् पुरुषोत्तम इत्यत्र त्रि
तयसन्निधानाभावान्नानिर्धारणविभक्तिः किन्तु सम्बन्धसामान्ये षष्ठीनप्राप्तसमासः ।
अत एव हलादिशेषे पइनिसूत्रे किमपहलामादिरिति षष्ठीसमास इति भाष्ये उक्तं गुरा
वचनेन निषेधस्त्वनित्य इति तत्सूत्रे कैयटः उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृत इ
त्यादि गीतावाक्यादत्र कर्मधारय इति लभ्यते राजदन्तादित्वात्परनिपातः प्रतिपदेति ज्ञो
विदर्थस्येत्यादिकृत्वोर्थ इत्यन्तसूत्रविहिता प्रतिपदविधाना पत्रु शेषपदसम्बन्धेन शेष ए
वेतैः षष्ठीविधानेन तत्र षष्ठी शेष इत्यनेनैव सिद्धेस्तत्सामर्थ्यात्समासाभावः कल्प्यते ते
न प्रतिपदविधानेति नापूर्वमिति तन्न तत्र तातुयोगे उपात्तकारकातिरिक्तकारकाणां शेष
त्वविवक्षाभावज्ञापनेनापि चारितार्थ्यसंभवात् किञ्च कृत्वोर्थप्रयोगे ज्ञोविदर्थस्य द्विवा
स्तदर्थस्येत्यादिविषयेसमासनिषेधानापत्तिः

Digitized by Panjab Digital Library | www.panjabdigilib.org

त्वादर्थशब्देन विग्रहाप्रसक्तेर्न्यायप्राप्तिं गुरोरिदं गुर्वर्थमित्यादावपि विपदितलिङ्गमपि लोकतः सि
द्धं तदेवं स्पष्टार्थम् भयभीति । निर्गत गुरुभ्यो रघुपल्लक्षणाग्रमिदं भोगोपल्लवन्येतत्तद्विभुस्
स्तुघेति समासः मयूरव्यंसकादित्वात् अल्पपञ्चम्यन्तमिति कानिचिदेव पञ्चम्यन्तानि स
मस्यन्ते इत्यर्थः असंकुलास्मद्धान्नाभावेप्यल्पशब्दात्पञ्चम्या देवनिपातनात् शास्त्र स्तोकान्ति
क । स्तोकार्थाल्पशब्द एव न त्वल्पशब्दो व्याख्यानात् स्तोकाल्पाभ्यां लघुघ्राच्च कतिचस्तोका
।तिपञ्चमी हृतान्तिकार्थेभ्यो द्वितीया च समेन न तेभ्यप्रति बोध्यम् प्रतिपदोक्तपरिभाषयेत द्वि
त पञ्चम्यन्तेनैवायं समास इत्याहुः राजपुरुष इति अन्तर्वर्तिभक्त्यापदत्वान्नलोपः गुणानो
रेण । इदं च प्राणगुणे स प्रम्पात्यपवाद इति सर्वं गुणोमिश्र भाष्ये । ततः सर्वपदानुवृत्तेः सर्व
शब्द एवेदं गुणबोधकाद्विहितो यस्तर पतदन्तेन सर्वशब्दस्य समास इति वाच्योऽर्थः गुणा
द्विहितनत्वन्तं च गुणवाच्येवेत्याशयेनाह तरवन्तं पगुणेत्यादि ननु यतो निर्धार्यते यश्च
निर्धार्यते यश्च निर्धारणहेतुस्त्रितयसन्निधान एवायं निषेधो युक्तो निर्धारणे षष्ठी च यु
क्तास्यषष्ठं चेदं तरविधायके केपठ्यते नात्राप्यप्राप्तिः सर्वेषां श्वेततरस्त्याद्वौ तमवापत्तिः

Digitized by Panjab Digital Library | www.panjabdigilib.org

ऽेति ताभ्यिनाभिश्रीकारणत्वायोगादिति भावः नञ्छेदेन चतुर्थ्यन्तार्थे१त्याशयेनाह चतुर्थ्य
न्तार्थायेति तादर्थ्ये चतुर्थी॰ बलिरक्षितग्रहणादिति तद्योगे हितादर्थ्ये चतुर्थी हितयोगात्वस्मादे
वज्ञापकाच्चतुर्थी॰ हितसुखाभ्यामन्योपकारजननेन तद्योगे तादर्थ्याऽसम्भवात् एतत्
सर्वमभिप्रेत्यैवं षष्ठीसमासाइति रन्धनाय स्थालीत्यादावभिधानत्वाभावात्तादर्थ्यत्वेनैव
तस्य भानं न सम्बन्धत्वेनेति षष्ठ्यभावान्न षष्ठीसमासः चतुर्थीसमासवारणाय तु प्रकृतिविकृ
तिभाव एवेत्युक्तं॰ अत्र घासादावुपकारकत्वेन बोधे वाक्यमेव सम्बन्धत्वेन बोधे षष्ठ्यन्तेन समा
सोपीति व्यवस्था रन्धनार्था स्थालीति मध्यमपदलोपि समासोपि तत्र नानभिधानादिति भावः
एतेन षष्ठीसमासेन रन्धनस्थाल्या अपीष्टत्वात् प्रकृतिविकृतिभाव एवेति व्यर्थं चतुर्थीसमा
से पि चतुर्थी तदर्थ इति पूर्वपद प्रकृतिस्वरोन तस्य प्रकृतिविकृतिभाव एव वक्तव्य ते: अन्यथागो
रक्षितमित्यत्रापि अनेनैव स्वरसिद्धौ के चेति व्यर्थं स्यात् नच हितार्थे के चेत्यत्रापि तदर्थ इत्य
नुवृत्तेरत एवोभयोः कार्यज्ञापकत्वाभावपरिभाष्यं संगच्छत इत्यपास्तं अर्थशब्दस्य नित्यपुंस्त्वेन परव
ल्लिङ्गमित्यस्य बाधायाह विशेष्यलिङ्गता चेति एतदेवात्र विधेयं नित्यत्वं तु चतुर्थ्या तादर्थ्यस्योक्त

Digitized by Panjab Digital Library | www.panjabdigilib.org

ल० प्र०

२८७

सूत्रे प्रत्याख्यानात् समर्थसूत्रे तृतीया तत्कृतेत्युपन्यस्योपादानं विकल्प इत्युदाहरणं। द्वात्रीणार्थ
ग्रहणं नेतिवादिनो मते सर्वथा वैयर्थ्याऽवश्यकत्वाच्चेति दिक्। कर्त्तरि कारणे चेति सूत्रे समाहारद्वन्द्वात्सप्त
म्येकवचनमिति भावः तृतीयेति तृतीयान्तमित्यर्थः कृद्ग्रहणेति यत्र गतिकारकसमभिव्याहृ
ते कृदन्तं तत्र तद्विशिष्टस्यैव ग्रहणं अपिशब्दात्तदसमभिव्याहृते केवलस्यापीत्यर्थ इत्यन्यत्र
विस्तरः कृतेति किमिति सुपेत्यधिकारेण तिङन्तेनासमासात् कर्त्राद्याक्षिप्तधात्वर्थक्रियाबोध
कत्कृदन्तेनैव न भविष्यतीति प्रश्नः काष्ठैरिति अन्ये तु कृदन्तेनैव समासो यथास्यान्नानुवर्त्तनेन।
त्यर्थं तत् उक्तोदाहरणे तु शानजन्ताद्धि मिथि बहुलग्रहणेन बाधितुं शक्य इति प्राहुः अर्थवा
दश्चारोपितोर्थः काकपेयेति शक्यार्थकृत्यः पूर्णाम्भत्वेन कोमलत्वेन च स्तुतिरल्पाम्भत्वेन
दुर्बलत्वेन निन्दा वा इत्यन्तर्भूतेति तात्पर्येनादन्नस्येत्यकार्यत्वेन प्रतीतान्नासंस्कारकत्वानुप
पत्तेरिति भावः तदुक्तं भाष्ये भक्ष्यार्थसप्तम्या व्यत्ययात्समर्थमिति तेद्भाष्युक्तो यो यद्य उपसेकादि
स्तत्संप्रत्ययादित्यर्थः सर्वलोकव्यवहारप्रसिद्ध्याच तदर्थान्तर्भावनिश्चय इति च अत्र शब्देना
त्रौदनः भिस्साल्पीमत्कमन्योन्यामिति कोशेन तत्र तत्पयहृते पंगावहति बलीयसीति बोध्यम् भिस्स

२८७

Digitized by Panjab Digital Library | www.panjabdigilib.org

।धान्येनेति अर्थशब्दो धनपरो हेतुतृतीयेति बोध्यम् पूर्वसदृ॰ यद्यपि सदृशेन षष्ठीसमासः ॥
।सिद्धस्तुल्यार्थैरित्यनेन तद्योगे षष्ठ्या अपि विधानात् एतस्यास्त्वत्र प्रतिपदविधानत्वमिति वक्ष्य
ते अतः प्रतिपदविधाना षष्ठी न समस्यते इति निषेधोत्र वन पूर्वपदप्रकृतिस्वरोपि सदृशप्रतिरू
पयोरिति सिद्धः तत्र हि दास्याः सदृश इत्यादौ षष्ठ्या अलुकि पूर्वपदप्रकृतिस्वरार्थं सदृशग्रहणमावश्य
कम् न सादृश्य इति स्थाने नास्त्येवेति न तदर्थमिदमावश्यकं तथापि भोजनेन हेतुकसादृश्यवाचित्वार्थं भो
जनेन सदृश इत्यत्र समासार्थमिदमावश्यकं॰ हेतोः विवक्षया षष्ठीसमासे तु पूर्वपदप्रकृतिस्वरासि शेषवत्
द्धिः सादृश्यग्रहणे न स [illegible] दृशप्रतिरूपयोरित्यस्योपमानबोधकपूर्वपदके एव वृत्तेरिति स्पष्टं सदृ
शप्रतिरूपयोरित्यत्र भाष्ये यदि तु भोजनेन कृतः सदृश इत्यर्थे पूर्वसदृशेति समासे तत्पुरुषे तुल्या
र्थैरित्यनेन स्वरोपि सिद्ध इत्युच्यते॰ तदा सदृशग्रहणं व्यर्थमेवेति प्रकृते सर्वैकैवदेन ध्वनितम्॰ सदृ
शेति सूत्रविधायकत्वे दोषस्त्वं भाष्यन्तु एकदेशयुक्तिरिति तदाशयः मिश्रेणेति यत्रावस्थैनैकार्थ्यं
सन्धिस्तत्र गम्यमाने मिश्रस्तुत्वा पदमनुपसर्गं तृतीयान्तात्परमन्तोदात्तमित्यर्थः अवरस्येति
यद्यप्यवमूनार्थैपि तथापि मवस्यापि विषयावतार्थमिदं भाष्ये ऊनार्थेत्यवरग्रहणमस्य तृतीयेति।

Digitized by Panjab Digital Library | www.panjabdigilib.org

मर्थोऽस्त आह अनत्यन्तेति परिछेत्तुमिति रमेर्यागेप्राकधर्षेतितुमुन् अत्यन्तसंयोगानत्यन्तसं
योगसाधारणेन पूर्वेणासिद्धेरिदं किमर्थमत आह अकोन्तार्थमिति केनेति अचेन्नात्तुवर्त्तते इति।
भावः तृतीया इदं सूत्रं कृ तद्धार्थकस एव सामर्थ्यं जवर्त्तते नसाक्षात्त्य रस्य रान्वये उत्तरसू
त्रेणान्निपुणाश्लक्ष्णाभ्यां समासविधानात् तयोरेहि हेतौ तृतीया। तत्कृतेत्युक्तेश्च स्पष्टं चे
तदौमाष्ये गुणोत्पस्य तत्कृतेनेत सापेक्षत्वेपिसौत्रत्वात्समासः खण्डशाब्दश्च खण्डगुणवत्वा।
नबोधकइतिशंकुलाखण्ड इत्यत्र हृ तद्धार्थकमेव सामर्थ्यं शंकुलाकृतखण्डगुणवानित्यर्थः
वचनग्रहणान्नु गुणोपसर्जनद्रव्य वचनेनैव समासार्थः तेन कुसुंभेन कृतत्वपमित्यादे
न घृतेन पाटवमित्यादौ च न स्पष्टं चेदं भाष्ये यद्यपि जातिसम्बकृदन्ततद्धि[illegible]तान्तसमस्त
सर्वनामसंख्याशब्दभिन्नशब्दानांमेव गुणवचनसंज्ञा तथापि वक्ततेव्याख्यानात्पु
व्यौगिक एव गुणवचनशब्द इति बोध्यम् तृतीयान्तार्थेनकृतोपेगुणस्तद्वचनेनसमास इत्यर्थो तत्
तत्कृतेत्यस्य गुणपदेनैवान्वयेपिसम्बन्धानुपादानाच्च गुणेनेतीयतासिद्धे वचनग्रहणाद्गुणमुक्त
वतेत्यर्थ इति भाष्याच्च गुणपदेनधर्ममात्र। तेनखण्डशब्दस्य क्रियावचनत्वेपिनदोषः॥

Digitized by Panjab Digital Library | www.panjabdigilib.org

णसङ्ख्योपूर्वस्य तद्धितार्थे त्यत्रोक्तस्य तत्पुरुषसंज्ञाविधानसामर्थ्याद्द्विवपर्य्यायेसिद्धे चकारः समा
वेशार्थ इति भावः श्रितादीनां सुबन्तत्वासंभवात् श्रितादिप्रकृतिकैरित्यर्थलाभः येनविधिरिति
सूत्रस्य भाष्ये प्रामाणापन्नसप्तसुब्स्त्रीलिङ्ग प्रथमान्तभिन्नोपि षष्ठ्यर्थे न वर्तते अवयवत्वादिति भावः
समर्थविशेषणत्वाच्छ्रितादीनां प्राप्नोपि तदन्तविधिः समासप्रत्ययविधाविति निषेधान्न भवति।
तदन्तविधौ हि श्रिताद्यन्तासमर्थप्रकृतिकैरित्यर्थे कष्टं परमश्रित इत्यादावपि समासापत्तिः कष्ट
श्रित इति नलोकेति षष्ठी निषेधः पतितशब्देन निपतितः इति द्रौण्यः सनेवेत्कत्वे न पक्ष्य विभाषेती।
तन्निषेधः प्राप्तावपि अत एव निर्देशाद्विबोध्यः अपेतापत्वादिति त्वपमात्मने त्यर्थकं कर्तृशक्ति
प्रधानमित्यर्थः स्वाद्युपकृतिरिति असमासे कान्तिरिति भावः एकत्वमर्थमपि समासफलम् खड्गा।
अस्यतत्प्रकृतिके लक्षणया द्वितीयेत्यनेन सामानाधिकरण्यं जात्या इति तेन केवलसूत्रेत्वे तस्यात्
चयति एतेन प्रकरणादिसहकृतवाक्येन निन्दाप्रतीतिसम्भवान्न हि निन्देत्युक्तमित्यपास्तम्
योगसूत्रे तत्सम्भवेपि केवलसूत्रे तदभावात् नहि निन्दात्यस्य च विवक्षिता निन्देत्यर्थः सामीत्यर्द्धं
कालाइति कालवाचिन इत्यर्थः बहुवचनात् कालात्कालान्तसाधारणोऽत्र सूत्रेण सिद्धे योगविभागो

ति

Digitized by Panjab Digital Library | www.panjabdigilib.org

इति केचित् प्रत्यक्षमिति लक्षणेनाभीतिसमासः परोक्षमिति इन्द्रियाजन्यं ज्ञानं विषये
त्वमस्यास्याधजन्तः प्रयोगः नन्वत्राव्ययीभावाप्राप्तिरतआह सामर्थ्यादिति परस्यौकारं
ति पाणिशब्दस्य औकारान्तादेशः इत्यर्थः एङ इति पूर्वत्वम् परस्पोकारेति पाठे परस्पादिग्र
हस्यादेकाटः इत्यर्थः आकुलः अग्नोज्ञाय चेति धर्म्मे पराद्दितिभावः अत्रैलक्षे पत्ये गता
हणांप्रक्षिप्तमिति पूर्वोक्षे लिङितिल ल्व स्यू भाष्यकैयटस्वरसः तत्रहि समासान्तोपि निपात
नात्साधितः प्रत्यार्थमिति वेतिवक्तव्यतत्र नार्थमपीत्यर्थः अन्ये तु तस्याग्रहणास्य तत्त्व
रितत्वंनास्त्येव अतएव नदीपौर्णमासीति सूत्रे नदीशब्दे नविशेषाणामग्रहणेषाशरद्यादिषु
विपाठशब्दपाठस्य ज्ञापकत्वमुक्तं स इ व्यास आरक्षे भाष्ये नदीत्वादे वैकल्पिकत्वेनित्यत्वाय पाठस्या
वश्यकत्वाच्च ज्ञापकत्वासङ्गतिः स्पष्टैव तत्र सपत्नपाठस्तु अपभ्रंशार्थस्तत्र नदीसंज्ञकस्यग्रहणं पौर्ण
मास्यादिग्रहणात् नचाशब्दसंज्ञेति निषेधात्स्वरूपस्यापि ग्रहणं न स्यादि[?]ति वाच्यं लक्ष्यानुसा
रेण सामर्थ्येन च तस्यात्यागात् अतएव तत्सूत्रे भाष्ये प्रत्याख्यातमिति प्रामाणिकाः इत्यव्ययी
भावः अथ तत्पुरुषः ॥ चकारवत्वेनेति स इ व्याप्र बं द्विगुरिति योगं विभज्य पूर्वेण सं।

Digitized by Panjab Digital Library | www.panjabdigilib.org

वस्यार्थवाक्यस्याप्रातिपदिकत्वात् । तत्र कवुत्पत्तिकाल एव तत्पूर्वभागस्य समाससंज्ञा । विरो
धाभावात् समासान्तस्य च तद्घटकस्यावयवत्वेन तद्ग्रहणेन ग्रहणात् वाक्कुमारीकः इत्यादावु
पसर्जनस्त्रीप्रत्ययान्तप्रातिपदिकान्तत्वात् कच्चः कप्रत्ययाद्दन्तरङ्गत्वात् तरः तादृश्यं ये पदा
नां समासेन तावत्तेषां मन्यपङ्क्वति कपं तावत्प्रतीक्षत इति भाष्येणास्यत्वं तथाभिधानात्
तत्राद्यस्य तावदित्युस्य कपः प्रथममित्यर्थः अन्यतः समाससंज्ञात्वं कपा सह स्वभवना
पकपं पश्यतीत्यर्थः पूर्वस्य बहुव्रीहितदर्थकवाक्याभावेन कपः शास्त्रेऽपर्य्यभिधाहित तद्भ
वनकालप्रतीक्षा अन्येषां तदनपेक्षत्वं न कप प्रतीक्षोक्तिः संतासंगतास्यात् अत ए
वं प्रत्ययस्यादिति सूत्रभाष्ये दाहत्ते वा चर्म्मिकेत्यादावपि पत्वोभावादित्व सिद्धिरिति
दिक् अथाव्ययीभावे असाधारणसमासान्तानाह अव्ययीभावे अव्ययीभावत्युत्तर
पदतयोर्वर्त्तमानं यच्छरदादिप्रकृतिकं तदन्तं तदन्तात् टच् स च समासार्थविग्रहवाक्य ।
स्यान्तावयवं इत्यर्थः राजाहस्सखिभ्य इत्यतष्टजनुवर्त्तते अनन्तादव्ययीभावादित्यादिकफलितार्थ
परतया कथंचिन्नेयं अत्रैगरो येकषन्तास्ते बांस्यापइ ति विकल्पं प्राप्ते नित्यार्थः पाठ

Digitized by Panjab Digital Library | www.panjabdigilib.org

थमकाइत्यादौकर्पितोदात्तत्वापत्तिमुक्तं।सेनन्तेचरत्यत्रान्तोदात्तत्वासिद्धिरितुक्तोभयोरपिप्रक
रणेनलक्ष्यानुसारात्क्वचिदुत्तरपदान्तस्यक्वचित्समासान्तस्योदात्तत्वमिति सह्यपसत्र
स्यभाष्यंतदनाश्रयतोपियोजयितुंशक्यं तथाहि॥ तद्द्वन्द्वानांविभक्तौपरतएकशेषइ
तिपक्षे स्रुक्च स्रुक्चस्रुचौ अस्मात्प्यादेकशेषोनप्राप्नोतीतिभाष्यं समासांतानां
समासमावयवत्वेपितत्रागभावस्यविभक्तिपरत्वाभावस्तद्विशिष्टस्यतुनसत्त्वपत्वमि
तितद्भावः नचतस्यानर्थकत्वेनतदनुक्ताभाष्यस्यन्यूनता। द्वन्द्वावयवानामेर्थवता
मेवैकशेषइत्यर्थेमानाभावात् विशिष्टरूपोपादानाभावेनतत्परिभाषायाश्चाप्रवृत्तेः भा
ष्यान्ताद्येतुतादृशंनोपलभ्यतएवेतिदिक्। सचसमासान्तोवहुव्रीहौ मज्जासित्यवस्थायामलौकि
केवाक्येसुपःपरत्वादेव एवंत्वेतुवाघाद्योविरोधः नहिसुबन्तंहितसमासार्थः किन्तुतद्विशिष्टमेवन
चविशिष्टस्यसुबन्तत्वाभावेनसुबन्तात्तद्धितइतिसिद्धान्तविरोधः तेषामर्थाभावेनपरिहृतोप्यद
मितितन्मूलभूतन्यायप्रत्याप्तिविषयाभावात् अतएवकुप्योगादितिसूत्रेनपन्तत्वार्थिकानामुत्पत्
पत्तेः एवमेवोत्पत्तिर्भाष्यउक्ता किंच समासान्तोनामकार्योऽग्राप्यातिपदितस्यापत्यसम्बन्धः तस्याम

Digitized by Panjab Digital Library | www.panjabdigilib.org

त्वं व्यर्थमिति वाच्यं तत्सामर्थ्येन समासान्तविधावाद्युदात्तश्चेत्यस्य सम्बन्धज्ञापना
त् तेन समस्तार्थस्य सम्बद्धपुरोराजमित्यादौ पूर्वपदप्रकृतिस्वरसिद्धिः द्वित्रिभ्यामिति सूत्रस्य
समासान्ते कृते समासान्ता इत्येतत्परं भाष्यमेकदेश्युक्तिः सूत्रस्थभाष्यग्रन्थविरोधादित्यन्यत्र प्रपा
ञ्चितं अन्तशब्दश्चात्र समासावयववाची स च समुदायावयवः अत एवोपशरदमित्यत्र नाव्य
यीभावादित्यम् अव्ययानामित्यत्र टिलोपश्च सिद्धः पूर्वभागस्याव्ययीभावत्वाभावेनान
व्ययत्वात् यत्तु कैयटेन गोस्त्रियोरिति सूत्रे समासपदस्य समासार्थविग्रहवाक्ये उत्तरपदस्य ल
क्षणयोत्तरपदावयवमुक्तं तथा सत्युपसूत्रे उक्तं उत्तरपदावयवत्वमित्यपि भाष्यकारस्यम
तमिति तन्न फलाभावात् द्विधुरीत्यादौ स्त्रीत्वस्य लोकतः सिद्धः लिङ्गमशिष्यं लोकाश्रयत्वा
ल्लिङ्गस्येति भाष्येण लिङ्गप्रकरणस्य नियमार्थत्वाभावबोधनात् अत एव परवल्लिङ्गमिति सू
त्रसत्त्वेपि द्विनावमर्धखारमित्यादौ नपुंसकत्वसिद्धिः पञ्चराजमित्यादावपि तत्त्वस्यापत्ता
वकारान्तोत्तरपदं यच्चोत्तरपदस्य ग्रहणस्य व्यर्थत्वापत्तिश्च अन्तरत्यादिसूत्रस्थभाष्यविरुद्धं चो
त्तरपदावयवत्वमेवं हि तत्र भाष्यं समासस्यान्तोदात्तत्वमुत्तरपदस्य वेति कल्प्ये आद्ये इदं त्र

स्यो

Digitized by Panjab Digital Library | www.panjabdigilib.org

भिःपुत्रोक्तो गोदावर्य्याश्च नद्याश्च सङ्ख्याया उत्तरे पदीत्यत्र तु न योगविभागस्येष्टसिद्ध्य
र्थत्वं भाष्यकृता तादृगुक्तेश्चेति भावः अन्यपदा० सङ्ख्येवेति निवृत्तेन नदीग्रहणमनुव
र्त्तते संज्ञानवगमादिति संज्ञेति कर्म्मोपपद० तेन सञ्ज्ञेन दिशाविशेषस्यानवगमादित्य
र्थः नित्यसमास इति तत्स्वरूपाद्यर्थः तत्सादृश्यं च समाससमानार्थकवाक्याभावेन
समासघटकपदानां विग्रहत्वस्यैव महाविभाषया असम्बन्धे मानाभावात् अतएव द्विती
यतृतीयेतिसूत्रेऽन्यतरस्यांग्रहणं नोत्सर्गाद्वयोर्महाविभाषाविषयत्वेऽपि वादाभावे उत्सर्गोऽपवादेनेत्यर्थे
ज्ञापिते उन्मत्तगङ्गमित्युदाहृतं अव्ययीभावेन मुक्ते वृद्धो हि नेति चोक्तं भाष्ये अस्यानित्यत्वे तेन मुक्त
इत्यसङ्गतिः स्पष्टैव एवमन्यत्रापि बोध्यं समासान्ताः अत्र समासपदं तत्सम्बन्ध्यलौकिकविग्रहवा
क्यपरमेवमव्ययीभावादिपदान्यपि तत्पराणि अतएव बहुकुमारीक इत्यादौ ह्रस्वो न गोस्त्रियोरि
त्यत्र भाष्ये स्पष्टमेतत् अन्ताः इति सूत्रे भाष्ये च एवं चालौकिकविग्रहवाक्ये समाससंज्ञासमकालमे
व समासान्ता इति सिद्धान्तः नच पूर्वं समासान्ते तत्सन्नियोगशिष्टाद्युदात्तत्वेन तदेकवाक्यतापत्त्या
पूर्वस्य निघाते च कृते पूर्वपदस्योगित्वात् स्वरितयोगित्वाभावेन पूर्वपदप्रकृतिस्वरत्वं क्वचोऽडच स्वि

Digitized by Panjab Digital Library | www.panjabdigilib.org

णि निकात्यायनी त्रिमुनि भाष्यकृतौ च स्वपदार्थे प्राधान्य एवायं समासः नन्वेवं त्रिमुनि
व्याकरणमिति सामानाधिकरण्यानुपपत्तिरत आह विद्येति अन्ये तु बहुव्रीहौ त्रिमुनि।
व्याकरणमव्ययीभावे व्याकरणस्येति स्वरभेदश्चेष्ट एवेत्याहुः परे तु विद्यावंशो नाम गुरु
शिष्यपरंपरा न चैतस्या मुनित्रयस्य तत्त्वे मानमस्ति यदीष्यते तदा तिष्ठतु गुरुप्रभृतिषु पाठ
त्साध्यमित्याहुः मूलं तु बह्वनुसारेण किञ्च न हि त्रिपुत्रो द्विपुत्रव्यपदेशं लभते इति न्या
येन द्विमुनीति व्यवहारासंगतिर्बोध्या जन्मनोदाहरति एकविंशतीति एकविंशतिर्भार
द्वाजो वंश्या इति विग्रहः क्तौ तत्तीयासप्तम्योरिति सूत्रस्थभाष्यप्रयोगात् तन्मात्रपेनो
पकादिष्वनयोः पाठात् पञ्चम्याश्चेति लुग्भावो बोध्यः नदीभिश्च अत्र बहुवचननिर्देशा
त्संज्ञाया ग्रहणं नापि स्वरूपस्य शब्दसंज्ञात्वाच्च किन्तु नदीत्यर्थग्रहणं तेन तद्वाचके
सर्वत्र प्रवृत्तिः एतच्च संख्यासंज्ञासूत्रे भाष्ये स्पष्टम् समाहारे चेति तत्रैवेत्यर्थः ए
वं च तदविवक्षायां पूर्वकालैकेति समासे एकनदीतरः सिद्धोऽन्यथा समानाधिकरणत
त्पुरुषस्य बाधित्वाव्ययीभावेन पुंसकत्वापत्तिः अन्यत्र त्वनवेति योगविभागात् सिद्धो भिषु।

Digitized by Panjab Digital Library | www.panjabdigilib.org

पलाक्षितेति विशिष्टेत्यर्थः दैर्घ्यसदृशदैर्घ्यविशिष्टत्वमनोरथः तथाबोधेचगङ्गायांज्ञापक
स्यगङ्गासमीपइतिबोधेगङ्गायांज्ञापकत्वस्यचनियमेननमनसावाधादन्यलभ्यत्वेनमात्रेतदनौ।
र्थीत्यमितितात्पर्य्यम् तेनसम्बंधेनान्वयेतुवनमनुगङ्गामन्वितिद्वितीयैवेतिबोध्यं निवेशपगङ्गा।
मनुतांमहानदीचम् मितितमापत्तावपोगात् वातलास्याः स्वरूपेत्याशातत्वेप्याथामवैशिष्ट्येन
ज्ञाप्यत्वम्बोध्यं· तिष्ठद्गुप्र· वैनैपांवत्यन्तेप्रवेशोन आतिष्ठद्गु जपन्सन्ध्यांपश्चिमामाय
तीमावादितिभाष्यश्लोके आतिष्ठद्गुआआयतीगवादितिभिन्नेपदे· इहउक्तोदाहरणद्वये तत्रा
घेशात्रादेशमात्रम् शात्रोदेशाइति प्रथमासामानाधिकरण्यात्तदर्थोक्तिः यद्यपिपचनपुरु
षइतिवत्सिध्यति तथापिउपायान्तरमिदम्· समासान्तश्चेति इदमन्त्ये चेनान्यपदार्थेऽव्य
यीभावइतिबोध्यम् पक्षेषष्ठीति अयंभावः महाविभाषैकार्थीभावस्यविकल्पबोधिका
वृत्तिश्चैकार्थीभावेनित्येतितेननाप्राप्तिन्यायेनाव्ययीभावस्तत्पुरुषंबाधेत यद्येकदेश
समासः षष्ठीतत्पुरुषइतिपक्षेतद्व्याभायपुनर्वायहतामिति लङ्· द्वित्यादित्रिस्त्रीत्वभा
वात्समानाधिकरण्यविवक्षा वंशाइति एकत्वभावः सन्तानप्रवेन्धोवंशः द्वौमुनीपा

Digitized by Panjab Digital Library | www.panjabdigilib.org

अग्निं ज्ञाप्यं शलभकर्त्तृकं पतनमिति बोधः उदाहरणे तथा बोधे चाभिमुखत्वं शलभपतनस्य लो
कप्रसिद्ध्या मनसा गृह्यते इत्याभिमुख्यद्योतकाद्यभिप्राद्यस्य अग्निं ज्ञाप्यं शलभकर्त्तृकमत्र त्वासत्या
भ्यभिमुखं पतनमिति बोधः इत्यन्ये कर्म्मप्रवचनीययोगे त्वसम्बन्धेनान्वयाद्वाक्ये द्वितीयात आह अ
ग्निमभीति लक्षणेनेति किम् स्रुघ्नं प्रतिगतः स्रुघ्नादागतस्तमेव प्रतिनिवृत्त इत्यर्थः आभि
मुख्ये किं वृक्षम्प्रति विद्योतते इत्यादा। वाभिमुख्यद्योतकाभावे समासो माभूदिति अस्य समासस्य वै
कल्पिकत्वेन पक्षे कर्म्मप्रवचनीयत्वे चाभितार्थः अभिप्रतीइति किम् अग्नेस्संमुखं शलभाः पतन्ती
त्यर्थे सांमुख्यार्थक संशब्देन लक्षणत्वसम्बन्धेनान्वये समासो माभूदिति अनुर्य्यः लक्षणेनेति
वर्त्तते समयेत्यधिकरणशक्तिप्रधानं यदिति सामान्येन नपुंसकं द्वितीयान्तं पदार्थं समये त्यर्थद्यो
तकोनुस्तेन लक्षणाभूते नतद्वाचकेन सम्यते इत्यर्थस्तदाह यमिति वनादेर्लक्षणत्वे समीपद्यो
तत्वसामीप्येन वनेनाशनिर्देशो ज्ञाप्यते लक्षणत्वं तु वस्तुसन्निधिमितिं न तु तेन सम्बन्धेनान्व
यस्तदाह वनस्य समीपमिति यस्य दैर्घ्यमिति यद्दैर्घ्यसदृशदैर्घ्यमित्यर्थः अत्रापि लक्षणत्वं व
स्तुसदेवनिमित्तं तद्ध्वनयन्नाह गङ्गायाम् अन्विति तद्योत्यसम्बन्धेनान्वयाभावान्न द्वितीया उ

Digitized by Panjab Digital Library | www.panjabdigilib.org

केचित्तु सुबन्तं प्रति समर्थ इति सूत्रे भाष्ये तत्र व्याख्यातं एवं च विशेषणतीभूतस्यैकार्थीभावस्य विकल्पाद
विबोधकानीमानि अत एव परिमध्ये इति सूत्रे भाष्ये एकया वृत्त्या विभाषा पर्यावृत्त्या विभाषा निर्ध्यापवा
द इत्युक्तं तत्र वृत्तिरेकार्थीभावः एतत्सामर्थ्यादिति ग्रन्थेनैतल्लक्षणात्प्राक् तदसम्बन्धेन तद्विषये
एकार्थीभावस्य नित्यत्वमिति भावः नन्वेवं सुप्सुपेत्यस्यापि नित्यतापत्तिरेवं च भाष्ये सुप्सुपेत्युदाह
रणाभूते विस्पष्टपटुरित्यत्र विस्पष्टं पटुरिति विग्रहप्रदर्शनासङ्गतिरत आह सुप्सुपेतीति एतत्समा
सानुवादेनैव। अव्ययीभावादिसंज्ञाविधानेन सिद्धे पुनः सोऽस्य समाससंज्ञाविधानं तन्नित्यत्वस्वा
पकं उपपदमतिङ्. कर्तृकरणे कृता बहुलमित्यादौ तथा व्याख्यातत्वेनेत्यादावुद्देश्यप्रसिद्ध्या अनेकमन्यपदा
र्थ इत्यादौ आदिपदघटितसमासस्त्वपोद्देश्यप्रसिद्ध्या तेषु समाससंज्ञाविधानस्यावश्यकत्वे
नार्थाधिकारानुरोधात्सर्वत्र तस्य विधेयसमर्पकत्वं प्रथमानिर्दिष्टमिति सूत्रे समास इत्यस्य
समासत्वव्याप्यसंज्ञाविधायके लक्षणे व्यपादीनामुपसर्जनत्वं साधयितुं शक्यमिति।
न तदर्थं समाससंज्ञाविधानं चरितार्थमिति भावः विग्रहप्रदर्शनपरोक्तभाष्यादपि तस्यानि
त्यत्वम्बोध्यम् लक्षणेनाभि॰ अभिप्रती आभिमुख्येऽस्याग्नेरापकत्वसम्बन्धेनान्वयस्य च द्योत

Digitized by Panjab Digital Library | www.panjabdigilib.org

किं यावदुक्तं तावदुक्तं किंयदुक्तमिति नावधारयामीत्यर्थः सुप्रतिना॰ मात्राशब्दो ल्पपर्य्यायः पुनः

सुप्रत्यहणामव्ययमित्यर्थम् अन्यथा दोषामन्यमहदित्यादौ दोषादीनामवृत्तिविषये सत्वप्रधान

ताद्दर्शनात ताद्दशाव्यये नैव समासः स्यात् वक्ष्यमाणतीति लक्षणेऽप्रतेः कर्मप्रवचनीयत्वं तु प्रतेर्गेति ग

तावितिनिघाताभावाये त्याहुः अक्षशला॰ समस्यन्त इतिशेषः पराजय एवेति पञ्चिकानाम द्यूते पञ्च

भिः कपर्देर्भवति तत्र यदि सर्वे उत्ताना अवाञ्चो वा पतन्ति तदा पातयिता जयति अन्यथा जीयते॰

विपरीतवर्त्तनेक र्तृत्वेनाक्षादे स्तृतीया वृतौ परेस्तदर्थः अक्षेण सव्यपरीत्य लौकिकं नित्यसमास

त्वादस्वपदविग्रहः वैपरीत्यं च नयापेक्षयेतिभावः अक्षेणेति अक्षाभ्यां विपरीतं वृत्तमित्याद्य

र्थेन समासो नभिधानात्॰ अद्वात्वैनैकाक्षवोध एवाल्पसाधुत्वेन तु तेन रूपेणानेकाक्षबोधे ए

च

कत्वादिना बोधस्तु वक्ते नास्त्येवेति भाष्ये स्पष्टम् विभाषा॰ यद्यपि एकार्थीभावे समासस्य व्यपेक्षायां

वाक्यस्यैव सिद्धेरिदमव्यर्थम् एकार्थीभाव एव समासस्तस्माद्विकल्पस्तु नेष्यते एवं समासनिषेधश्चा

लब्धातिनित्यं क्रीडेत्यत्र नित्यग्रहणं च व्यर्थं निषेधविषये एकार्थीभावाभावेन समासाप्राप्तेः नि

त्याधिकारविषयेव्यपेक्षाभावेन वाक्याप्राप्त्यर्कं ध्वनितं चेदं समर्थानामितिसूत्रे भाष्ये लक्ष्ये

Digitized by Panjab Digital Library | www.panjabdigilib.org

तत्सत्त्वेप्यर्थे घटितं साधुत्वमित्यत्र चेतदेवमानमिति भावः नञ्प्रतिषेधे इति प्रतीकमुपादाय य
थार्थेऽव्ययमिति पूर्वेणा सिद्धे समासे सादृश्यप्रतिषेधार्थत्वात् अस्यारंभस्येति केचित्तस्तत्र सूत्रे गृही
ताव्ययेन तेन सूत्रेण समासात् नियमत्वापेक्षयैतदर्थं ज्ञापकत्वस्यैवोचितत्वात् तत्र सूत्रे यथार्थश
ब्देन सादृश्याग्रहणाच्च अत एव तत्र सूत्रे सादृश्यग्रहणं चरितार्थम् अत एव भगवता सादृश्यसम्पत्ति
तिश्चाप्नोतीत्युक्तं न च सादृश्यग्रहणे गुणभूतसादृश्यग्रहणार्थं तस्यानुरोधेन प्रधानस्याव्ययत्वे
भयत्रापि तेनासिद्धेः यथा योग्यताया यथार्थत्वेपि सूपस्य योग्यमनुरूपमित्यादौ तदर्थकेनापि समा
सस्यात् तत्र पूर्वसूत्रे यथार्थग्रहणं तदर्थकान्यापीव्ययग्रहणार्थं एवञ्च यथाशक्तीति एतदुदाहरणा
मेवेति भाष्यस्वरसः वीप्सादावपि यथाशब्देन समासो भवत्येव यथ्य दव्युत्पन्नवीप्सावाचितस्येदंग्रहणमिति
भाष्यात् एवं चैतस्यष्टमेवोपक्रमोपसंहाराभ्यामस्य सूत्रस्य विधित्वं भाष्याद्युन्नेयते अत्र सूत्रे यथा
शब्देन यथार्थस्य न ग्रहणं मानाभावात् पूर्वसूत्रेतु वचनग्रहणाच्च यथा विभक्तिशब्दे नैवेति प्राहुः मा
वदवः सह त्यादिना यथापरिच्छेदो वधारणं तद्बोधकं यावदित्यव्ययं समस्यत इत्यर्थः अवधारणे

Digitized by Panjab Digital Library | www.panjabdigilib.org

मास्त्विति वाच्यं एतत्सूत्रारम्भसामर्थ्येन तत्र तदप्रयोगात् तत्रार्थे साधोरन्यत्रार्थे साधोरन्य
त्रार्थेः साधुत्वापत्तेश्च इदमेव सूत्रमव्युत्पन्नस्य तदर्थकस्य यथाशब्दस्य सत्त्वे मानम् त
था च भाष्ये असादृश्य इत्युच्यते तत्रेदं न सिध्यति यथाशक्ति यथावलं प्रकारे यस्याल्लूतद
न्तस्य सादृश्य एवं वृत्तेरित्याशङ्क्य वीप्सादिवाचिनोऽत्र सूत्रे यथावलमित्युदाहरणे च ग्रहणा
भिन्नार्थकोऽत्यन्तमन्यः प्रकारे थाल् तस्य ग्रहणं कस्मान्न भवति पूर्वेण प्राप्नोति सादृ
श्यसंपत्तीति पूर्वपक्षितोऽत्र के प्रतिषेधवचनसामर्थ्यान्न भविष्यतीति उत्तरितं नानेन भाष्ये
ण ग्रहणं तत्सूत्रे प्रकारवचने थाल् तस्य ग्रहणं शक्यते इति वक्तुं युक्तं असादृश्य इत्यस्य सूत्रे श्रवणा
त् यथापि तद्धितस्य तत्तो नायं पूर्वपक्ष इत्यपि वक्तुं शक्यं तथापि पूर्वेण प्राप्नोतीत्यादरस उक्तिः
तस्मादुदाहरणे थाल् नत्स्य ग्रहणं तत्र सादृश्यार्थके न समासंहत्वान्यत्राप्यर्थे प्रयोगे बाध
काभाव इत्यभिमानेनार्थे घटितं साधुत्वमित्यजानतोऽव्युत्पन्नसत्त्वे मानं चापश्यतः शङ्केय
मिति युक्तः प्रतिषेधवचनेत्यस्य प्रतिषेध उक्ते तद्वाचनसामर्थ्यादित्यर्थः एवञ्चाव्युत्पन्न

Digitized by Panjab Digital Library | www.panjabdigilib.org

तेनासमासात् अत्र चेदमपि ज्ञापकं नच प्रकारवचनथालानिष्पन्नस्य यथाशब्दस्य सर्वथा
सादृश्यद्योतकत्वेन सूत्रोदाहरणासंभव इति सूत्रमध्यर्थाभिलिवाच्यं अत्र सूत्रे च व्युत्पन्नस्य
वीप्सायोग्यतापदार्थानतिवृत्तिबोधकस्य ग्रहणेनोदोषात् यथाशक्तीत्याद्युदाहरणोत द्रष्ट
क एव सः यद्यपि यथाशब्द उपमानत्वं द्योतयति इति सकलाभियुक्तोक्तेर्यद्धि शाब्दवा
नित्यादिशाब्दबोधोत्तरमुपमानदेवदत्ताभिन्ना उपमेयो यज्ञदत्त इति बोधः गृहीतविशे
षधर्म एव च साधारणधर्मः लक्षणामूलव्यञ्जनाजन्यबोधस्थल इवोभयोः शाब्दत्वंसु
वचं अतएवोपमानोपमेययोः समानविभक्तिकत्वसिद्धिः एवञ्च सर्वपदार्थप्राधान्याभा
वेन मात्राव्ययीभावप्रसक्तिस्तथापि प्रसिद्धत्वात् कारवचनस्यैवात्र ग्रहणेन तत्सामर्थ्या।
दृष्टिमुनीत्यादावि तदभावेपि समासः स्यादतो सादृश्य इति सूत्रे कृतं तत्रकृतेतु तद्भिन्न
स्याव्युत्पन्नस्यैवात्र सूत्रे ग्रहणम् नच यथावलमित्याद्युदाहरणे प्रकारवाचियात्वेन तस्यैव
ग्रहणमस्तु सादृश्यसम्पत्तीत्यनेनैव च समासोऽस्तु इदं सूत्रं च मास्तु एवं सूत्रे यथाग्रहणं च

Digitized by Panjab Digital Library | www.panjabdigilib.org

दार्थः॰ अधीतइत्यस्यतुनसमासोन्तर्भावोमानाभावात् अन्यत्वंसाहित्यञ्चसहार्थः अन्त्यापि
ग्रन्थसहितमिति अग्निहासहेत्यलौकिकं नचतदधीतइत्यत्रसङ्गः वैकल्पिकत्वात्॰ यथासा॰
असादृश्यइतिच्छेदस्तत्रैववर्त्तमानइत्यर्थः तथाहरइति तथाशब्दस्यसादृश्यार्थकत्वेपिनस
मासः सदृशइत्युक्तेनियमेनप्रतियोग्याकाङ्क्षा॰ दर्शनात्सादृश्यप्रतियोगिवाचकेनैवतद्बोधका
व्ययस्यसमासत्वात् द्योतयतीति सामान्यस्यभेदको।योविशेषस्तद्रूपेप्रकारेयथालितियद्विशेष
वान्हरिस्तद्विशेषत्वंवाच्यतदाभिन्नोहरइतिबोधेयत्तच्छब्दाभ्यांतयोरेकत्वावगमेर्थादुपमानत्वप्र
तीतिरितिभावः सूत्रेपिसादृश्यशब्देनोपमानत्वमेवयथाल्सूत्रेसादृश्यस्यप्रकारशब्देनग्रह
णायत्सादृश्यवान्हरिस्तत्सादृश्यवान्हरइत्येवबोधस्यात्नेतुहरिसदृशोहरइति भाष्यात्तु।
सारित्यास्तुयथासादृश्यइत्यस्ययथाशब्दः सुबन्तेनसमस्यतेसादृश्यद्योत्येनेत्यर्थः यथा
शक्तियथावलमित्याद्युदाहरणम्॰ अतएवभाष्येऽसादृश्यइतिकिमर्थं यथादेवदत्तस्त
थायज्ञदत्तइत्युक्तं ननुसूत्रमेवकिमर्थमित्युक्तम् यथार्थत्वेनतुसिद्धिः सूत्रगृहीताव्ययेन

Digitized by Panjab Digital Library | www.panjabdigilib.org

त्रेष्वत्र कृतस्य पूर्वत्रापकर्षणं वैचित्र्यापत्तेः अनुज्येष्ठं कार्य्यं कृतं अनुज्येष्ठं प्रशंसतीत्यादौ कार
णत्वेनान्वयात्परिनिष्ठितविभक्त्या समाससम्भवे इत्याह ज्येष्ठस्यानुपूर्व्येणेति आनुपूर्व्यं क्रमः पूर्व
मेलोत्यनुपूर्वमिति लक्षणगृहीताव्ययेनाप्यनुना समासः एतस्मात्तत्र प्रयोगात् युगपच्छब्देन तु
न समासः लक्षणगृहीतत्वात् अयथाप्यित्वार्थाव्ययत्र तदुक्तं नयन्नाह चक्रेण युगपदिति युगपद्
तेइति व्याख्यानात्सादृश्यइतिस्वार्थेऽव्ययमितिभावः संपत्तिसमृद्ध्योः पर्य्यायत्वमाशंक्याह
समृद्धेरिति धनधान्यादेरिति धनधान्यादेरित्यर्थः अनुरूपो योग्यस्यात्मनः समस्यमानोत्त
रपदस्यभावः प्रवृत्तिनिमित्तं क्षत्रत्वादिः सम्पत्तिरित्यर्थः सक्षत्रमित्यस्य क्षत्रियाणां योग्यं क्षा
त्रमित्यर्थः तृणमपीति साकल्यबोधकाव्ययेन समासः समासस्य नित्यत्वादस्वपदविग्रहो द
र्शितः तृणेन सहेत्यलौकिकं अपरित्यज्येति यावावयोगेचेति त्यक्ताद्योगस्य बोधः नत्वन्वे
ति तृणेन सह भुङ्क्ते इति बोधोऽत्रां यस्तृणानि भक्षयेत्स कथमन्यत्परित्यजेदिति प्रतीतेः सकलं भो
ज्यमतीत्यत्रैव तात्पर्य्यादिति भावः अग्निग्रन्थपर्य्यन्तमिति बहुव्रीहौ द्वितीयान्तो ग्रन्थोऽन्यप

२९०

Digitized by Panjab Digital Library | www.panjabdigilib.org

क्रियान्तर्भावे लौकार्थो भावः अतिनिद्रू मासीदित्यादौ तथा व्यवहारविषयेति निद्राशब्दस्य ल।
क्षणेति बोध्यं शब्दप्रादुर्भावे त्यस्य शब्दविषयप्रकाशार्थेनाव्ययेन समास इत्यर्थः भाष्यप्रयो
गेति अचः परस्मिन्निति सूत्रे प्रयोगः एतद्भाष्यप्रयोगादेतत्सूत्रे तत्तदर्थबोधकपदघट
कतयागृहीताव्ययेन तत्तदर्थकेन नावेसमासः अत एव यथासादृश्य इति सूत्रे सादृश्यसं
पत्तीति प्राप्तौ नीति भाष्ये उक्तं यथाशब्देन तु भवत्येवोत्तरसूत्रारम्भादिति भावः ननु नित्य
समासत्वाद्वाक्यं दुर्लभमत आह प्रतिशब्दस्येति इदम्प्राचामनुरोधेन वस्तुतः प्रतिस्थानमि
त्यादौ षत्वाभावसंपादनेन साचरितार्था तस्मादर्थे मर्थम्प्रतिप्रत्यर्थमिति सरूपसूत्रादिस्थ
भाष्यप्रयोगात् यदा द्विर्वचनं तदा प्रतिशब्दस्य वीप्सावृत्तित्वाभावात्समासाप्राप्त्या वाक्यं
साध्विति तत्त्वे वक्ष्यमाणद्विर्वचनं तु न समासेन वीप्साया द्योतितत्वात् इति हपवादे सूत्रे केयटः प्रा
तिना तस्या उक्तत्वादिति तत्त्वे शक्तिमनतिक्रम्येति यथावत्प्रयोगे चेति त्का यथावत्त्वं च वोद्धम्
हरेः सादृश्यमिति हरिणा सदृशत्यलौकिकं वक्ष्यमाणेनेति अत्र सूत्रात्तो बोवेद्धि व्याघ्रे पथात्

Digitized by Panjab Digital Library | www.panjabdigilib.org

विभक्त्यर्थादिष्विति॰ अत्र सुबन्तेनेत्यस्य समर्थेनेति विशेषणम् अत एव तदुत्तरं विभक्त्यर्थान्तर्भा
वेनैकार्थीभावः द्वितीयाश्रितेत्यादौ समर्थेन सुबन्तेनोपस्य समर्थप्रकृतिकसुबन्तेनेत्यर्थः
अत एव कष्टंश्रितस्येति पदनिष्ठविभक्त्या समासे पूर्वपदीयविभक्त्यन्तार्भावेणान्वयः अत ए
वेकष्टश्रितस्य धनमित्यादौ षष्ठीद्वितीयान्तं समर्थमित्यर्थान्तरत्वं तिर्भावेनैकार्थीभावादुक्ता
र्थेऽद्वितीयेत्याहुः हरिरिति फलाविशेषेप्यन्तरङ्गानितिन्यायप्रवृत्तिमभ्युपेत्येदं ग्रन्थः समा
नार्थत्वद्धनयनाच्चत्युत्तरमेवात्राधिशब्दप्रयोगः वचनेति प्रत्यासत्त्या पदविभक्त्यर्थयोगिम
त्वाहि विद्यमानार्थे समानार्थत्वद्धनयनाच्चत्युत्तरमेवात्राधिशब्दप्रयोगः समानाधिकरण्या
भाववाचकेनैव समासो यथा त्यादित्यर्थेनात्सत्त्वातेनाभावार्थनिराशशशशृङ्गादिशब्दा।
नामपत्र प्रागभावार्थेन चतेनसनः अत एवात्यययहणं चरितर्थ्यग्रहणार्थं तदुदाहरणं निहि
मेनिः शीतेमिति वस्तुत्वमेवयुक्तं अतीतत्वदर्थत्वाभावात् अतिहिममित्युक्तं तदतिशायस्य
वप्रतीतेः अत्ययशब्दस्तेः सत्त्वगृहीताव्ययत्वाच्चेतिदिक् सम्प्रतिन युज्यत इति वक्तोयुक्ते

Digitized by Panjab Digital Library | www.panjabdigilib.org

पाश्रितत्वेन कथं स्त्रीप्रत्ययान्तत्वमुपसर्ज्जनत्वं। स्त्रीप्रत्यये तदादिनियमादिति वाच्यम् यस्य स्त्रीप्रत्ययान्तत्व
मानेयं तत्त्वमाश्रितं तदर्थं आश्रितस्त्रीप्रत्ययस्यानुपसर्ज्जनत्वमेवेत्यदोषात् प्रत्यासत्त्या तादृशानुपसं
र्ज्जनत्वस्यैव निषेधनिमित्तत्वात् अस्य चातिक्रान्तार्थंमप्रत्युपसर्ज्जनत्वेपि राजकुमारीत्येतदर्थं
प्रत्युपसर्ज्जनत्वमेवेति दिक् नाव्ययीभावा॰ अयं च स्यादित्यिमए वविद्रो ष्टरां नलुगभावस्य
तुनाव्यवच्छेदात् अतिदिशमिति ध य घ पि न पुंसकत्वेनापीदं सिध्यति तथापि चित्रगुरित्या
पर्थे मा वरुपके नगोस्त्रियोरित्यनेनापीदं सिध्यतीति तदुपन्यासः दिशाशब्दस्य शरदादिषुपा
ठेपि लिङ्गविशिष्टपरिभाषयात्र न टचूः समासान्तप्रकरणे लिङ्गविशिष्टपरिभाषाभावस्या
प्याप्तत्वे भाष्येउक्तत्वात् त्वावन्त दिशाशब्दोऽकारान्तप्रकृतिक एवेति मतेटचः प्राप्तेरेवाभावः
अमरस्वारस्याद्दिक्शब्देन विग्रहे तु नकृत्वः प्रयोजनं स्त्यादावेति अादिनेकविंशतिभार
द्वाजं सप्तगङ्गमित्यादि सङ्ग्रहः विभक्तौ स्यादेतीति विभक्तिशब्देन तदर्थो लक्ष्यते वचनश
ब्दः कर्म्मसाधनः प्रत्येकं सम्बध्यते विभक्त्यादयप्रचक्षतत्वादव्ययस्यैव विशेषणानि तदाह॰

Digitized by Panjab Digital Library | www.panjabdigilib.org

ला०प्रा०

२७६

तसमासप्रातिपदिकान्तस्येवक्तव्यस्वरत्यदोष इति भाष्ये स्पष्टं तन्नाद्येवं भाष्यं अप्रधानमुपस।
र्जनमिति सम्बन्धशब्दावेतौ तत्र सम्बन्धादेतत् ज्ञातव्यं यत्प्रतिपदमप्रधाने तस्यैव ह्रस्वो नो भव
तीति यत्प्रथमानिर्दिष्टं तस्य तत्घटितसमासस्य सोऽप्रधानशब्दो नोऽनुवृत्तीति तदर्थः यथ
पितृकुकुटपूर्वीचितिद्वन्द्वे बहुव्रीहावित्र एकविभक्तौ तूपसर्जनत्वं द्वन्द्वः प्रथमान्तानामेवेति चार्थेष्ठ
न्द्र इत्यत्र वक्ष्यते एकविभक्तौ तूपसर्जनं ने सन्नाप्रधानार्थकस्यैवेति मेध्यते पि उद्भूतावयवभेदसमाहितं
प्रति मपरोपदार्थस्य तत्त्वमत्ति: सर्वत्र द्वन्द्वे त्वाहित्यमेव विशेष्यमिति चार्थे सूत्रे भाष्ये स्पष्टम् तथापि
भाष्ये द्वन्द्वे नेति वचनाभ्यामन्तादोषः अत एव कुमारीमिच्छन् ब्राह्मणः कुमारीत्यत्र ह्रस्वो न प्रथमानि
र्दिष्टमित्यादेः प्राप्त्रीप्रत्ययस्यैवात्रोपसर्जनस्य ग्रहणात् अत एव गो वक्तव्यणीत्यादौ वक्तव्यणी शब्दस्य।
गुणशब्दत्वादप्रधानत्वेपि तदन्तस्य ह्रस्वो न एतद्धेतो ल्यप इति सूत्रे भाष्ये स्पष्टं अतिराजकुमारिरित्या
दौ स्त्रीप्रत्यये तदादिनियमनिषेधात् राजकुमारीत्यस्य स्त्रीप्रत्ययान्तत्वे न च तस्यात्यर्थमप्युपसर्ज
नत्वेन कथं स्त्रीप्रत्यये तदादिनियमनिषेधात् राजकुमारीत्यस्य स्त्रीप्रत्ययान्तत्वेन च तस्यात्यर्थमप्यतु

रा०

२७६

Digitized by Panjab Digital Library | www.panjabdigilib.org

त्याप्रयोजनवार्त्तिके ऽ नचेति तु तत्त्वखण्डनं भाष्यरीत्या त्वितद्ग्रन्थिरेवात्रेति बोध्यम् अन्यथा।
चित्रगुरित्यस्य विग्रहे द्वयोरपि नियतविभक्तिकत्वा किमपेक्ष्यं गोशब्दस्यानियतविभक्तिकत्वं स्यात्
एकस्यानियतविभक्तिकत्वे हि तदपेक्षमन्यस्य तत्त्वमित्याद्यं· समासापेक्षमनियतविभक्तिकत्वमेव।
युक्तमाश्रयितुमन्यथा सभार्य्य इत्यत्रोपसर्ज्जनत्वानापत्तिः सहशब्दस्याव्ययतया विभक्ति
मात्राभावेन लुकोऽनुत्पत्तेरेवान्वाख्यानेन चानियतविभक्तिकत्वाभावात्तदपेक्षानियतविभ
क्तिकत्वस्य भार्य्यपेत्यत्राभावेनोपसर्ज्जनत्वानापत्तिः मम तु समासस्यानियतविभक्तिकत्वात्तद
पेक्षं तत्त्वमस्त्यत्रापीति न दोष इत्याहुः गोस्त्रियोः अत्र स्त्रीशब्दः स्वर्य्यते तेन स्त्र्यधिकारोक्तचा
तुर्थिकप्रत्ययलाभः उपसर्ज्जनस्येति गोस्त्रियोर्विशेषणं प्रत्ययग्रहणपरिभाषया च स्त्री
शब्देन तदन्तग्रहणं ताभ्यां च प्रातिपदिकविशेषणात्तदन्तविधिरित्याह उपसर्ज्जनपद इत्या
दि· गोकुले राजकुमारीपुत्र इत्यादौ तु न दोषः महासंज्ञाकरणेन येन शब्देन समासविधौ
यत्प्रथमानिर्दिष्टं भस्यान्तत्रत्यैवोक्तरीत्या ऽ प्रधानत्वेनोपसर्ज्जनत्वात् प्रत्यासत्त्या तदन्तत्

Digitized by Panjab Digital Library | www.panjabdigilib.org

ल० श०

२७५

सा

तितद्भावः पञ्चपसर्जनसञ्ज्ञा न्वर्थत्वादप्रधानस्यैवेत्युपसर्जनं पूर्वमित्यत्र कैयटस्तत्रैत्युक्तमेवेत्य
लम् प्रथमानिर्दिष्टमित्यतोनुवृत्तेः समासइतितदर्थोविग्रहपरमित्याह विग्रहेइतिनियते एकग्रहणाद
वधारणलाभ समासलाभइतिभावः निष्कौशाम्बिरित्युदाहरणे परिनिष्ठितविभक्त्यापिसमासेननिर
क्रान्तो निष्क्रान्तेनेत्यादिक्रमेण तस्यानियतविभक्तिकत्वपाकौशाम्बीपदस्यतदपेक्षयानियतवि
भक्तिकत्वादस्येनोपसर्जनत्वे हेतुत्वे परिनिष्ठितविभक्त्या समासेचेदमेवज्ञापकं अपेक्षस्तात्पुर
षेतुल्यार्थेतिसूत्रेभाष्ये· प्रथमान्तेनसमासइतिपक्षोप्यनेकमितिसूत्रेभाष्येइतिकेचित् परेतु
अनेकमितिसूत्रेभाष्येसमासार्थविग्रहेअन्यासत्त्वासमासापेक्षयानियतविभक्तिकस्यानेनोपस
र्जनत्वमुक्तं ततः कुमारीततकुमारीत्यत्र परिनिष्ठितविभक्त्यापिसमासस्यसत्त्वान्ततदपेक्षया
कुमार्य्यानियतविभक्तित्वमितिन तस्या उपसर्जनत्वमित्युक्तं चित्रगुरित्यत्रचगोपदस्यानेनोपस।
र्जनत्वमंगीकृत्यानेकग्रहणमन्यार्थत्वात् बहूनांसमासस्तुतद्धितार्थेत्यनेनोत्तरपदेद्विगुविधाना
त्ज्ञापकात्सिद्धइतिचोक्तं एवंचोत्तरपदेनपरिमाणिनेत्यपितत्र्व्याख्यातं अतिप्रसङ्गः त्वनभिधा।
नान्न तदुक्तमनेकवचनमुपसर्जनार्थंनचैकविभक्तित्वादिति वार्त्तिककृतान्वर्थत्वानुक्तेस्तद्री

२७५

Digitized by Panjab Digital Library | www.panjabdigilib.org

तिभाष्यसिद्धान्तइतिबोध्यं यत्तुअर्थगताप्राधान्येनान्वर्थत्वेपिपूर्वकायादेर्नदोषोन्वर्थसंज्ञाहियत्र।
सोर्थः संभवति तत्रप्रवृत्तिनिमित्तापेक्षाः प्रवर्त्तन्तेऽन्यत्रतुविधानसामर्थ्यात्तन्निरपेक्षाः यथा।
त्वादीनांकर्मप्रवचनीयत्वेमितिप्रथमानिर्द्दिष्टसामर्थ्यात्सर्वादीनाम्प्रवर्त्ततेइति तन्नानिर्विकल्पस्यो
च्चारणासंभवेनतत्सामर्थ्यायोगात् प्राथम्यादन्वितार्थकत्वाल्लघुत्वाच्चप्रथमेवोच्यतेतस्यवक्तुं
शक्यत्वादित्यलम् उपसर्जनंपू. समासइत्यधिकृतेयोग्यताबलेनसम्बन्धाविपरीतलभ्यतेतदाह
समासेइतिनचतत्रैः कुमार्य्यादितिपरिनिष्ठितविभक्त्यासमासेकुमार्य्याअपिपूर्वनिपातापत्तिरेवे
तिवाच्यं षष्ठ्यन्तेसमासेर्थाभेदात् प्रधानस्यापूर्वनिपातइतिभाष्येतत्समाधानात् अर्थभेदात्
अर्थस्यप्रधानस्याभेदात् समस्यमानराजपदार्थेविनिरूपितसम्बन्धाभावात् अस्यषष्ठ्यन्तस्य
प्रथमानिर्द्दिष्टत्वाभावात्तन्नपूर्वनिपातइतितदर्थः अयंभावः षष्ठीत्यादिसूत्रेयेनसुबन्तेनसमा।
सस्तदर्थनिरूपितसम्बन्धाश्रयार्थकत्वमेवषष्ठ्याद्यन्तंगृह्यतेतदेवचतत्रप्रथमानिर्दिष्टमिति तदुक्तं
कैयटेनराज्ञः पुरुषस्येत्यत्रराजापेक्षयापुरुषः प्रधानमेवेतिनासौभिधीयतेराजापेक्षयातद्भवति।स्थि
तेइत्यत्रप्रधानस्यैवपूर्वनिपातइतिउक्तरीत्याऽप्रधानषष्ठ्यन्तमेवतत्रप्रथमानिर्दिष्टं प्रधानमि

Digitized by Panjab Digital Library | www.panjabdigilib.org

भाष्ये गोवत्समाधानात् प्रकृते च राजनिरूपितप्राधान्यं कुमार्य्या इति न तदपेक्षोऽस्य पूर्वनिपातः
न चैवं पूर्वकायाद्यसिद्धिः कायनिरूपितप्राधान्यस्य पूर्वपदार्थे भावादिति वाच्यं समासशास्त्रस्य
प्रथमानिर्दिष्टशब्दगताप्राधान्यस्याप्रयोजनादोषात् समासशास्त्रे च प्रतिपदप्रधानं तं प्रति त
दुपसर्जनमित्यर्थात् भवति श्रितादीन्प्रति द्वितीयातथा सहयुक्ततृतीयान्तार्थस्य शब्दतुल्याध
न्यपितामावत्प्राप्राधान्येपि तत्समभिव्याहृतप्रथमाद्यन्तार्थे तदधीनत्वरूपाप्राधान्यप्रतीतिः अ।
तएव समकक्षयोरप्येकस्य परेणाक्षेपागन्तव्यमित्युक्तेः एवं दर्शिते प्रकृतेपि द्वितीयान्तं श्रिताद्यधीनं
तं विना समासाघटकत्वात् श्रितादिकं तु तं विनापि समासानारघटकमिति द्वितीयान्तस्य श्रिताद्यधी
नता एवमन्यत्राप्यूह्यं यच्छब्दस्य समासविधौ यत्प्रथमानिर्दिष्टं तत्प्रतितदुपसर्जनमिति वक्त
व्यमिति वार्तिकप्रत्याख्यानामतत्राप्यप्रवृत्तेः भाष्येऽपि यत्प्रथमानिर्दिष्टमप्रधानं तं शब्दं प्रति तत्प्र
थमानिर्दिष्टवाच्यं पदमुपसर्जनमित्यर्थस्यैवौचित्यात् अतएव पंचपदी इति भिन्नलिङ्गनिर्देशः
बहुव्रीहौ त्वेकविभक्तीत्येवोपसर्जनत्वमिति अनुपदमेव स्फुटीभविष्यति अन्वर्थविरोधाभावेन

Digitized by Panjab Digital Library | www.panjabdigilib.org

प्रवक्ष्यामीति तिसृप्रथमायामात्सदृशीमित्यर्थेऽसाधुत्वात् इत्यन्यत्र विस्तरः एतद्योगविभागसि
द्धसमासस्य विशेषसञ्ज्ञानसमेव तत्तदधिकारेषु पाठात् जीमूतस्येवेति अत्र यथार्थत्वादिप्र
सक्तोऽव्ययीभावस्तु न तत्र तस्येवेति निर्देशात् अव्ययी अव्ययमनव्ययं भवतीति भवतेर्ल्लोउपसङ्ख्या
नमिति कर्त्तरि क्तः महासञ्ज्ञाकरणं प्राचामनुरोधात् योगो विभज्यत इति भाष्ये विद्वं न दृश्यते
अपदिशमित्यादिमानानां स्वरादिपाठादव्ययत्वे अपदिशेनेत्यादि तु चिन्त्यमेवेत्यन्ये ननु समासग्र
हणे विभक्त्यपप्रथमानात्वे आश्रीयमाणे कष्टं श्रितादौ श्रितस्य पूर्वनिपातापत्तिर्निर्दिष्टप
दस्याव्ययमत आह समासशास्त्रे इति समासविधायकशास्त्रे इत्यर्थः न च राज्ञः कुमारीं श्रितो रा
जकुमारीश्रित इत्यत्र द्वितीया श्रितेति सूत्रे प्रथमानिर्दिष्टत्वेन कुमारीशब्दस्य पूर्वनिपातापत्तिरि
ति वाच्यं अप्रधानमुपसर्ज्जनमिति शास्त्रान्तरोक्तमहासञ्ज्ञाकरणेनास्य तदर्थकत्वात् समा
सशास्त्रे प्रथमानिर्दिष्टमप्रधानत्वसमानाधिकरणोपसर्ज्जनवदिति वाच्यार्थे निष्पन्नेऽप्रधा
नत्वस्य च सम्बन्धिकत्वात् यम्प्रति यदप्रधानं तं प्रति तदुपसर्ज्जनसंज्ञमित्यवगतेरदोषात् इति

Digitized by Panjab Digital Library | www.panjabdigilib.org

दायस्यविभक्तियहणोनाग्रहणात प्रथमयोः प्रत्ययोरेवग्रहणमाख्यातमिति उक्तं कैयटेने
त्यन्यत्रविस्तरइत्याहुः अनुव्यचलत इति अनोर्व्यचलदित्यनेनेवस्थाचलदित्यनेनापुग
पत्समासः अनुइति सुवन्तेन व्यचलदिति समुदायस्य समर्थत्वात् सुपेति इदं लक्षणम
धिकारेच अन्येफलन्तुदेवः करोति मातुः स्मरतीत्यादौ विशेषणसमासषष्ठीसमासयोरभा
वः सुपोधा अङ्गनिमित्तस्यसुपइत्यर्थभ्रमवारणायाङ्गस्य सुप इतिनोक्तं पूर्वनिपातइ
ति भूतशब्दस्येवेत्यर्थः अन्यथाविनिगमनाविरहेण प्रथमानिर्दिष्टत्वाविशेषादनिय
मः स्यादितिभावः अतनिर्देशादीदृशेविषये अवयवषष्ठ्यादेः सामर्थ्ये व्यपेक्षा वृत्तिः विस्प
ष्टपटुरित्यादावपि विस्पष्टादीनि गुणवचनेष्विति गणके बोध्यं न चहि विस्पष्टमित्यादिप
दत्वादिविशेषणमिति कैयटेस्पष्टं इवेनेति हतिनकीभुंक्ष्वरमानन्मातेवहितकारि।
णी मित्राद्यसाध्वेवतिङ्समानाधिकरणे प्रथमा अभिहितेप्रथमेति वार्त्तिकस्वारस्ये
नप्रथमापासत्त्वात्तत्रकारकविभक्तित्वोक्तिप्राभाव्यपेक्षावेक्षिप्रयोगएवप्रथमायाः

Digitized by Panjab Digital Library | www.panjabdigilib.org

।हितं समाससंज्ञकमित्यर्थः समस्यते इत्युक्ते स्त्वबुधानां निवृत्तये :शब्दयो रनेन संश्ले
षः क्रियते इति व्युत्पत्तिपक्षे स्यादनुसारेण । सेद्धं वक्ष्यमाणं च सम्बोध्यार्थः प्राक्कडारात् इत्यतः
प्राग्ग्रहणमावर्त्तते तेन प्राक् समाससंज्ञका भवन्तीति तत्संज्ञास्तेनाव्ययीभावादिसंज्ञा
का इत्यर्थस्तत्पोल्लसमाविद्या इति भाष्ये स्पष्टं अन्यथा कडारत्वात्पर्यायः स्यादिति दिक् अत्र
सुबिति एकत्वं विवक्ष्यते तेन महिष्याश्रमात्पाश्चश्रीः मित्रस्यत्र सुबन्तसमुदायेन न श्री शब्दे
दैन समास इति कैयटादयः परे तु अनुवाद्यत्वादेकत्वाविवक्षैव किंच तद्विवक्षैव किंच तद्वि
वक्षायामेकेनैव केनचित्सुबन्तेन किञ्चिदेकं सुबन्तं समस्यत इत्यन्ये त्वन्यानि तस्मात् सुबित्या
दौ जातिविवक्षा एवं च पश्यत्वाकुः ग्रहणेन त्वाकुः समुदायस्य नत्रहणं त्वाङ्गस्य प्रत्येकं स
मासत्वात् एवं सुबन्तत्वादेरपि प्रत्येकं समासत्वेन सुबन्तादिग्रहणेन सुबन्तादिसमुदायस्य ग्र
हणमिति नोक्तदोषः स्पष्टं चेदं मनुष्यकृत्ससमर्थसूत्रयोर्भाष्ये तत्र समर्थ कैयटादीनां तु प्रमादः
अत एव विभक्तिश्चेति सूत्रे प्रतिप्रत्ययं विभक्तिसंज्ञेति पक्षे प्रथमयोरित्यादौ विभक्तिः समु

त्व

Digitized by Panjab Digital Library | www.panjabdigilib.org

ग्रहणाच्च गतिर्गतावितिसूत्रे पदस्येत्यधिकारात्समर्थपरिभाषोपलक्षितेतिकेचित्ः स्वरसेन्तुप
दत्वेन वा यत्र साक्षादुद्देश्यता तत्रैव प्रवर्त्तते तेनान्यात दितरेत्यादौ नास्याः प्रवृत्तिः एकार्थीभा
वश्चालौकिकविग्रहकल्पते यथाशास्त्रादौ द्वितीया सामानाधिकरण्यं दृष्टालकारोपितकल्पना
तथात्रान्यपदार्थे समर्थग्रहणार्थे इत्यनुवादबलादस्य तत्र कल्पनेति। तस्याच्च शास्त्र विधायके
भाष्ये तस्याः प्रथमासमानाधिकरणेनार्थेनायोगादादेशानुपपत्तिस्तस्य ह्यापि प्रयोगाभावा
दित्याह। द्यादेशो सामानाधिकरण्यं दृष्टानुमाहन्तावश्यकृतेत्याचितत्र भवतीति। तत्र केचित्ः
सिद्धानां शब्दानामन्वाख्यानात्यचनं देवदत्तस्य श्येत्यादिप्रयोगदर्शनात्तस्या निर्वाहः प्रक्रिया
र्थोच्चिहितस्याः प्रथमासामानाधिकरण्यमनुमीयतेइति अत्रानुमाने सोत्रान्तुवाद एवाहुकल
लार्कः अत्र प्रक्रियार्थोच्चिहितस्येत्यनेनान्यस्यापि प्रक्रियार्थकल्पितस्यलोके बोधकत्वं सूचित
मित्यन्यत्र विस्तरः समर्थः किं पश्यकृष्णं श्रितोरामभित्यत्र कृष्णाश्रितयोः परस्परमन्वया
भावेनैकोपस्थित्यजनकत्वेनासामर्थ्यं सहसुपा। सुवामंत्रितमित्यतः सुवितिवर्त्तते सुवन्तस

Digitized by Panjab Digital Library | www.panjabdigilib.org

सङ्ख्यानवगमोप्येकार्थीभावकृतः सङ्ख्याविशेषप्रकारेण तत्तदर्थभाने प्रत्ययरूपस्थितेस्तंत्रत्वात्
पश्यायघटाइत्यादितो बहुत्वेनैव त्रिचतुरादिव्यक्तीनां भानं न तु त्रित्वचतुष्ट्वादिना तथा बहुत्वजत्वादिनै।
कानेकव्यक्तिभानं तात्पर्यवशान्नत्वेकत्वबहुत्वादिना एवञ्चावकीनो वो व्याकीणा इत्यादौ सम्बोधन
त्वेनैव[illegible]कानेकव्यक्तिभानं नत्वेकत्वबहुत्वादिना विग्रहवा[illegible]क्येकवचनत्वारोपेणग्रहणात्तद्वि
मात्रेन तु तद्बोधः वृत्तिस्वभावविरोधादिति मञ्जूषायां विस्तरः गमकत्वादेव शिवस्य भगवतो भक्त।
इत्यर्थे शिवभागवत इति अयं शब्दोतिष्ठत्वभाष्यप्रयोगः यत्नु तत्र वृत्तावेव न तु शिवस्य भाग
वत इति वाक्यं साधु तत्र भगवच्छब्दादण् शिव पदेन भगवच्छब्दस्य समासस्तु गुणपदिदेवेति बोध्यम्
तत्त्वोपस्थितिस्तु समुदायशक्तिसाध्या एवञ्च कृत्प्रत्ययनये एवमिति सेन युक्तं महाबाहुः सुप
न्याइत्या[illegible]दावाला घनापत्तेः मतःसर्वे गत्याप्रयोगात्तु साधुतावयुक्तं तदुक्तं वृद्धैः जहत्स्वा
र्था तु तत्रैव यत्र रूढिर्विरोधिनीति अवयवार्थविरुद्धो यत्र समुदायार्थस्तत्रैवेति तदर्थः यथा गो
रथं कृष्णसर्पादौ परिभाषेयं· साच पदविधौ इति सत्रस्थत्वात् समासे गुलेः संग इत्यादौ समास।

Digitized by Panjab Digital Library | www.panjabdigilib.org

श्री०ला०

२३१

काधिकयोगे तु अधिको लोकोहत्तो तिप्रपद्यमेव उपपदार्थ इति उपोधिकेचेतिकर्म्मप्रव
चनीयत्वम् ननु मामनु द्विश्य विनियोक्ष्यत इत्यर्थादित्र कर्म्मणि द्वितीयैवेति किं कर्म्मप्रवच
नीयत्वेनेत्यत आह गतित्वादिति तिङि चेति उदात्तवतीति तिङन्तेगतिर्निहन्यत इत्यर्थः अ
त्र तिङ्ङतिङः इति विघातस्य निपातैर्यद्यदीत्यादिना निषेधात् करिष्यतीति तिङन्तस्योदा
त्तवत्वमिति सर्वेष्टसिद्धः इति विभक्त्यर्थाः समर्थः पदविधिशब्दः कर्म्मसा
धनः शेषषष्ठ्या समासस्तदाह पदसम्बन्धीति पदविधिसहचरितोपि पदविधिशब्देन
गृह्यते अतएव सनन्तादावेकार्थीभावः पदविधिश्च समाससञ्ज्ञादित्तस्य चेन साम
र्थ्यं साक्षात् विशेषणमसंभवात् अत आह समर्थाश्रितइति सामर्थ्यं चाच्चेनम्पेक्षाव्या
ख्यानात् समासादिवृत्तिषु तस्याभावाच्च किन्त्वेकार्थीभावः सचविशेष्यविशेषणभावावगा
ह्युपस्थितिजनकत्वं संसृष्टार्थं समर्थमिति भाष्योक्तेः अतएव राजपुरुषेकदेशे राज्ञि स्फद्धस्यापा

२३१

दिविशेषणान्वयो नदेवतस्य उरुकुलमित्यादौ तु गमकत्वाद्भवत्येव वृत्तिः एवं राजपुरुषस्यादौ विशे

एरंएत्वाम स्याप्तिपदिकार्थएवस्यात् मलेनेति नक्षत्रेलप्युक्तः कालइत्यलोलुवविशेषइ
तिलुप् नक्षत्रेकिं पञ्चालेभुतिष्ठति जनपदेलुविति लुप् सप्तमीपञ्चम्यौ कालाध्वनो
रित्यतस्तदनुवर्त्तते तच्चपञ्चम्याविपरिणम्यते मध्यसावधिरूपसापेक्षतयाद्विवचना।
न्तेन समासः बोधस्तुशक्तित्वेन शक्तिद्वयस्यनतुद्वित्वेनेतिबोध्यम् ननुकर्त्तृरूपस्य
कारकस्यैकत्वाद्द्वन्द्वनिबन्धनमध्यव्यपदेशासम्भवोतआह शक्तिद्वयमध्येयादिति कर्त्तृ
त्वादिशक्तिरेवकारकंसाचक्रियाभेदेनभिन्नेति यद्यप्यवध्यवधिमतोः सजातीयनियमान्न
कालाध्वानौकारकमध्येसंभवतः तथापिशक्तिशब्देनतदाधारकालग्रहणान्नदोषः व
स्तुपवादोयं त्वानन्तरं कालवर्त्तित्वादिकं विभक्त्यर्थः शक्तिद्वयमध्यवर्त्तित्वंवस्तुसन्निमि
त्तं अधिकशब्देनेति कर्त्तरिक्तप्रत्ययान्ताध्याहृतशब्दार्थकाधिकशब्दयोगेलोकप्रसिद्धात्
षष्ठ्याम्प्राप्तायांज्ञापकादिमेइष्यतेइत्यर्थः तदस्मिन्नधिकमितिसूत्रेभाष्येतुउपश्लिष्टप
दाध्याहारेणोपश्लेषिकेधिकरणेसप्तमीत्युक्तं कर्म्मेति। क्तप्रत्ययान्ताध्याहृतशब्दार्थ।

Digitized by Panjab Digital Library | www.panjabdigilib.org

धीरतो इतिसूत्रबोधितनिर्धारणस्य विभक्तस्यार्थत्वं संगच्छते उद्धृतावयवविवक्षायां तासामिति
बहुवचनं तिरोहितावयवभेदविवक्षया निर्धारणविषयेप्येकवचनं त्वसाधुरिति काशकेंधि
तिकृपादिति उक्तं भिद्यवोन्यपादिस्यादेतु सोत्रौनिर्दिष्टा इति नदाशयः द्वन्द्वः सामासिकस्य
चेत्यत्र समासलक्षणमध्ये इत्यर्थः समर्हेऽर्थे चेति ठक् पञ्चमीति यतश्च निर्धारणमित्यनुव
र्ततेविभागोत्रभेदः तत्रनिर्धारणे सर्वत्र यथाकथंचिद्भेदस्य सत्वेन विभक्त्यन्तरासामर्थ्या
त् यत्रभेद एव न तु केनाप्युपात्तरूपेणाभेदस्तत्रैवायं विधिरित्याह भेदएवेति अत्र पञ्चम्य
र्थोनिर्धारणविषयत्वात्पएव पाटलिपुत्रकावधिकनिर्धारणविषयामाथुरा इति बोधः
साधुनि· निपूर्वात्सुणाकर्म्मणीति प्रभेइत्यतःइगुपधलक्षणः कः अर्चैतेश्च भौवादिकाद्गुरो
श्चहलः इत्यप्रत्ययः अर्चीर्चौतादिकात्तु णासंश्रन्थेतिपुच्स्यात् यष्ठापवादोयं अप्रत्या
दिभिरिति लक्षणोक्तमितिसूत्रोपात्ताः प्रत्यादयः नक्षत्रेच लुपि राबेनलुसञ्ज्ञयालुप
प्रत्ययार्थोलक्ष्यते इतिबोध्यम् अधिकरणे किम् अद्यपुष्यः आसतितदनुवर्त्तो अन्त

एवं चात्रितयोपादानएवानिर्धारणप्रतीतिरिति गुणोत्तमइत्यादौ समर्थपदसामान्ये षष्ठी

Digitized by Panjab Digital Library | www.panjabdigilib.org

स्वामर्थ्ये इति नोक्तं दीयते इति श्रुत्यत्वाद्दीयमानां शाद्रूपं दायमादत्ते इति सोपसर्गाद्दायाद।
न्नादत एव निपातनात्कः कगवादिकं च दीयमानेन्चेति नित्यमाकाङ्क्षत्वाहृत्तिः दायाद
शाप्दः स्वामिपर्य्यायइत्यन्ये षष्ठ्यास्येति शेषे षष्ठीत्यनेनेति भावः तात्पर्य्ये इति आसेवा
पंदस्य तत्र रूढेरितिभावः तात्पर्य्यं च तदेकव्यापारता आयुक्तयोगेऽधिकरणत्वविवक्षा
यां सप्तमी प्राप्ते सम्बन्धविवक्षायामत्र कुशलयोगे च षष्ठी प्राप्ते वचनं यतश्च जाति
गुणक्रियासंज्ञाभिरिति विशिष्टस्येत्यध्याहारः तद्विशिष्टस्य एकदेशस्य यतः स्वघटि
तत्समुदायात्स्वेतरसमुदायघटकव्यावृत्तधर्म्मकारणकं पृथक्करणं तथा च का त्वषष्ठी
त्यर्थः यतश्चेति वि॰ यस्य जात्यादिविशिष्टस्य स्वेतरव्यावृत्तधर्म्मवत्त्वेन बोधनं तत एव मा
भूत् षष्ठ्यपवादत्वं तत्सप्तम्यपवादत्वस्यापि संभवात् स्वघटितसमुदायावधिकस्वेतर
समुदायघटकव्यावृत्तधर्म्मकारणकपृथक्करणरूपनिर्द्धारणविषयोन समुदायावय
वो द्विजः श्रेष्ठ इति बोधः संसर्गघटककरणं च श्रेष्ठत्वादिरूपमेव प्रत्यासत्तेः अत एव नानि

Digitized by Panjab Digital Library | www.panjabdigilib.org

समर्थ्यकादकर्त्तृसमर्थ्यकाच्च सप्तमी स्यादित्यर्थः सप्तम्यां च तदन्वयिक्रियावाचकाद्धातोरप्रथमा
सामानाधिकरण्ये शतृशानचावेव लक्ष्यलक्षणभावाविवक्षायामिदं सत्स्विति सतो
हि तरणक्रियाकर्तृसत्तासम्बन्धि असत्कर्तृकमासनमिति बोधः. स्वक्रियाधिकरणकालावृ
त्तित्वं सम्बन्धः असत्स्विति तरणक्रियाकर्तृत्वार्हाः तरणक्रियाकर्तृसत्तासम्बन्धत्वानर्हा
णां तदकर्तृत्वमत्र यद्यपि स्थितिक्रियाकर्तृत्वार्हत्वेनेदं सिद्धं तथाप्यसतां तरणक्रियानर्हत्वा
दिकमपि बोध्यविषयस्थितिभावः सत्स्विति तरणक्रियाकर्तृत्वार्हाणां तदकर्तृत्वमत्र असत्
स्विति तरणकर्तृत्वानर्हाणां तत्कर्तृत्वमत्र षष्ठी चानादरे इति विषयसप्तमी यस्य च।
भावेनेत्यनुवर्त्तते अनादरे गम्यमाने सति यस्य क्रियया क्रियान्तरं लक्ष्यते ततः सप्तमी षष्ठी
चेत्यर्थः कलितमाहानादराधिक्य इति लक्ष्यलक्षणभावः षष्ठ्यर्थः अनादरविशि
ष्टे प्रव्रजनं धात्वर्थः तत्र षष्ठी तात्पर्यग्राहिका अनादरश्च प्रव्राजनस्य पुत्रादिविषयक एवेति
भावः स्वामीश्वरा० शब्दपरत्वाद्विरूपाणामपीति नैकशेषः पर्यायानां संग्रहाय स्वा

Digitized by Panjab Digital Library | www.panjabdigilib.org

द्वारैव क्रियान्वय इति व्युत्पत्तेः तत एवाक्षशौण्ड इत्यादौ समासः अत्रासक्त्यादिक्रियान्तर्भावेनान्वयो
धानानुभवात् क्रियाद्वारा सामर्थ्यमिति केचिदाहुस्तन्न युक्तं मूले वृक्षः कपिसंयोगीत्यादावतिक्रि।
यामध्याहृत्य तस्याः स्वकर्तृक कपिसंयोगि वृक्षद्वारा मूलवृत्तित्वाद्याधारत्वविशिष्टवृक्षस्य समूल
वृत्तित्वबोधेप्यत्रावयवे तद्विशिष्टवृक्षाभावप्रतीतेः कपिसंयोगे वृक्षद्वारा मूलवृत्तित्वबोधे याधारत्व
विशिष्टवृक्षस्य समूलवृत्तित्वबोधेप्यत्रावयवे तद्विशिष्टवृक्षाभावप्रतीतेः कपिसंयोगमेतदव
च्छेद्यत्वं फलतीति दिक् चकारादिति प्रातिपदिकार्थ इति शेषः त्रिधेति तत्र सकलावयवव्याप्तौ।
व्यापकाधारत्वं यथा तिलेषु तैलमिदमेव मुख्यमधिकरणमिति त्वाचीनसाधकतममित्यत्र
भाष्ये स्पष्टं उपसमीपश्लेषः सम्बन्धः तत्कृतमौपश्लेषिकं अत एव कोप्यगाच्चीत्यादावौ।
पश्लेषिके आधारे सप्तम्युक्ता संहितायामिति सूत्रे भाष्ये तत्राजादित्वसामीप्यमेव गादीनां
यत्कालउच्यते गवां दोहे आगत इत्यत्राप्यधिकरणसप्तम्येवेत्यन्यत्र विस्तरः आर्हतां कर्तृ।
त्वार्हतां तद्वैपरीत्ये आर्हतामकर्तृत्वेनार्हतां च कर्तृत्वे इत्यर्थः वाक्यचतुष्टयमेतत् कर्तृ।

Digitized by Panjab Digital Library | www.panjabdigilib.org

ल० श्री०

२९६

के आयुष्यादियोगे चतुर्थीषष्ठ्याविरत्यर्थः अत एवैतदर्थकचतुर्थ्यन्तेन तु हितादिभिर्न स।
मासः उभयोरपि क्रियान्वयेन परस्परसामर्थ्यात् अत एव हितेन चतुर्थीसमासविधानं तद्योगे
चतुर्थीज्ञापकमित्याकरोक्तं संगच्छते अनुपदं वक्ष्याम उद्देश्यविधेयभावेनान्वयात् आशीर्विषये च
तथान्वयान्न समास इति तत्र वस्तुतोऽपि प्राप्तत्वादिपर्यालोचनेन लोहितोष्णीषा इत्यादौ तथा-
न्वयदर्शनात् भाष्ये तथान्वये वक्तुः साधुतायाः अनुक्तेश्चेति समासवादे मञ्जूषायां विस्तरः।
व्याख्यानाद्धिति स्वरेर्थशब्दः पृथक् भिन्नमिति भावः भाष्ये तु नैतद्दृश्यते इति बोध्यम् आधा-
रो। कारके इत्यधिकारात् क्रियाजनके एतत्स्वरूपावस्थितत्वादाधारः क्रियाया एव तत्रोक्तमिति तम।
स्वतंत्रपदार्थाभ्यां साक्षात्क्रियाधारयोः कर्मकर्त्रोः संज्ञान्तराभ्यां बाधात्स्वरूपपरया तदाश्रयस्य ग्रहणं प-
रंपरया कर्तृकर्मद्वारकैव व्याख्यानादित्याह कर्तृकर्मद्वारेति यद्यपि कालस्य साक्षात्क्रिया-
परिच्छेदकत्वं तथापि तदधिकरणत्वं कर्तृकर्मद्वारैव तथैवानुभवात् साक्षात्तदाधारत्वे चि।
आधारपदे स्वरितत्वप्रतिज्ञानात् स्वरूपाधारस्य ग्रहणं किन्तु साक्षात्तदाधारत्वे कर्तृत्वमेव तस्य स्यात्

२९८

कालः पचति भूतानीति वत् एवं च क्रियान्वयोऽप्यस्य कर्त्राद्यन्वयद्वारैव परस्परया कारकत्वे तस्य त

Digitized by Panjab Digital Library | www.panjabdigilib.org

निरित्यौणादिके निः सच भविष्यति भविष्यति गम्यादयः इत्युक्तेः गामीति पाठे बाहुलकाद्वृद्धिः शतं
दायीति आवश्यकाधमर्ण्ययोर्णिनिः आवश्यके णिनावव्ययं निषेधः सत्वेत्राधमर्ण्यपदेन
नत्स्वत्रार्थोपलक्षणात् अत एवावश्यंहारीति निर्देशः संगच्छते तत्र त्याद्यावश्यके णिनिः नच तत्र भ
विष्यदर्थकत्वेन सिद्धिः वर्तमानेप्यावश्यकत्वबोधनस्यैवेष्टत्वेन भविष्यत एव तत्त्वाबा
धादिति वाच्यं वस्तुतो भविष्यतो बोधेपि तत्त्वेनाबोधात् णिनेस्तादर्थ्यकत्वाभावाच्च अत एवाव
श्यंकारी कटस्येति षष्ठ्युदाहृतं संगच्छते तत्र हि नान्येन णिनिः अवश्यपदोपादानात् किन्तु लुप्य
मानाविषये वृत्तिनव्याः कृत्यानां कर्तरि कर्मणोरिति नियमाच्छेविभाषा कर्मणि वस्तुर्थे कर्तृग्रह
णं अनुवर्तते इति निषेधो वं कर्तरि कर्मणि चकर्तरि वेति त्वनुभयप्राप्ति विषयमिति केयदाद
यः ब्रजन्मित्यत्र गुणकर्मणि वेष्यते इति विकल्पस्तु न कृत्याति तिङ्क्वे चरितार्थस्य तस्य दोग्ध्रव्या
गावः पयः इत्यनेन्यादौ गुणकर्मणा उक्तत्वात् प्रधाने चरितार्थेनेन पाल्यबाधात् तुल्यार्थैर्योगार
ति तुल्यत्वार्थैरित्यर्थः अत एवातुलोपमाभ्यामिति चरितार्थम् अत एव पर्युदासादनव्ययप्रयोग
एवेदं तेनेव शब्दयोगेन चतुर्थी चाशिषि आशीर्विषयक्रियान्वय्यर्थकात्तानिपादिकात्तद्धा

Digitized by Panjab Digital Library | www.panjabdigilib.org

लं०श०

२६७

॥नपुंसके भावे क्तः ... नात्र तस्याप्यकर्मकेभ्य एवेदः अविवक्षितकर्मतयाऽकर्मकत्वेन क्तस्तु
॥हृत इत्यादि वृत्तिविषय एवेत्युक्तं एवं चेह हेः स्त इत्यादौ परत्वेन क्तोऽधिकरणे चेत्यनेन भावे क्त
॥शेषत्वविवक्षयैव षष्ठी साधनस्यावश्यकत्वेनेदं शेषत्वविवक्षया भाष्ये अस्याख्याते वार्त्तिके
॥न चानेन कारकषष्ठीनिषेधाविषयो शेषत्वविवक्षानेति वाच्यं तथापि शेषत्वविवक्षया भाष्योक्त
॥तस्य त्याख्याने तु अनभिधानात् क्तातिरिक्तविषयेन साधारणगुणे तिलक्ष्ये भाष्ये ध्वनितम् ।
। इदं तु न हि सति किंतु दाहरणं आलोच्य कुर्वन् नैतदस्ति कारकषष्ठ्या निषेधात् शेषषष्ठ्यां तु न ।
लतास्य कटमित्यर्थे नाम मध्यादित्याद्यर्थकमुक्तमितिपरे अधीयन्निति इङः धातोः शतृ ह्रा
लीति शतः द्विषन्निति द्विषोऽमित्र इति शता शेषषष्ठीत्विति इदं चिन्त्यमित्युक्तं परैः अकेनोः अ
त्र यथासंख्यं नेष्यते अकस्याधमर्ण्ये ऽसम्भवादाह भविष्य०त्यकस्येति वर्षशतस्य पूरक इत्या
दौ एतत्कर्मकयानन कर्त्तरि इत्यर्थके गपततो लक्ष्यन्ते ऽस्य यानका इत्यादौ च षष्ठी भवत्येव कर्त्तरि ।
मात्रार्थके ण्वुल् लृट् चावितित्वुलि पदान्तरसम्बन्धेन भविष्यत्वप्रतीतावश्यकस्य न त्रावल्नेः तुम
न्ण्वुलावितित्वुल् तु भविष्यतीत्यधिकृत्य विधानाद्भविष्यदर्थक एवेति भावः व्रजं गामीति गमेरि

२६७

हस्या। पि सत्त्वेन कृदन्ताच्छक्तियह प्रयोज्या। यस्य इति विषयत्वं क्रियाया। अस्त्येव भवत्येव षष्ठी
अत एव तद्धिते मा भूदित्येवोक्तं न तु तद्धिताधिक्ये इति भाष्येपि तद्धितस्य ये कर्त्तृकर्म्मणी।
तच्च मा भूत् कृतो ये कर्त्तृकर्म्मणी तत्रैव यथा स्यादित्येवोक्तं न तु तद्धिताधिक्ये इति भाष्येप्य
तद्धितस्य ये कर्त्तृकर्मणी तच्च मा भूत् कृतो ये कर्त्तृकर्मणी तत्रैव यथा स्यादित्येवोक्तं कृतग्र
हीति अत्र कर्म्मविशेषणस्य तद्रूपेण प्रागन्वयाविवक्षया ऽकर्मकत्वाद्भावे क्ते पूर्वादिनि
ति तद्धितस्तदन्तान्तु विशेष्यतद्वेतां कर्म्मयोगो भवत्येव तत्रोक्तरीत्या षष्ठ्यभावे नाभि।
हितस्याद्वितीया एवं रीत्या ऽसाधुत्वे ऽत्र भाष्यमेव मानं ब्रूते ऽपूर्वमिति उकारेण व्याख्या।
नात्तदन्तविधिर्व्यपदेशिवद्भावेनोकारस्यापि समाश्रंसेति अलोकेति तिच उश्स्तु चौ धातु
कत्वषपत पदेस्तुकत्वद्धिस्तत्वं कमेरिति उकान्तस्येति शेषः इदं च भाषायामेव भाषा।
यामिति भाष्योक्तः निष्ठेति एतदपवादतया भाष्यवार्त्तिकं पठ्यते नपुंसके भावे क्तस्य यो
गे षष्ठ्या उपसंख्यानं छात्रस्य हसितमिति इदञ्च प्रतिपदोक्तत्वान्नपुंसके भावे क्तः इति सूत्र
विहितक्तान्तयोग एव अत एव भावे नेदेशंमित्यादौ गत्यर्थाकर्मके नेत्यनेन क्तेनाने न षष्ठी

Digitized by Panjab Digital Library | www.panjabdigilib.org

ल०श्रो०

भावात्कर्तुः कर्तृत्वाभावेन नकत्वस्त्यहे तुत्वसत्त्वात् धातोश्च द्विपे प्रत्ययाप्तिदुः हृतश्च
तद्धितपे प्रत्ययाप्तिः हृतश्च तत्र तिङ्ग्रेन न लोकेति निषेधात् कृद्योग एव भविष्यतीति किं
तेनेन न लोकेति सूत्रे कृद्ग्रहणस्यैव ग्रहणं तु अव्ययार्थस्य पे कर्तृकर्मणीति व्याख्यानेन नहि
द्वंउभयप्राप्ताविस्यत्र बहुव्रीहिस्तु एकार्थ्येहि इत्यादाविवान्यपदार्थस्याशाब्दत्वेपि व्याख्या
नाद्भविष्यति नच भेदिकादेवदत्तस्य पत्युः स्यवकापानामित्यादौ गुणाभवेत्तिचेन्न कृ।
त्यर्थे कर्त्रीति षष्ठ्यर्थे करोतीति कृदिति कर्तृपरत्वादिति वाच्यं तृतीयावत्तत्र षष्ठ्या अपि वि
नैव यत्नं सिद्धेरिति संक्षेपः तद्धितेइति तद्धितान्तशक्तिग्रहमात्रविषयक्रियायाः कर्तरि कर्म
णि च मा भूत् इत्यर्थः उदाहृतेषु सकर्मकप्रकृतिकभावक्तान्तस्येदृशा वृत्तिमात्रविषयता
याभाष्यसंमतत्वेन तस्य केवलस्य काप्यप्रयोगेण तद्धितान्तसमुदायप्रान्तेपे वक्रियायस्या।
यकत्वात् कृत्ग्रहणात् कृदन्तशक्तिग्रहप्रयोज्योपास्थितिविषयक्रियाकर्तृकर्मणोर्ग्रह
णं न चात्रेतथा तंदुलानां पाचकतवइत्यादौ च पाचकादेः पृथक्प्रयोगेण तच्छक्तिग्र

Digitized by Panjab Digital Library | www.panjabdigilib.org

पकइत्यर्थकस्यधराहृत्लाध्यापकइत्यस्यसिद्ध्यर्थंमलोपबचनमारब्धंभाष्येऽन्यथा
समासेनसिद्धेतद्व्यर्थंस्यात् एतदेवभाष्येततः बष्ठ्यभावेपिमानमन्यथाबष्ठीसमास
स्यात्तृजकाभ्यांकर्त्तरीत्यादिनिषेधेस्तत्कसामर्थ्यापित्तप्रवृत्त्यातत्समासेनैवसिद्धेनलोप
वचनंव्यर्थमेवस्यादितिवोध्यं नचभिन्नपदत्वेपितत्याप्रयोगसाधुत्वार्थंमलोपबचन
मितिवाच्यं तथासतिवाक्येमलोपस्यबक्तव्यइतिवदेत् अतएवकेपदेनक्रियाविशेषणं।
दाहृत्यादयस्तत्रबेप्यधिकरणापात्समासाभावान्मलोपोविधीयतेरत्युक्तं सुखसुपेत्यादिस
मासोनसार्बत्रिकइतितदाशयइत्यलम् कृतकिमिति कर्त्तृकर्मभ्यांक्रियासन्निधाप्यते त
द्वाचीचधातुरेवकारकोन्वयपयोग्यताबच्छेदकरूपेतासाध्यत्वेनधातुभिरेवतदुपास्थितेः
इत्यापदस्यआधिकइत्यादौतद्धितान्तेनरूपेलोपाप्युत्तिरिति नतत्रकारकान्वयएतज्ज्ञा
प्यप्रामाण्यात् अतएवाहितूपादियोगेनकर्मादिसंज्ञा एतेनदेवदत्तेनग्रामोगत्वइत्या
दौबष्ठीनिवृत्त्यर्थंकृतग्रहणमित्यपास्तं अधिकारवाचीद्रोणेनेत्यत्रहेतौतृतीयाक्रियायोग

Digitized by Panjab Digital Library | www.panjabdigilib.org

इतिकैयटः एवंच शेषइत्यनुवृत्त्यावार्त्तिकस्याव्याख्यानं वदेत तत्र तत्रषष्ठ्युप्याव्याख्यानेएव भाष्यतात्प
र्य्यम् द्वितीयाश्रितेत्यादिसूत्रस्य भाष्यन्तु वार्त्तिकरीत्या किञ्च यदा कर्म्मविवक्षितं भवति तदा षष्ठी
न भवति स्यातामपि हंभातामिति भाष्ये उक्तं त्वद्रीत्यादित्युपदा कर्म्मादि विवक्षितं भवतीति वदेत एवं।
होविदर्थस्येति सूत्रेऽपि तदसंबन्ध एव एवञ्च तद्योगे न कदापि तत्तीयादि शतं दीव्यतीत्यादि च।
सिध्यति अधीगर्थेत्यादौ चमल्लुकानुवर्त्तिरिति प्रदीपे भावयन्तु कर्त्तृकर्मणोः अत्र शेष
इति न सम्बध्यते तत्र वैयर्थ्यापत्तेः कृद्योगा षष्ठी समस्यते इति वार्त्तिकेन तत्र समासस्येष्टत्वा
त् कृतिरिति भावे क्तिन् कृत्त्वः कर्त्ता जगत इति कर्म्मेदम् कर्त्तृसाहचर्य्यात् कर्म्मापि धात्वर्थभे
देनान्वय्येव गृह्यते तेन स्तोकं पाक इत्यादौ न क्रियाविशेषणात् षष्ठी न किञ्च क्रियाविशेषणेन
स्तोकं पाचक इत्यादौ न समानाधिकरणतासमासो नापि सुप्सुपेत्यादिः सुबन्तार्थविशेष्येनान्वय
नाम सामर्थ्यात् द्वितीयाश्रितेत्यादेस्तु सामर्थ्याद्व्यपवद्धाके सामर्थ्ये प्रवृत्तिः द्वितीयाप्रकर।
णोक्तपदैर्नुमन्परीत्यावाला सामर्थ्यम् अनयैव प्रजनाय्य जितं मितिनिसूत्रे दाहृतं वच्यामभवतिनव्याख्या

Digitized by Panjab Digital Library | www.panjabdigilib.org

तद्युक्तं न पितुस्तिङन्तमुदाहरति शतस्य दीव्यतीति यद्यपि पूर्वसूत्रे दिवम्पाठस्त्वात दर्थस्येति न्यकृतं श
क्यते तथापि योगविभाग उत्तरार्थः शेष इत्यस्यासम्बन्धार्थश्च विभाषोप॰ अत्रापि शेष इ
ति न सम्बध्यते तदर्थस्येति च वर्त्तते तदाह पूर्वयोगेति अत एव यत्राप्रविभाषेति नचेति सूत्रे भा
ष्येस्यार्थं कृत्वोर्थप्रशेषे किमिति दिवस्तदर्थस्येत्यादिना विच्छेदाद्धि कालाकार एव षष्ठी विधा
ने कृत्स्नमिति प्रश्नः द्विरह्नीति क्रत्वादिप्रमाणान्मण्डूकानुवृत्तिः स्त्रीकार्य्यं तूत्तरं अधीगर्थेति सूत्रे
कर्म्मादीनामविवक्षा शेष इति भाष्ये बहुवचनेनात्रापि शेषपदसम्बन्धबोधनाच्च वस्तुतस्तु क
र्मण्यपि षष्ठीविषये सूत्रोपात्तसकर्म्मकाणामकर्म्मकवद्वचनमिति वार्त्तिकप्रत्याख्यानाय शेष
इति वर्त्तते इति भाष्योक्तेः परेण शेषश्च क इति षष्ठे शेषषष्ठीति सूत्रोक्तं कर्म्मादीनामविवक्षा शेष
इति सिद्धान्तिनाप्यारितं नैतावता कृत्वोर्थेत्यत्र तत्सम्बन्धो लभ्यते किन्त्वेतज्ज्ञाप्यबलाद्दिवइति
सूत्रेपि शेषपदसम्बन्ध आवश्यकः अन्यथा वार्त्तिकरीत्या शतस्य दीव्यतीति भाष्येऽप्रयोग
स्यासिद्धिः अत एव वार्त्तिकव्याख्यायां अधीगर्थादयः शेषपर्य्यन्ताः कर्म्माण्युपपदे नोच्यन्ते

Digitized by Panjab Digital Library | www.panjabdigilib.org

वकर्तृकाणां किं श्लेष्मणा ध्वोरहृग्माः श्लेष्मात्र न भावः सर्पिषो नाथनमिति सार्पिर्मे
भूयादित्याशासनमित्यर्थः जासीति जसु मोक्षणे इति दैवादिकस्य न ग्रहणं जासीतिनि
र्देशात् हिंसायामित्युक्तेश्च निप्रोपसृष्टो हनो नियहणः शब्दपत्वेपि सोत्रत्वात् हनेरदि
तित्वं चुरादिरिति घटादेस्तु न ग्रहणं दीर्घनिर्देशात् क्राथनमिति घटादेः क्रथेः क्राथे
रिति सर्वे निपातनात् वृद्धिरिति वृत्तिः परे तु एतत्सूत्रस्थ भाषाल्पा न्नाटसाहचर्याच्चाप
मपि चुरादिर्बोध्यः तस्याकृतिगणत्वात् निपातनस्य शेषषष्ठी सन्नियोगशिष्टत्वे कर्म्म
त्वेन विवक्षायां चोरस्य क्राथनमित्यस्यानापत्तिः सामान्येन निपातनेप्येतद्गुणसु ल
विषये क्राथं क्राथमित्यादेः क्राथपतीत्यादेश्चानापत्तिरित्याहुः समर्थयोरिति समप
र्थ्यापदसंशब्देन समासः शाकन्ध्वादित्वात्पररूपम्वा श्रालगापतानमिति आपस्य पक्षो
वैकल्पिकत्वान्नकृतः उदाहरणेसुनावेवेति नियमादपि न दिवः कर्म्मत्विषष्ठ्या
दिति शेषः इति चेत्र न सम्बध्यते व्याख्यानात् अत एव द्यूती वा ब्राह्मणा इति सूत्रं।
गामस्य तदहः सभायां दीव्य भूतित्यत्र नित्यषष्ठीप्राप्तौ द्यूती वाच्यमिति भाष्येउक्तं

Digitized by Panjab Digital Library | www.panjabdigilib.org

त्यादि निमित्तादिप्रयोगे तेभ्यस्तत्समानाधिकरणाशब्देभ्यश्चेत्यर्थः किंनिमित्तमित्य
प्रश्यमानोद्वितीयान्तोच भावग्रहणादिति एवञ्च षष्ठीहेतुप्रयोगे सर्वनाम्नस्तृतीया चे
ति सूत्रे व्यर्थे इति बोध्यं षष्ठ्यतस० दिक्शब्दत्वात्पञ्चम्यां प्राप्तायामिदं ततः पश्चा
दित्यत्र तु सार्वविभक्तिकात्प्रत्ययान्तात्त्वतिः षष्ठ्यापीति स्पष्टं चेदं वक्ष्यो भाष्ये तु न दृश्य
ते विपरीतं षष्ठ्यतसर्थेति० सूत्रात्सर्वमेन पेत्यस्य पाठ इति लभ्यते इति पश्यन्विनेति
सूत्रे उक्तं हरान्तिकार्थैः पदपूर्वं कृत्वादिकं ततः षष्ठीत्यर्थः पञ्चमी चेति तस्या।
एव समुच्चयो न तु द्वितीयायाः तीयपयोरपीति भावः ज्ञोवि० अधीगार्थदयेशां कर्मणि
किं मातुर्गुणस्य मातुःकरणे वेतेन षष्ठ्याभावे समासो भवत्येव अतएवात्र सूत्रे भाष्ये ह्या
घ इति वर्ततेऽस्तु उक्तं प्रतिपदविधाना षष्ठी न समस्यते इत्यनेन षष्ठीसमासनिषेधात् एधो
दकस्येति एध इति पृथक्पदं दकशब्द उदकवाची रुजार्थानां रोगार्थानां धातूनामि
त्यर्थो व्याख्यानात् धातोर्भाववचनत्वाव्यभिचारात् भाववचने इति कर्त्तरि ल्युडन्त्य
त्यर्थो विवक्षितस्तदाह भावकर्तृकमिति रोगकर्तृकमिति च रोगो ज्वरादिः भा

Digitized by Panjab Digital Library | www.panjabdigilib.org

ल०प्र०

२६३

कर्तृत्वादिशक्तिरूपेण बोधकत्वं तत्रापि तन्मूलके सम्बन्धे विवक्षिते षष्ठी तदाह कारके
ति स्वस्वामिभावादिरिति स्वत्वस्वामित्वसमूहः सम्बन्ध इत्यन्यत्र विस्तरः एवं सर्वत्र बोध्यम्
षष्ठ्यर्थस्य संसर्गविधयैव भानं कारकविभक्तिभ्योपि क्रियाकारकभावस्य संसर्गविधया भा
नमित्युक्तं सम्बन्धमात्रविवक्षायामिति सम्बन्धत्वेन भान इत्यर्थः पदार्थक्रियाकारकभा
वमूलकसम्बन्धस्यैव विवक्षायां न तु तद्विवक्षायामित्यर्थः कर्त्रादिपि तस्याविवक्षात्कस्य
च वर्त्तमान इति सूत्रे छात्रस्य हसितमित्यादौ भाष्ये स्पष्टं संप्रयोग सम्बन्धावच्छिन्नाधारस्या
न तस्या विवक्षा अत एव घटवद्भूतलमिति प्रयोगसाधकं मतुरस्त्वेः स्मिन्निति चरितार्थं
मिति तत्रैव भाष्ये स्पष्टं लोहितोष्णीषा इत्यादावपि लुप्तमत्वर्थे बहुव्रीहिर्बोध्यः एधोदकस्ये
ति एधः कर्तृकतृप्तिवादकस्योदकस्येत्यर्थः एधशब्दोऽदन्तश्च त्रिलिङ्गः कारके इति सूत्रे भा
ष्ये प्रयुक्तः एधाः पक्ष्यन्तीति लान्तः स्त्रीत्वोपि हेतौ षष्ठ्यपि इति हेताविति वर्त्तते हेतुहेतुमद्
भावेनेतरान्वय इत्यर्थः तेनात्र हेतुपदप्रयोगाभावे न षष्ठी हेतुवाचकादित्यर्थः निमित्ते

२६३

Digitized by Panjab Digital Library | www.panjabdigilib.org

रित्स्वर्वनिपातकारणेच वीप्सानापत्तिरत एव कारणे चेति सूत्रे तृतीयासमुच्चयो नेत्याहुः क
रणेच स्तोककरणेच्च तृतीयायाः सिद्धत्वेन पक्षे पञ्चम्यर्थमिदं चकारस्तु तृतीयान्यतरस्या
मित्यनुकर्षणार्थः षष्ठीग्राप्याप्तिगतिवत् अद्रव्येति द्रव्याभिन्नाबचनेभ्य इत्यर्थः द्रव्य
पदेनात्र सर्वनामपरामर्शयोग्यं लिङ्ग निरूपितविशेष्यतावत्त्वं वा स्तोकशब्दो यद्धर्म्मावे
शात्तद्द्रव्ये स्तोकव्यवहारस्तद्धर्म्मपरः स च धर्म्मो ल्पादिशब्दप्रवृत्तिनिमित्तमेव शुक्लादिव
च्चैते धर्म्मवचनाः अपि शुक्लादिवच्चैते धर्म्मीकारणत्वं च परं पयोर्ईदृशार्थ एव च साधुत्वं त
त्र वक्तव्यादिति स्पष्टमनुगुणाः पदइत्यत्र कैयटे कारणे किं स्तोकं पचति असत्वभूतफलस
मानाधिकरणविशेषणत्वात् स्तोकशब्दस्यासत्ववचनमिति दिक् दूरांति॰ दूरांतिकार्थैः
षष्ठ्यन्यतरस्यामित्यतस्समुच्चयार्थका त्यपस्याङ्ग यहणानुवर्त्स्यैवोर्थाधिकारात्पञ्चम्याः
सिद्धे चकारो व्यवहिततृतीयार्थौ समुच्चयार्थौ व्याख्यानादित्याह चयादित्यादि प्रातिपदि
कार्थमात्रे इति व्याख्यानादितिभावः इतिपञ्चमी षष्ठीशेषे शेषउक्तादन्यः स च तत्त
द्रूपेणास्वत्वादिः सम्बन्धत्वेनरूपेणच कारकविभक्तीनां क्रियाजनकत्वसमानाधिकरण

Digitized by Panjab Digital Library | www.panjabdigilib.org

पञ्चमीत्यर्थः प्रतिनिधिः सदृशः प्रतिदानं दत्ततुल्यमूल्यस्य वस्तुनः प्रत्यर्पितां
कर्तृवर्जितमिति कर्तृसञ्ज्ञारहितमित्यर्थः सत्त्वं च वस्तुसन्निमित्तं न तु तृतीया
वाच्यकोटिनिविष्टं हेतुभूतमिति तेन कर्तृत्वाविवक्षायां तृतीयैवेति भावः विभाषा
गुणेयोगादिति बाहुलकं प्रकृतेऽप्यस्तु न दृष्टेत्युक्तवार्त्तिकप्रयोगानुरोधोऽस्त्रियामिति।
प्रायिकमित्यन्ये धर्म्मादिति धर्मपदं त्वज्ञानेऽग्निमत्पदं स्वज्ञानविषये लाक्षणिकं बो
ध्यं समुच्चयार्थमिति इत्यपदं चेदं भाष्ये एतेनान्यतरस्यामङ्गीकारादित्यर्थकं पदद्वयमे
तदित्यपास्तं विकल्पविषये प्रथमासङ्गतेश्च परे तु द्वितीयासमुच्चयेन फलं विना।
वानन्विनावर्ष्यमित्यादौ स्त्रुते शब्दप्रयोग इव ततोऽन्यत्रापि दृश्यत इत्यनेन द्वितीयापि।
हेतत एव भाष्ये द्वितीयासमुच्चयो नोक्तः पञ्चम्यामधिकारे द्वितीया षष्ठी विषये प्रति
षेधो वक्तव्यः ९ दक्षिणेन ग्रामं दक्षिणाहि ग्रामस्येति तत्रकृतस्त्रस्य भाष्ये एनपा
द्वितीयेति सूत्रं षष्ठ्यतसर्थेत्यतः प्राप्तिति च लक्षितमन्यथा सोऽत्र क्रमत्यागेन स्यप्यविप

Digitized by Panjab Digital Library | www.panjabdigilib.org

भवात्प्रभृति आभवादित्यत्र भवकालादिभक्ते अत एव भवावधिके मरणान्तकाले।
भवकालमर्यादापहृतिः सेव्य इति बोधः एवमप्यत्राप्पूर्वस्य मित्यत्र विस्तरेण ज्ञापका
दिति पञ्चम्यन्तेन समासविधानात् ज्ञापकादित्यर्थः अयं भावः यत्स्यरत्साहच
र्यात् तत्राऽपपरी वर्जनार्थौ कर्मप्रवचनीयावेव तद्योगे पञ्चम्यपाङ्परिभिरिति।
वचनात् लक्षणप्रतिपदोक्तपरिभाषया परिनिमित्तकलुवन्तस्यैव ग्रहणाच्च प
ञ्चम्यैव सिद्धः समासः तत्साहचर्यादुक्तपरिभाषयोचाप्रवृत्तेरपदेनापि तन्निमि
त्तपञ्चम्यैव सिद्धः समास इत्यर्थः तद्धितः शब्देन पञ्चम्यन्तेन समासविधान
घातात तद्योगे पञ्चम्या अपि ज्ञापनार्थमिति इदमपवादिरिति सूत्रे भाष्ये स्पष्टं पञ्च।
मीति ज्ञापितमित्यर्थः तेन करस्य करभो वहिरिति सिद्धं प्रतिनिधिप्र० यस्मादिति पञ्चम्य
र्थः सम्बन्धः अस्मादेव निपातनात् षष्ठ्यर्थे पञ्चमी प्रतिनिधिप्रतिदानशब्दौ क
र्म्मक्रियाभावप्रत्ययान्तौ प्रतिनिधिप्रतिदाने च सम्बन्धिनी ततः कर्मप्रवचनीययुक्तात्

Digitized by Panjab Digital Library | www.panjabdigilib.org

षष्ठ्यतसर्थेत्यत्र अतसुपग्रहणात्तस्याप्यरूपमात्रग्रहणप्रसङ्गे एवमत्र वत्तिस्तदेदं मास्त्विति त
त्वमिति भाष्येस्पष्टं दक्षिणाच्‌आमादिति दक्षिणस्यां दिशीत्यर्थे दाक्षिणा दक्षिणाहि च दूरे इ
त्याजाही षष्ठ्यतसर्थेत्यस्यापवादः अञ्चूत्तियोग इति अञ्चूत्त्यर्थे योग इति वार्त्तिकं अत्र व्या
ख्यानासंगतिरितिभावः एवञ्च तदर्थकारभ्यशब्दयोगेपि पञ्चमी यथा अवीचि
मारभ्य मेरुपृष्ठपर्यन्तो भूलोको मेरुपृष्ठादारभ्य ध्रुवपर्यन्तो ग्रहनक्षत्रतारगणा
विच्छिन्नोन्तरिक्षलोक इति पातञ्जलभाष्यप्रयोगः अञ्चूत्तीत्यस्य चावधिमात्रेप्यर्थः
आरभ्येत्यस्य तदर्थकत्वात् अवधौ च पञ्चम्यन्तार्थस्याभेदेनान्वयः तद्विशेषणत्वे
पिनक्षतीपा अञ्चूत्त्यर्थयोगे पञ्चमीति भाष्यकल्पबोधितवचनात् आरभ्येत्यस्य ग्रहो
त्वेत्यर्थेनावीचिमारभ्येत्यादौ क्षतिः पावस्तुतो वधित्वं तस्य समभिव्याहृतपदार्थनिरू
पितं गम्यमानक्रियापेक्षमित्यपादानत्वादेवात्र पञ्चमीति दिक् कार्त्तिक्याः प्रभृतीति विभक्तेरेव
वकालिकावधिके आग्रहायणी घटिते मासे कार्त्तिकीमादाय गते आग्रहायणीति बोधः

Digitized by Panjab Digital Library | www.panjabdigilib.org

दानेरण्यतत्रापिसत्वात् अतएवघटाङ्गेद इतिसिद्धं तद्योगेऽप्यपादानत्वात् तस्यैव
सम्बन्धत्वेनविवक्षायां षष्ठीवाभेद इत्यपि अन्यशब्दार्थस्याक्षिप्यत्वात् तद्योगे एत
द्विधाने अतएवघटः पटोनेत्यादौ नपञ्चमी नञोभेदवदर्थकत्वेपि आक्षिप्तत्वात् घ
टादेकरत्वादित्वसाध्वेव अतएवेतरग्रहणं चरितार्थम् अतएवभाष्येऽर्थग्रहणंनोक्त
मित्याहुः आराद्दूरसमीपयोः एतद्योगे दूरान्तिकार्थैरितिप्राप्ते नन्वयंदेशवाचीन
दिक्शब्दोतआह दिशिदृष्टइतिशब्दग्रहणादितिभावः तेनरूढ्यादिविशेषवाच
काः पूर्वादयएवगृह्यन्ते नैन्द्रीककुवादयोव्याख्यानात् अञ्चवाचीतितद्वाचिपूर्वादि।
योगेऽवयववाचकान्नेत्यर्थः ज्ञापकस्यसमानजातीयापेक्षत्वात् अतएवास्मादपर
र्वोभागः कायस्येतिसिद्धं अवयवे [illegible] पूर्वत्वन्त्ववयवान्तरापेक्षयाऽप्रथमकालोत्पा
त्तिकत्वेनबोध्यं अञ्चूत्तरपदस्येति दिक्शब्दस्यसाहचर्यात् तस्यदिग्वाचकस्यै
वग्रहणं तेनसध्र्यङि.त्याद्यर्थेतत्रेतिभावः बाधितुमिति परत्वात्प्राप्तामित्यादिः यदितु

Digitized by Panjab Digital Library | www.panjabdigilib.org

स्तानुदृष्टेरितिवार्त्तिकप्रयोगात् भुवः प्र॰ प्रभवनेप्रकाशः प्रग्रहणात्तदाधिकतोम।
पादानमित्यर्थः प्रभवोजलम् लेख्याज्ञान्महैतोपराक्रमे ज्ञानत्वचादिमत्वानर
तिविश्वः प्रकाशनइत्यस्यप्रयोगेतुनप्रथमप्रकाशत्वाभावात्तदाह तत्रप्रकाशात।
इत्यर्थः ल्यप्लोपइति ल्यवन्तशब्दाज्ञानेइत्यर्थः कर्मणीतिप्रत्यासत्त्याल्यवन्त
धात्वर्थस्येतिभावः प्रासादादितिकलेभ्योपातीतीत्यत्रैवबोधप्रक्रियात्रासनप्रोवि
षमविलोचनस्यवक्षइत्यत्र कर्म्मणः शेषत्वविवक्षयाषष्ठी वक्षइत्यस्यप्राप्येति
शेषः गम्यमानापीति विशिष्यतद्वाचकशब्दानुपात्तापीत्यर्थः कस्मात्त्वमित्या
दौफलेभ्योपातीत्यत्रैवबोधप्रक्रियाः अन्येन्त्यर्थेति तदर्थेऽपभेदवान् अतएव
घटाद्भिन्नइत्यादिसिद्धिः परेतुध्रुवमितिसूत्रेऽपायपशब्देनभेदस्यापिग्रहणात्तां प
ञ्चमीविभक्तेइत्यत्रविभागार्थकविभक्तपदेनभेदस्यैवव्याख्यानात् भिदिर्विदार
णेइत्यत्रभेदज्ञानविषयत्वमपिविदारत्वं एकत्वेनगृहीतस्यतथाबोधेबुद्धिवि।

Digitized by Panjab Digital Library | www.panjabdigilib.org

स्वदर्शनाभावायेतिग्राह्निः इच्छामात्रस्याक्षेपलभ्यत्वइव विप्रियस्याक्षेपलभ्यत्वे
पिस्यादितिभावः प्रकृतेनान्तर्द्धिरितिन दोषः येनेत्यस्याभावे हि स्वकर्म्मकदर्श।
नाभावं यदिच्छतीत्यर्थे कर्त्तुरेवस्यादतस्तत् इच्छतीत्यग्रहणं किमिति अन्तर्द्धावित्ति
यत्कर्त्तृकदर्शनाभावं यदिच्छतीत्यर्थे कर्त्तुरेवस्यादतस्तत् इच्छतीत्यग्रहणं किमिति।
अन्तर्द्धौ सितियत्कर्त्तृकदर्शनस्याभावस्तदपादानमित्यर्थोऽस्त्वितिभावः सत्यपीति
अदर्शनेच्छयातदनुकूलव्यापारकरणादेव वदर्शनेसत्यपीत्यर्थः अन्यथाप
त्वदर्शनाभावस्तात्रैवस्यादितिभावः नियमेति उपयोगिशब्दस्य तत्रैव व[illegible]यमो
भस्त्रयाख्यादिः नटस्येति नटजन्यं श्रवणमितिबोधात् कारकत्वेनियमहर्वेकवि।
यावकृत्वाभावान्नेत्युक्तं जनिकः प्रकृतिरुपादानकारणं ब्रह्म च मायाशबलं
जगदुपादानकारणं वस्तो हेतुपदमप्युपादानकारणपरमेवेतिबोध्यं विभाषेत्येव
सिद्धेरिदमपादानत्वेन बोधार्थं तत्र हि गुणोऽस्त्रियामितिप्राधिकं बाहुल्यकं प्रकृते।

Digitized by Panjab Digital Library | www.panjabdigilib.org

पराजेः असोढोस्मानि विषय: एकस्यैव धातोः कर्मकत्वे उदाहृतत्वेनैतत्र हन्तापतीत्यर्थे इति
अभिभवतीति तिरस्कारानुकूलो व्यापारो धात्वर्थ इति भावः प्रकृतिविघातइति भक्षणं संयो
गादिजनकव्यापाराभावानुकूलो व्यापार इत्यर्थः ईप्सितइति वारणार्थधात्वर्थफला
श्रयइत्यर्थः उदाहरणेचैतद्धात्वर्थजन्यव्यापारजन्यसंयोगादिरूपफलाश्रय
त्वाद्यवानामपादानत्वं ईप्सितइत्यनेन प्रधानाप्रधानान्यतरव्यापाराश्रयमात्र
स्याक्षेपः कर्मलक्षणेतुतमप्ग्रहणात् प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्य
प्रकृतधात्वर्थफलाश्रयस्यग्रहणमितिभावः अन्तर्धौ अन्तर्धिरन्यकर्तृकस्वकर्म
कदर्शनानुकूलो व्यवहितदेशस्थितिरूपस्तद्घटकं यत्कर्तृकदर्शनाभावमिच्छ
तितदपादानमित्यर्थस्तत्फलितमाह व्यवधानेसतीति येनेत्यत्र कर्तृकर्मणोरि
तिषष्ठीनसोढत्वात् आत्मनइति प्रयोगसिद्धंमातुर्निलीयतेइत्यादावाक्षेपलभ्ये
च्छाबोध्या चौरानिति चौरकर्मकदर्शनेच्छाभावइति शाब्दोर्थः सचचौरकर्तृक

Digitized by Panjab Digital Library | www.panjabdigilib.org

स्यैव धात्वर्थत्वे न कर्म्मसंज्ञापादानत्वस्याबाधः स्पन्दस्तु न विभागोर्थ इति विवक्षे स्पन्दतेऽश्वे
वचलतेस्त्वासनाच्चलित इति प्रयोगादस्यैव विभागार्थत्वं सार्थ्याष्ठीयते रुत्पन्नस्यार्थस्य धात्व
र्थप्रधानव्यापाराश्रयत्वेप्यपादाने चाहीयस्त होरितिज्ञापकात् कर्म्मत्र त्यवान्तराहीधातु प्रयो
गेपादानत्वे कर्म्मसंज्ञापाभ्बकर्त्तृपदं स्वतन्त्रोपलक्षणमिति कर्म्मतिलकारः लक्ष्येनत्या
न्यतेदेवदत्तस्त्यर्थः धावत इति क्रियाविष्ठस्याप्यश्वस्य प्रकृतधातूपात्तगत्यताविवक्षणात्
धावनस्याविवक्षितत्वाद्ध्रुवत्वं बोध्यं जुगुप्सेत्यादि जुगुप्सादीनां येद्विषयकत्वेन विवक्षा
तदपादानं तस्यैव विषयस्य क्रियाजनकत्वरूपकारके नाविवक्षायां सम्बन्धित्वेन च विव
क्षायां पापस्य जुगुप्सते इति षष्ठी भवत्येव सत्यभिधाने एवमुक्तालक्षणेनैव पिबोध्यं एवं धा
तूनां स्वार्थपूर्वक बोधविशेषजनकनिबन्धित्वलक्षणलपास्त्रतो वासिध्येदं वार्त्तिकमुक्तालक्षेत्रा
तिरुपन्यस्यापि यानीति भावेष्वेवस्पष्टं भयभीत्र्यार्थानां त्रार्थानाह भयार्थानामिति हेतुस्तती
वापवादोपस्मरणो इति भयार्थानां योगे कारकमपादानमित्यर्थः विरोधात्सर्वसंज्ञा
पवादोपमस्यादिति भावः

Digitized by Panjab Digital Library | www.panjabdigilib.org

गपूर्वकः संयोगः पतत्यर्वृत्तिरिति बोधः वृक्षाद्भूमिम्पततीत्यादौ वृक्षापादानकवि
भागपूर्वकः संयोगानुकूलो व्यापार इति बोधः परस्परस्मान्मेषावपसरत इत्यादौ मे
षपदोपात्तयोरेव क्रियाश्रयत्वात्कर्तृत्वं परस्परपदोपात्तयोरेव विभागाश्रयत्वादपा
दानत्वं मेषपदोपात्ते तदविवक्षणात् संयोगानुकूलत्वाविवक्षायां विभागपूर्वकं।
यथा गामनपसरणं आत्मानमात्मनेत्यादावन्तःकरणाद्युपाधिकृतभेदव
तएव स्वरूपोपाधिकृतभेदाद्धर्मिमानाभावात् शाब्दलिङ्गिः तात्पर्यभानस्यैव वचस
त्याद्युक्तेत्यन्यत्र विस्तरः यत्वपरन्तु इति सृधातुना गतिद्वयस्याप्युपादानादेकनिष्ठं
गतिमत्त्वं प्रति तदितरस्यापादानत्वमविरुद्धमिति तत्र वस्तुतः तन्निष्ठव्यापारयोर्भेदविवक्षया सृधातुनानिव
न्नभेदस्यैव व्यापारस्योपादानादुभयोरपि तत्क्रियाश्रयत्वेन परत्वात्कर्तृत्वापत्तेः अत एवैकशो।
वस्तुत्वाभाव्यमुक्तं नचैवं तिङः स्तान्तैकशेषां स्वांशप्रयोजनयन्तिक्रियापारकत्वादित्य धनुषा वि
ध्यतीत्यत्र निस्सरत्स्वस्य मन्यबोधार्थत्वाद्धनुषोऽपादानत्वकारणत्वोभयप्राप्तौ परत्वात्कारणत्वं बो
ध्यं यामादपातीति अपातेर्विभागपूर्वकोत्तरदेशसंयोगानुकूलो व्यापारव्यधिकरणविभाग

Digitized by Panjab Digital Library | www.panjabdigilib.org

व्यापाराश्रयत्वस्यात्रासत्त्वेन स्वतो ध्रौव्यस्याविवक्षेत्यसंगतेः सिद्धान्तेऽपि तदुक्तध्रु। स्याः
वपदार्थकथनमेवोचितमिति तदसंगतिश्च लोकसिद्धातिरिक्तेऽर्थे ध्रुवपदस्याप्रसि
द्धत्वेन गौरवञ्च अत एव शब्दादिस्वरसिकानां तदविवक्षाविवक्षणादित्यर्थः तस्मा
दपायेऽतीति विशेषणमिति यत् ध्रुवमवधिभावोपगमाश्रयत्वमिति तदतिरिक्तस्यावधित्वो
पयोगिव्यापारस्यानाश्रयं तदपादानमिति तत्त्वार्थः तत्रासादेरवधित्वोपयोगित्वाप्र
पतेः न शङ्क्या वृक्षात्पतनमित्यादौ तस्यासत्त्वान्न तदुपयोगित्वं तस्य प्रकृते विद्यमानस्या
विवक्षितत्वान्न तदुपयोगित्वं तस्येत्युक्तं ध्रुवमपायेऽत इति तु वृक्षस्य पर्णम्पततीत्यादौ
वस्तुतत्त्वस्य पर्णाद्यपातनजनकत्वात्तत्रापादानत्ववारणाय एवञ्चापायेऽत इति कारके
इत्यस्य क्रियाजनकत्वेन विवक्षित इत्यर्थे तात्पर्यग्राहकं चोध्यं ध्रुवग्रहणं तु का
कान्तागतमिवापादानस्यावधिभावोपगमातिरिक्तव्यापाराभावबोधनायेत्याहुः अ
पादानत्वप्रकारकश्च प्रकृतधात्वर्थविभागाश्रयत्वसमानाधिकरणतेति अपादानसमभि
व्याहारे विभागोऽपि धात्वर्थ इति बोध्यम् एवञ्च वृक्षात्पततीत्यादौ तदपादानकविभा।

Digitized by Panjab Digital Library | www.panjabdigilib.org

तीत्यादौ न स्पष्टं चेदं भाष्ये उत्पद्यादिति उत्पद्यं सन्नुत्पद्येत्यर्थः इष्यत इति न त्वाकान्ता।
इत्यर्थः उत्पद्येनेति गन्तुमशक्त इति शेषः इति चतुर्थी ध्रुवम० ध्रुवं स्थिरं अपायो
विभागजनको व्यापारस्तेन दनाश्रय इति यावत् विभागश्च न वास्तवसम्बन्धपूर्वको वा
स्त एव किन्तु बुद्धिपरिकल्पितसम्बन्धपूर्वको बुद्धिकल्पितोऽपि माथुराः पाटलिपुत्रके
भ्य आढ्यतरा इत्यादौ बुद्धिकल्पितसम्बन्धपूर्वकापायाश्रयत्वेन भाष्ये पञ्चमीसाध
नात् कर्तृत्वात्तापायध्रुवमिति अन्यथा कर्तृसंज्ञाया इयमनपवादः स्यात् अपायवि
षये यत्कारकं तद्रूपक्रियानन्तरं तदपादानमित्यर्थे संभवात् कर्तृसंज्ञा तु पचत्यादि
योगे चरितार्था हरिरप्याह अपाये यदुदासीनं चलं वा यदि वाऽचलं ध्रुवमेवातदावे
शादिति स्पष्टं चेदं केयटादौ भाष्यानुसारिणस्तु एवं हि त्रस्तादश्वात्पतितो धावतः पति
त इत्यादौ ध्रुवत्वाभावादपादानत्वं न स्यादित्याशङ्क्य ध्रौव्यस्याविवक्षितत्वमत्र प[illegible]तः
सतोऽप्यविवक्षा भवतीति समाहितं भाष्ये तदसंगतं स्यात् त्वदुक्तध्रुवत्वस्य पतत्यावश्य

Digitized by Panjab Digital Library | www.panjabdigilib.org

र्थे विशेषणं तयोरकं यत्कर्म्मेत्यर्थः तेन वुभुक्षयच्छ्यन्नमुत्थीन तिरस्कारश्च व्याख्यानाद
पकृष्टनिरूपितो यमेयत्वस्याप्यभावरूपउपमेवेत्रगृह्यते तत्त्वपकृष्टसादृश्यरूपः तत्र
तीतिश्च नन्सममभिव्याहारएवतत्तत्तुल्यमपितन्मनमेवेत्यर्थः तत्तोयमत्याग्रेनन्दनो।
वीत्यादौ नमोध्याहारस्तदाह नत्वोत्तत्तमिति कर्मात्रचतुर्थ्यर्थः श्यनेति नतु यकाव्या
ख्यानादितिभावः श्यन्नत्पलक्षणं तेनलिङादावपि भवति तदुक्तं यन्नाह तानादिकवा
गेनेति नौकाकेति भाष्येषेषु प्राप्तिभुनेष्यते तेनावादयोमविष्यन्तीइति येष्विति वहुवचने
नवत्युदाहरणेबलेन चैष्वेवानिषिद्धनिर्त्तोपइतिभावः गत्यर्थ कर्म्मात्राबापिचतुर्थ्यर्थः
गत्यर्थे किं ओदनम्पचति कर्म्मणीति किं अश्वेन गच्छति चेष्टायांकिमिति धात्वर्थस्य
क्रियारूपत्वात्प्रश्नः शारीरक्रियायाएवग्रहणमित्युक्तम् पन्थानमिति अध्वशब्दो
र्थपतेव्याख्यानादितिभावः अधिष्ठितइति शब्दप्रयोगसमकालिकगन्तृव्यापारेण
न्यफलाश्रयइत्यर्थः अध्वपदेनगन्तव्यप्राप्योर्थेउच्यते तेनगन्तव्युक्तास्त्रियांस्त्रियंगच्छ

Digitized by Panjab Digital Library | www.panjabdigilib.org

स्त०प्र०

२५६

सेवकर्त्तृत्वस्यबोधइतिनतद्बोधावृत्तिः नमस्करोतिदेवानिति उत्कृष्टनिष्ठापः स्वनिष्ठा
पकृष्टत्वबोधस्तदनुकूलव्यापारद्रूपनमस्कारफलस्यतादृशबोधस्याश्रयतयादेवानां
कर्म्मत्वंत्वशब्देननमः अपोक्तानमःशब्दस्यसाक्षात्प्रभृतिपूर्व्वादिषुवापाठेनगति
त्वात्तत्वेएकस्याएवोपपदविभक्तित्वेकारकविभक्तित्वेचावैन्यायइतितुनयुक्तं नमस्य
तिदेवानित्यत्रेतत्पदीभावोपन्यासपरभाष्यविरोधात् सहयुक्तेइत्यादिसूत्रस्थभाष्यवि
रोधाच्च अलमिति अलमित्यनेनपर्य्याप्त्यर्थानांग्रहणंव्याख्यानादित्यर्थः तत्रज्ञाप
कमप्याह तस्मैप्रेति षष्ठ्याअपिसाधुत्वेवीजंसएषामिति आशीर्विवक्षायामिति
आशीर्विषयत्वविवक्षायामित्यर्थः स्वस्त्यर्थः कुशलंमङ्गलंवा स्वस्तियोगेचतु
र्थ्याअवकाशः स्वस्तिनाल्मापाल्मीतितत्वकथनं कुशलार्थैराशिषीत्यस्यावकाशः
स्वस्तिभिन्नाः कुशलार्थाः स्वस्तिशब्दोनाव्ययमपि प्रतिगृह्णामितेधध्येतुकुम्भा
र्थैविशेषतः स्वस्तिर्भवतुमेनित्यंसुतंवानुत्तमं तथ्वेतिभविष्योत्तरेप्रयोगात् मम्पक

२५६

Digitized by Panjab Digital Library | www.panjabdigilib.org

।तेः पित्रोमित्यादौ अप्रयुज्यमानभक्षणक्रियाकर्म्मेति। चतुर्थी वा तुमर्थक्रियार्थोपपदस्येति तुम
।र्थात् तुमन्नन्तार्थेन तदर्थो लक्ष्यते सोऽर्थो यस्येत्यर्थः इति सूत्रे तेनेति भावे प्रत्ययो वाच्यते तेन क्रि
यार्थे क्रियोपपदे भविष्यति लृट् स्मिन्नर्थः यागाय यान्ति यागफलकं यानमित्यर्थः उपपदविभक्तेरिति
वाचनिकमेवेदं भाष्ये पठितमिति केचित् ।क्रियाकारकयोस्सम्बन्धो नारूढः उपपदार्थेन तु यत्
किञ्चित् क्रियाकारकभावमूलकः सम्बन्ध इति तन्निमित्ता विभक्तिर्विहितेति अन्ये तान्तावेतेति
सूत्रे कैयटः अन्ये आहुः एवं सति नमस्यति देवानित्यादौ नमः पदार्थे क्रियाकारकभाव [illegible] मे
वमन्वये परत्वाच्चतुर्थीमाबाधित्वा एतेन वारणात्स्यभाष्योक्तस्यासंगतिः एतेन प्रधा
नत्वात् क्रियायास्तत्सम्बन्धनिमित्तकत्वेन बलवत्त्वमित्यपि परास्तं कारकविभक्तित्वे
च क्रियाजनकत्वसमानाधिकरणकर्त्रादिषट्कान्यतमार्थकत्वम् अन्याभिहितानुक्
तकर्त्राद्यन्यतमार्थत्वमप्रथमायाः अपि अभिहिते प्रथमेति वार्तिकस्वारस्यादतः प्र
थमापि कारकविभक्तिरिति बोध्यं [illegible] णादित्यादौ हितादेरिव देवः पचतीत्यादावुभाभ्यामेव

Digitized by Panjab Digital Library | www.panjabdigilib.org

श्रोघ्यामित्यादिशब्दैरितिशेषः शपतेति करणस्यैव सम्प्रदानत्वेन भानमत्र शपतव्यापारश्च तान
द्रूपएवेतिबोध्यम् तादर्थ्ये तादर्थ्यमुपकार्योपकारकभावरूपः सम्बन्धः यदा तादर्थ्यस्य स
म्बन्धत्वेन भानं तदा षष्ठी गुरोरिदं गुर्वर्थमित्यत्र भाष्ये स्पष्टम् क्लृपीति सप्तमी अर्थग्रहणाच्चात्र
सम्पत्तिरुत्पत्तिः क्लृप्यर्थकधातुयोगे उत्पद्यमानेऽर्थे वर्त्तमानाच्चतुर्थीत्यर्थः हितयोगेच चास्तु
त्वयोगेपि क्रियार्थोप० क्रियार्थः फलं यस्य तत् क्रियार्थं तेनस्य वाचकं लक्ष्यते क्रियाफलका
र्थवाचकमुपपदं यस्य स्यर्थः सोऽर्थश्च प्रत्यासत्त्या क्रिया[illegible] एव स्यान्निशब्दश्चाप्रयुज्यमान।
वाची वैयाकरणानां निकाये प्रसिद्धः क्रियार्थक्रियोपपदत्वं च तुमुनादेरपि स्यादाह क्रियार्था क्रियार
र्थाक्रियेति फलेभ्यो यातीत्यादौ फलकर्मकाहरणफलकं यानमिति बोधः यथावाक्येकदेशान्वयो
गस्यलोपविशापितडीति स्याद्येतस्यैव पदस्यसमुदाये वाक्यार्थशक्तता तथाऽपि समुदायस्याहरणा
घटितोक्तार्थशक्तिरेतच्छास्त्रबलात्स्यादिति न दृत्युक्ते सत्त्र्योगेनेतिबोध्यम् अयमेवार्थोध्याहा
रः नमस्तुभ्यं नसिंहायेति नमः स्वस्तीत्यनेनतु बाधितः उपपदविभक्तेरिति न्यायेन द्वितीयाप

Digitized by Panjab Digital Library | www.panjabdigilib.org

धर्म्मोहाभ्यां मिद्धा विषयत्वाभावात् क्विपया यमित्यनेनाऽन सिद्धिः न हि कुपिः कुप्य
तीति भाष्येण शब्द्यकोप एवं क्रोध इति कुपेस्तदर्थत्वाभावेन न तद्योगे इदं कुप्यति कस्मै
चिदित्याद्युदाहरणे उपसर्गयोरित्यस्यार्थमाह सोपसर्गयोरिति वैयाकरणानिकाः
एवमेतदर्थकत्वेन प्रसिद्धः पूर्वसूत्रापवादोयम् यदीयइति यदीयशुभाशुभमस्य च
न्धीत्यर्थः राधीक्ष्योः प्रश्नविषयपर्य्यालोचनमर्थः कर्म्मणः प्रश्नविषयस्य।
धातुत्वार्थेनोपसंग्रहादकर्म्मकावेतौ अत एव पश्यन्त्यधो कर्म्मकादेवेत्युक्तेः कृष्णसं
प्रश्नानं शुभाशुभपर्य्यालोचनमर्थः प्रत्याङ्भ्यां आख्यानात् प्रत्येकं निमित्त
त्वमित्याशयेनोदाहरति गां प्रतिशृणोतीति अनयोः प्रवर्त्तनापूर्वकोभ्युपगमोर्थः।
तत्र विप्रस्य कर्त्तृप्रयोजकत्वेन हेतुत्वप्राप्ते वचनम् अनुप्रतीति भिन्नमप्यदं लुप्तप
ञ्चम्यन्तं गृणइतिश्नान्तानुकरणात् षष्ठी शंसितुः शंसनविषयहर्षानुकूलव्यापा
रानुकूलोत्साहनमनयोरर्थः पूर्वव्यापारस्येति शंसनेस्येत्यर्थः श्रोत्साहयती
ति

Digitized by Panjab Digital Library | www.panjabdigilib.org

रपन्तास्यग्रहणं व्याख्यानात् भक्तायेति ।प्रियमाणं स्वरूपेणावतिष्ठमानं मोक्षं हरिः प्र
युक्तेत्यर्थः प्रेरणापा भक्तास्तित्वेऽभावात् तस्यापि प्रेरणाजनकत्वेन कारणत्वमेवोध्यं
अवश्यपदेपत्वेन मोक्षेपि स्वरणत्वमेवोध्यं अकर्षविवक्षायामिति फलाश्रयत्वेनावि
वक्षायामित्यर्थः पात्वादिति इदं सूत्रं विषयतया क्रियाजनकत्वमात्रविवक्षायां च
रितार्थमितिभावः पुष्पसम्प्रदानिके चेति चतुर्थी समभिव्याहारे बोधः कुमार्याश्व
कान्तस्यत्वस्यन्तिस्य रुपन्तिचेत्यत्र क्रियासम्बन्धित्वमात्रविवक्षायां षष्ठी अन्ये तु भो
गायेत्यध्याहृत्यकान्तायेतिविभक्तिविपरिणामेन बाव्याख्येयमित्याहुः स्पृहधातुरि
च्छामात्रवाची फलावच्छिन्नेच्छावाची वाऽऽद्ये सम्प्रदानत्वमन्त्ये कर्मत्वम् ईप्सितत्वं
धात्वर्थजन्यफलाश्रयत्वं ननु फलस्य धात्वर्थत्वपर्यन्तमाग्रहः कर्मसंज्ञोपानुप
घातात् भस्त्रायोक्तं भार्यामीर्ष्यतीतिनात्र भार्यां प्रति कोपः किन्तु परैर्दृश्यमानां तां न
सहत इत्यपि एवं चात्र न कोपे न्नेषा किन्त्वन्यपुरुषदर्शनजन्यैति भावः हरेः क्रो

Digitized by Panjab Digital Library | www.panjabdigilib.org

कर्तृक इति अभिलष्यतिकर्तृरूपेणयान्यदभिलष्यति कर्म्म तत्कर्तृक इत्यर्थः यत्किं
चिद्विषयकप्रीत्यनुकूलव्यापाराश्रयो भिलष्यतिकर्त्ता हरिर्भक्तिमभिलष्यतीतिप्र
त्ययात् यत्किञ्चिन्निष्ठप्रीत्यनुकूलः प्रीतिव्यधिकरणो यो व्यापारस्तदाश्रयो रोचतेः
कर्त्तेति अभिलषतेस्तच्छब्दत्वाभावान्न तद्योगे सम्प्रदानमिति भावः स्वादुहरिनिष्ठे
ति षष्ठीति न च प्रीयमाणपदाभावे सूत्रस्य क्रियामात्रविवक्षायां सम्बन्धान्त
राप्राप्तिविषये चारितार्थ्येन परत्वादधिकरणसम्बन्धबाधसिद्धेः कथमेतदिति वा
च्यं देवदत्ते रोचते इत्यस्याप्याप्ते रित्याशयात् तत्सत्वे तु अस्य कर्म्मसंज्ञापवादत्वान्न
दोषः गोपीस्मरादिति श्लाघादेः स्तुत्यादिनाबोधनमर्थः स्मरादिति हेतौ पञ्चमी स्तुत्या
मानुरागं कृष्णं बोधयतीत्यर्थः स्तुतिश्च कृष्णस्यैव एवं ह्नुत्यास्थानुरागं कृष्णं बोधयती
त्यर्थः कुतिः सपत्न्यादिभ्यः कृष्णस्यैव एवं स्थित्याशपथेन च कृष्णं बोधयतीत्यर्थः
ईप्सितमानपदेत्यर्थः कर्म्मणः सनन्तोत्कर्म्मणि शानच् ॥ धारेरु० ॥ धृञ् ॥ वस्थानेइति

Digitized by Panjab Digital Library | www.panjabdigilib.org

त्वकर्म्मकविषयेसावकाशान्नचकर्त्तुः कर्त्तृत्वाभावेकथंयोगः कर्म्मत्वंकर्म्मसंज्ञायांक
र्त्तुर्यहतास्यस्वतन्त्रोपलक्षणत्वात् अतएवसार्थाद्बीयतइत्यत्रकर्त्तुरपादानत्वेपिकर्म्म
णिल्लकारः सिद्धः ननुकर्म्मणोत्युक्तोवकर्म्मकक्रियोद्देश्यस्यसम्प्रदानत्वंनस्यादतआ
ह क्रिययेति कर्म्मरहितक्रिययेत्यर्थः सकर्म्मकेषुकर्म्मसंज्ञाअस्याबाधिकेत्याश
येनाह पत्येशेतइति नचदानादीनांतदर्थत्वात्तादर्थ्येवसिद्धंकिमनयासंज्ञयेतिवा
च्यम् दाशगोघ्नोसम्प्रदानइत्यर्थत्वात् तत्सम्प्रदानंकन्यादानमितिबोधार्थन्तदावश्य
कत्वाच्च अतएवतादर्थ्येचतुर्थ्यांदानकर्म्मणोगवादेः सम्प्रदानर्थ्येपिदानक्रियाया
स्तादर्थ्याभावेनचतुर्थ्यन्तादर्थस्यदानक्रियान्वयानापत्तिरितिहेलाराजः तादर्थ्येच
तुर्थ्येवसिद्धेचतुर्थीसम्प्रदानइतिसूत्रं [illegible] हृच्छपर्यानामित्यादिविषयेचतुर्थ्यर्थमि
तिभाष्येस्पष्टं श्रुनेति कर्म्मत्वतीयार्थः [illegible] सम्प्रदानंद्वितीयार्थः एतच्चदानार्थकय
जधातुविषयेस्मार्थ्यैनपशोः करणत्वंन्यायसिद्धंइदं छान्दसमितिकैयटः अन्य

Digitized by Panjab Digital Library | www.panjabdigilib.org

धार्य्येत्यत आह साध्यं नास्तीति ननु साध्यमित्यर्थे ज्ञानेपि तस्य श्रमेणोत्पत्तिनामार्थत्वेन न क्रि
यात्वमत आह इहेति स्ववाच्यक्रियां प्रति स्वस्य करणत्वमित्यर्थः स्ववृं चेदामिन्यत्ताइतिसूत्रे
प्रविशपिण्डीमिति वाक्यार्थे वाक्यैकदेशप्रयोग इत्यादिना भाष्य इति मञ्जूषायां विस्तरः
अशिष्टेति अशिष्टानां संकीर्णचाततां यो व्यवहारः क्रियातद्बोधकप्रयोगेष्वत्यासत्त्यापत्
सम्बन्धेन व्यवहारस्य संकीर्णचात्वं न ह्यत्र चकाच्चतुर्थ्यर्थे तृतीयेत्यर्थः दास्येति दासीसम्
प्रदानकं रतिफलकं दानमिति बोधः इति तृतीया दानस्येति दाधात्वर्थस्येत्यर्थः इद
मुपलक्षणं क्रियामात्रस्य कर्म्मणेति सम्बन्धमिति शेषः अभिप्रेति इच्छति कर्म्मणा सम्ब
न्धश्च स्वत्वादिरूपः सम्प्रदानत्वशक्तिमान् सम्प्रदानं चतुर्थ्यर्थः स एवोद्देश्यः स्तुच्यते का
रकभावसम्बन्धश्च तदर्थः विप्रसम्प्रदानकं दानमिति बोधः कर्म्मणेति किम् तदभावे हि
कर्म्मणोप्युद्देश्यतयानाऽऽत्वात्तस्यैव संज्ञा स्यात् कर्म्मसंज्ञयानुपपत्त्या यो भविष्यति।
यं संग्रहणं किं तदभावे क्रियाकर्म्मणा यमभिप्रैति ओणगत्वादिः तस्यैव स्यात् कर्तृसंज्ञा

Digitized by Panjab Digital Library | www.panjabdigilib.org

ल०प्र०

२५२

नवातिनश्च एकार्थो मितितत्त्रेभाष्ये इत्याहुः सञ्ज्ञेः देवादिकस्य जनेर्ग्रहणं तस्या कर्म्म
कत्वादाह जायमानेमिति कर्म्मत्वशक्तिरेव तृतीयार्थः हेतौ हेतुरिह कारणं न शास्त्रीयस्तस्य क
र्तृसञ्ज्ञायाअपिसत्वेन कर्त्तृतृतीययैव सिद्धेः ननु लोकेकिंहेतुरपिकारणाभिमत आह इ
ष्यादीति आदिना गुणक्रियेसाधारणमिति तिन्न जनकेपि वर्त्तते इत्यर्थः कारणं तु क्रियाजनन
कमेवेतिभावः वैषम्यान्तरमाह निर्व्यापारेति कारणं तु व्यापारवदेवेतिभावः एवं च कार
णत्वशक्तेर्भिन्नैव हेतुत्वशक्तिस्तत्र तृतीयार्थ इति तात्पर्य्यं स्फुटप्रतिपत्तये कारणे वैलक्षण्य
माह कारणत्वन्त्विति हेतुहेतुमद्भाव एव तृतीयार्थः दण्डे व्यापारत्वेपि क्रियाजनकत्वा
भावान्न कारणत्वं पुण्ये क्रियाजनकत्वेपि निर्व्यापारत्वान्नतत्वं फलमपीहेति इहेतत्स

त

त्रोदाहरणे कश्चित्फलमपि हेतुत्वेन विवक्ष्यत इत्यर्थः तस्यापि स्वज्ञानद्वारा जनकत्वात् एत
च्चप्रत्यय इत्यादिसूत्रे भाष्ये कैयटे स्पष्टम् नन्वलंमल्लोमल्लायेत्यादौ क्रियावाचकपदाभावात्क्रि
यायाअप्रतीत्या कथं कारणत्वमतआह गम्यमानापीति अमेलोत्यादिपदजन्यबोधविष
यापीत्यर्थः नतत्र्वार्थ्यमाणतद्वाचकपदजन्यबोधविषयैवेतिभावः अलंशब्दो निषे

२५२

Digitized by Panjab Digital Library | www.panjabdigilib.org

णसाधनः तस्य कर्म्मषष्ठ्यन्तेनेत्यर्थः तत्प्राधान्येन समास इत्याह कश्चिदित्यादि जटाभिरिति
यद्यपि ताभिस्तापसो ज्ञात इत्यर्थः ज्ञानक्रियायां करणत्वादिदं सिद्धं तथापि करणत्वाविव
क्षायां लक्ष्यलक्षणभावविवक्षायां तृतीयार्थमिदं इत्यर्थः तस्य यत्र लक्षणं वाचकात्
इत्यनुक्तिः प्रयुक्तिरेव तत्रैवानेन तृतीया तेन कमण्डलुपाणिश्छात्र इत्यादौ कम
ण्डलुपदान्न तृतीया न चोत्पन्नायास्तृतीयायाः सुपो धात्विति लुक् इति वाच्यं एतेन समा।
सेतस्या उत्पत्त्या समासप्रातिपदिकानवयवत्वादिति केपटे स्पष्टं कमण्डलुः पाणौ यस्येति ब
हुव्रीहिः परे तु कमण्डलुपाणिश्छात्र इत्यत्र तृतीयापत्तिः कमण्डलुयुक्तपाणिरूपस्य कमण्ड
लुपाणित्वस्य लक्षणत्वेन तस्येतद्वाचकत्वात् तदुक्तमनुर्लक्षण इति तत्र भाष्ये स[illegible]
कमण्डलुपाणिश्छात्रो इत्यत्र तस्य तदेव लक्षणं भवतीति तदेवेत्यस्य कमण्डलुपाणित्वमे
वेत्यर्थः कमण्डलोर्लक्षणत्वे हि स एवेति वदेत् किञ्च तन्त्राधयपतितन्यायेन तद्विशिष्टस्य प्रा
तिपदिकत्वेन तस्य तदनवयवत्वात्क्तोक्तेरनौचित्येन लुको दुर्वारत्वं अत एव नाममन्य इत्यादौ वि
जनकत्वोत्तरपदत्वाय पूर्वं सुपो लुकि उत्पन्नत्वात् सुपो धात्विति लुक् अविधिसामर्थ्ये

Digitized by Panjab Digital Library | www.panjabdigilib.org

देशं क्रियावत्त्वं अत एव माषवापोत्र रे तत्रैव वक्ष्यते तिलवापेति लोस्महमाषान् वपती
तिर्भवति यद्यपि पुत्रेण सहागत इत्यादौ आगमनक्रियाकर्तृत्वादेव पुत्रात् तृतीयापि
।द्धा तथापि पुत्रेण सह स्थूल इत्याद्यस्य मुख्यमुदाहरणमिति भाष्ये स्पष्टं अङ्गेन अ
वयवेन इदं संनिधानलब्धं अङ्गिनोऽवयविनः सप्तेऽङ्ग शब्दौ र्घ्नाद्यजन्तो व्याख्या
नादितिभावः अक्ष्णा काण इति यद्यप्यक्ष्णैव काणं तथाप्यवयवधर्मस्य समुदाये
आरोपाच्छरीरे तदवच्छिन्ने च व्यवहारो निरूढ इति ध्येयम् यद्यपि काणशब्दो। लिंग
तविकारवाचक एव तथापि द्वौ विज्ञाविति वदन्नुक्तोति प्रयोगस्य साधुत्वं ईदृशानां स्वद
शानां साधुत्वे चेदमेव मानं षष्ठ्यपवादोयमित्याहाक्षिसम्बन्धीति अङ्गविकारः कि
मिति अङ्ग ग्रहणप्रयोजनप्रश्नः आक्षिकाणमिति प्रथमां बाधित्वा तत्रैव स्यात् ले
शतोपि दर्शनसामर्थ्यहीनत्वे काणत्वं इत्थंशब्दः प्रकारमात्रपरः शाम्यपीस्वः
कर्तरिक्तः कर्मविभक्त्यपनोनेत्थंशब्देन भूतशब्दस्य समासः लक्षणशब्दः कर।

Digitized by Panjab Digital Library | www.panjabdigilib.org

नन्वदेवशब्दस्य समासः नच शक्तिद्वयस्वीकारोऽत्र कर्म्मेति तिलकारे कारणत्वशक्तेरनुक्त।
त्वेन तृतीयापत्तिरिति वाच्यमपादानमुत्तराणीत्यस्योदाहरणे गोदोग्धीत्यादौ तत्र क।
र्म्मेति लकारेण चरमस्यापतिबाधनायैवद्वयगतानेकशक्तिमत्त्वे ध्ये एकस्या अभिहित।
त्वेऽपरस्या अपि तद्वत्प्रकाशेनाक्षतेः एकैव शक्तिः सञ्ज्ञाद्वयोपयोगिनीति तु चिन्त्यं कर्म्मा
दिपदानां कर्म्मत्वादितत्तच्छक्तिरूपतावोधकतया तयोर्भेदस्यैवौचित्यादिति मञ्जूषायां।
विस्तरः फलप्राप्तिरिति तस्याश्च सत्त्वात्प्रयोजनाभावाद्वेना। अपात्रवृत्तिरिति फलप्राप्ति
शब्देन तत्सर्वं कल्याण उच्यते त्यागस्य फलप्राप्तिर्व्युत्पत्त्यन्यत्र विस्तरः नापातइति अत्र।
नेनप्रफलाप्राप्तिरेव स्फुटमुच्यते सहयुक्ते प्रधानानामिति वत्सहेने सेव तिष्ठेयु
कोयहणे शब्दविशेषानादरे णार्थयोगे नव लिङ्ग्येथीमित्याह सहार्थेनेति अत एव कञ्चि
च्छब्दयोगं विनापि भवति तदाह विनापीति न्यायसिद्धोऽर्थो लिङ् मप्याह वृद्धइति सहा
र्थसाहित्यनाच्यत्वसमभिव्याहृतक्रियादिसमानकालिकतत्क्रियादिमत्त्वं कञ्चित्समान

Digitized by Panjab Digital Library | www.panjabdigilib.org

रूपवाचके पदे स्वरितत्वप्रतिज्ञया गोणाधातादेर्थहणं वाच्यं स्वरितेनाधिककार्य्यमित्यपर्थी
त् तमपातुप्रकृते तदभावो बोध्यते एवंच व्यवधानेन फलोत्पादके करणत्वोपचारेण
तृतीयान्तप्रयोगस्य साधुत्वबोधनं तम पूफलम् एतच्च मप्प्रवेशादेवान्यत्रत्वपि तत्त्वा.
मितिज्ञापते इति दिक् स्पष्टंचेदं स्वरितेनेतिसूत्रे भाष्ये तामेलोति कर्तृरि तृतीयापा: कर्तृ
त्वादिशक्तिमान् कर्तृकेपाँभाव: सम्बन्धस्याश्र्चस्य शक्तिमत्त्वंच व्यापारवत्त्वं वाम कर्तृ
कवाणकरणकव्रणविपाणापायो बालीतिबोध: प्रकृतादिभ्यइति इदं यथायोगं सर्ववि
मत्त्यपवाद: दिव: कर्म्मवचनेन सम्बन्धयोस्समावेश: तेन दिवस्साधकतमस्यपशक्तिरूपयो
गो बोध्यते तेनाक्षैर्दीव्यति इत्यत्र तृतीयापरत्वात् कर्मत्वाच्चाकर्मकत्वप्रयुक्तपास्मैप
दाभाव: अत्र विप्रतिषेधशास्त्रबलात्तृतीयैव शक्तिरूपबोधिकापदाक्षाणां फलाश्रय
त्वसमानाधिकरणकर्म्मकत्वविवक्षा तदाक्षान्दीव्यतीत्यादि साधु अंशानां देवितव्या।
दौ तृतीयातः परत्वात्तद्योगलक्षणषष्ठी मनसादेवस्यादौ हेतु तृतीयानोपचाय

करण५

Digitized by Panjab Digital Library | www.panjabdigilib.org

साधकतमार्थस्याविष्यतीतिप्रश्नः गङ्गायामिति अधिकरणत्वेनामहासंज्ञयैवविवक्षितु
आधारग्रहणसामर्थ्यात्सामर्थ्यात्सर्वावयवव्याप्त्या य आधारः सोऽधिकरणमित्यर्थः
स्यात् एवं चेदं सत्त्वे तिलेषु तैलमित्यादावेव प्रवर्त्तेत नहि गङ्गातीरं वा सर्वावयवैर्व्याप्नोतीत्य
र्थस्य घोषाधारत्वस्यात्यन्तसामीप्यात्प्रवाहेऽप्यारोपात्र बोध्यः यदा तु अव्यवहितो गङ्गातो
घोषस्तदा गङ्गाशब्दस्य तत्तीरे लक्षणा न तमग्रहणे ग्रहणेन शब्दसामर्थ्येन गम्यः प्रकर्षो
नाश्रीयते इति न्याय्यते इति गौणाधारस्याधिकरणसंज्ञा सिध्यति एवं गङ्गायां गावः इत्यु
दाहरणं सर्वावयवव्याप्त्यभावेन तु व्याप्याधारत्वाभावात् गौणमप्याधारत्वादिसम्भवादिशाब्द
मेवेति बोध्यम् इदमत्र तत्त्वे भाष्ये स्पष्टं यदि तु महासंज्ञापातनात्क्षेपकरणं समर्थ्येऽत्रेति
आधारादिपदे चरितार्थे साधकशब्दस्य प्राप्यापादाननाम्नेमव्यवधानेन फलोत्पादस्तत्र
शक्तिराधारशब्दस्य चाश्रीयते यस्मिन्निति व्युत्पत्त्या कर्तृकर्मणोर्धारणं क्रियायामिति सर्वाव
यवव्याप्त्याय आधारस्तत्र शक्तिरित्युच्यते तदोक्तप्रयोगादि साधनापकारकप्रकरणोऽर्ह

Digitized by Panjab Digital Library | www.panjabdigilib.org

कालाध्वनोरत्यन्तसंयोगे प्रत्यासत्त्या कालाध्ववृत्तिभ्यां द्वितीयेत्यर्थः मासमधीत इति वु
द्धिस्थयावदवयवसम्बन्धरूपात्यासत्तिर्द्वितीयार्थः एकादश्यां तत्रैवागत्यादित्यादावधिक
रणत्वविवक्षाणां न द्वितीया   इति द्वितीया   स्वतन्त्रः कारकाधिकारात् क्रियाया
नेन स्वतन्त्र इत्यर्थस्तदाह क्रियायामिति स्वातन्त्र्यं च कर्तृप्रत्ययसमभिव्याहारे धात्वर्था
श्रयत्वं यथा पचति तंडुलो देवदत्त इत्यत्र फलस्य प्राधान्येपि देवदत्तस्य कर्तृत्वसिद्धये कर्तृप्रत्ययस
मभिव्याहार इति तिङां च वस्तुवाचकत्वमेवातस्तत्रापन्नाधातौ त्वकृति धात्वे तदुभयवाच्यव्या
पारयोः स्वस्वार्थं प्रति प्राधान्याद् देवदत्तेन यज्ञदत्तः पाचयतीत्यादौ प्रयोज्यव्यापाराश्रयस्य
ापि कर्तृत्वसिद्धये ईप्सितकत्वे तु नैतत्सिध्येत् कारक इति सूत्रे भाष्यात्स्वातन्त्र्यं क्रियाकारकप्र
वर्तकत्वं स्वातन्त्र्यमिति लभ्यते प्रकृतसूत्रे भाष्याच्चेति मञ्जूषायां निरूपितम् प्र
कृष्टेति यथा पारव्यवधानेन क्रियानिष्पत्तिस्तत्प्रकृष्टं तमब्ग्रहणं किमिति कारका
धिकारात्करणे लब्धे कारकेति महासंज्ञया च साधकत्वे लब्धे साधकग्रहणमेव

२

Digitized by Panjab Digital Library | www.panjabdigilib.org

मनसगोचरं विष्णुमपिस्तुयादितिशास्त्रं तत्कर्षो विष्णुस्ततो अनुक्तिरसंभाव्यार्थसंभावनम्
सम्भावनपदस्येदृशार्थेकत्वेप्यात्मानमेव शास्तं विष्णुविषयापापाः शाक्तत्वसंभावनेवा।
न्यविषयानिश्चयेन शाक्याकर्तुमिति फलतीति शा॰ स्तुत्कर्षमिति योत्वित्योत्कर्षादेरप्युपलक्षणं
अपि विदान्तापारगेहन्यादित्यादौ हननक्रियायां संभावनाविषयोचित्योत्कर्षद्योतनात् सं
भावितौचित्यस्य चानुष्ठानमप्युक्तमिति अस्यस्यार्थे तात्पर्यं भावोध्यम् शास्त्रोक्तसंगच्छते
कामचारस्त्वभ्यनुज्ञाप्रवृत्तिः स्तुहिमावापथ्येवं कुर्विति पावकतिबाते मन्त्रेतिलङः अपि स्तुयाद्व
षलमिति उपसम्बादेतित्स्त्रपठितं वार्त्तिकेन पोत्तानां ऽ॰ता च गर्हायां लङ्पि बाधित्वा संभा
वनेलिङ् क्रियागतं गर्हयेत्वमपि योत्य वृषलपदसमभिव्याहारात्तत्तेगर्ह्यत्वे तत्कर्तुर्गर्ह्य
त्वं फलतीति तदेवाधिगित्यादिनान्वयते अपि सिञ्चेत्यादि अपि धृपेन मिलितेन समुच्चयद्योत
नात्सप्तत्वेकं समुद्भायामुभयत्रापियहणां बन्धाभावः कालाध्व॰ अत्यन्तसंयोगो निरन्तरस
म्बन्धः सच गुणक्रियाद्रव्यैर्भावेन च तेनमासं भोजनानाभावइत्यादेः संग्रहः गुणादिभिः

Digitized by Panjab Digital Library | www.panjabdigilib.org

तिभावः कर्म्मप्रवचनीयत्वात्तद्योत्यसम्बन्धमाह तस्या एवेति संभावनाया एवेत्यर्थः क
र्त्तृदौर्लभ्यमिति षष्ठीतत्पुरुषः कर्त्तृपदं प्रकृताभिप्रायं सर्पिषोपिपिबेदित्यादौ कर्म्मदौर्ल
भ्येत्यादिबोध्यम् तत्र बिन्दोरपि दौर्लभ्यप्रयुक्तदौर्लभ्यसम्बन्धस्य च द्योतकोपिः संवध्यते इ
ति स्यात्पदवाच्यक्रियायामपि द्योत्योक्तसम्बन्धेन चान्वयादितिभावस्तदाहापिशब्दबले
नेत्यादि एवं च सर्पिरवयवबिन्दुदौर्लभ्यप्रयुक्तदौर्लभ्यवती तत्कर्त्तृका संभावनाविषयः
स्यादितिबोधः विशिष्टसत्तायाः संभावनाविषयत्वबोधे दौर्लभ्यस्यापि संभावनाविषयत्वमनुभ
वसिद्धम् नन्वेवं कर्म्मप्रवचनीयद्योत्यसम्बन्धप्रतियोगित्वमेव तत्प्रयुक्तत्वं प्रकृते चापिद्योत्य
स्योक्तसम्बन्धस्य विन्दुः प्रतियोगि न सार्पिरितिभावः यद्यस्य प्रतिपत्तये पिद्योत्यस्यापि
बिन्दोः प्रयोगस्तदापि द्वितीयां बाधित्वोपपदविभक्तेरिति प्रथममेव तत्र कारकविभक्तित्वं
क्रियाजनकत्वार्थकविभक्तित्वमित्यादिकं सम्भ्रा फलमाहानुपसर्गत्वादिति अपित्व
यावृत्ति पूर्ववन्निरः क्रियाविशेषणत्वादिना संभावनमपि द्योत्यम् प्रकृतेः वाः

Digitized by Panjab Digital Library | www.panjabdigilib.org

स्यादित्यर्थः कुतोध्यधीति कुत इत्यपादाने पञ्चमी द्वितीयान्तेन कर्म्मप्रवचनीययोगात्यसम्बन्धप्र
तियोगित्वस्यास्य कर्म्मप्रवचनीययुक्तत्वस्याभावात् गतिसञ्ज्ञाबाधादिति धात्वर्थमात्रद्यो
तकत्वेन क्रियायोगात् गतित्वम्प्राप्तं विशेषद्योतकत्वाभावात्त्वनर्थकव्यवहारोपीतिभावः सु
सिक्तमिति सेकगतमहत्त्वद्योतकः सुः क्रियामहत्त्वकृते नमनतत्क्रियाकर्त्तुः महत्त्वेगम्येप ए
वैषा सञ्ज्ञा अतएव सुषिक्तं किन्तवैतत्रम अतिक्रमणानुज्ञितादधिकानुष्ठानं चात्र ना यामि
त्यनुकृष्यते अतिदेवानिति देवेभ्योधिकोदेवइत्यइतिवार्थः द्वितीयिकुगातीतिसमासस्याभा
वस्तु अनभिधानात् आपेतुप्राप्तिरेवनस्वेतीमनायामेवेत्युक्तेः अपिः पदार्थः पदस्याप्र
युज्यमानपदान्तरस्य अर्थः पदार्थः सर्पिषोपीति अत्रबिन्दुरित्यादेः पदस्यार्थोपियोग्यः
तदुक्तं वृत्तिकृता मात्राबिन्दुः स्तोकमित्यस्यार्थेपिवर्त्ततेइति सम्भावनायां लिङ्. ति उपसंवा
दाशंकयोश्चेतिसूत्रभाष्ये पठितेनोपसम्वादाशंकयोर्लिङ्. त्यनेन तच्चलोकवेदसां।
धारणमित्यपितत्रैवभाष्येस्पष्टम् तत्राशंकोत्प्रेक्षा सम्भावनाप्युत्कटकोटिकाशङ्कैव

Digitized by Panjab Digital Library | www.panjabdigilib.org

पेक्षयाधिकत्ववान् द्रोणादित्यर्थः तेनैभ्यवमसौमिफलाति इत्थंभूतः कश्चित्प्रकारमाप्तः स
आख्यायतेनेनेति इत्थंभूताख्यानं प्रकारविशेषनिरूपकं भागशब्देनार्थोऽयमन्तेन तत्त्वा
मी उच्यते वीप्सायां द्विर्वचनविषयं वृक्षशब्दं बोधयन्नाह विषयभूतेष्विति वृक्षम्प्रतीति वृक्ष
प्रकाशेन विद्युद्विद्योतनदेशज्ञानाद्वृक्षो लक्षणं वृक्षं वृक्षमिति वृक्षस्य व्यापकतासम्ब
न्धेनान्वयोपपत्तये द्विर्वचनबलादेव तथापि मत्यादिसत्त्वे बोधितनिर्णायक इति सम्बन्धप
रिच्छेदकत्वबोधनम् वृक्षादीनां सेचने कर्मत्वेपि तत्त्वेनाविवक्षायामनेन द्वितीया किञ्च।
यद्यत्र कर्मणि द्वितीया स्यात् तदा प्रतिना सामर्थ्याभावात्प्रतिवृक्षमिति समासानापत्तिः अ
तएव भाष्ये किमर्थम्पुनरिदमुच्यते न चोपसर्गसंज्ञाबाधनार्थं क्रियायोगाभावादित्युक्त्वा
द्वितीयार्थमिति सिद्धान्तितं अतएव च प्रत्यर्थं शब्दनिवेश इत्यादावर्थस्य निवेशनक्रिया
निरूपिताधिकरणत्वरूपमर्थम्प्रतीति विग्रहो भाष्ये दर्शितः वृत्तिविषये तु प्रतिरेव विप्सा
यामपि द्योतक इत्यन्यदित्यास्तां फलान्तरमप्याहात्रेति यदत्रेति यद्यस्य भागः

Digitized by Panjab Digital Library | www.panjabdigilib.org

णभावरूपेतुनाद्योत्यइत्यर्थः अपवाद इति तद्द्योत्यसम्बन्धस्य क्रियान्वयात्तयो:।
प्राप्तिः तेन प्रकृते तेर्गतीगतावितिनिपातेनाद्वितीयार्थी लक्ष्यलक्षणभावः सम्ब
न्धो हेतुश्चेत्यनुनाद्योत्यते लक्षणेऽभ्वत्तानजनकज्ञानविषयत्वं जपज्ञानेन हि काल
विशेषविशिष्टावृष्टिर्ज्ञाप्यते जपाभिन्नाहेतुज्ञानजन्यज्ञानविषयो वर्षणमिति बोध इ
त्याह हेतुभूतेति यत्तपीति कर्मप्रवचनीयलभ्यावकाशो हेतुत्वाविवक्षायां हेतुतृतीयावका
शोधनेनकुलमितिप्रकृतेचहेतुमत्त्वविवक्षायांपारत्वायां तृतीयाप्राप्तिरितिभावः पुनःसंज्ञे
ति लक्षणेत्यभूतेत्यवसिद्धे पुनः संज्ञाकरणं बाधितपुनर्द्वितीयाविधानसामर्थ्यादित्यर्थः
एतेन सत्यपि वितृतीयापत्वाद्विभक्तिबाधः कर्तुमशक्यइति परास्तं स्पष्टं चेदम्भाष्ये तृतीयार्थे
तृतीयाशब्देनतन्निमित्तशब्दः सत्युक्त इत्यत्रोपपातेऽनन्तत्वात्सहशब्दो लक्ष्यते तदर्थे साहित्य
द्योत्यइत्यर्थः साहित्यरूपसंबन्धोऽनुद्योत्योद्वितीयार्थस्तदाह नद्येति तद्धेतिकर्त्तरीतिभावः
उपोधिकार्थीने सप्तमीति यस्माद्धिकमित्यनेनेतिभावः उपखार्यांद्रोणइतिवयायोर्व्यव

Digitized by Panjab Digital Library | www.panjabdigilib.org

ल०प्रो०

२५६

तेनेति सिद्धमन्तरान्तरा विशेषणेनोत्पर्षः एवञ्चैतयोरव्यययोरेवग्रहणं पर्य्यान्तरशब्द
स्याव्ययमेकवचनान्तस्यानभिधानादन्तरा इत्यानुपूर्वीकमव्ययमेव प्रयोगे भुद्दश्य
ते इति तत्साहचर्य्यादन्तरेणेत्यप्यव्ययमेव तदुक्तं भाष्ये अन्तराशब्दोयमदृष्टापचारो
निपातएवेतीति बोध्यम् अवधित्वरूपः सम्बन्धो मध्यत्वान्वयी मध्यार्थोन्तराश
ब्दयोगे द्वितीयार्थः तस्यैव सम्बन्धत्वेन बोधे षष्ठी हर्य्यादिपदात्तु न द्वितीयाऽप
पदविभक्तेरितिन्यायेन तत्र प्रथमायाएव प्राप्तेः प्रत्युक्तग्रहणानुपपत्त्यर्थम् अधि
कृत्येति विभाषाकृञीत्यन्तमिति बोध्यम् महासञ्ज्ञाकरणं त्वन्वर्थत्वाय कर्म्म क्रियां
प्रोक्तवन्तः कर्म्मप्रवचनीयाः बहुलकोक्तर्त्तरि भूते नीयः तेन सम्प्रति क्रियां न द्यो
तयन्ति किन्तु क्रियानिरूपितं सम्बन्धविशेषं द्योतयन्ति क्वचित्सम्बन्धविशेषा।
द्योतिकेपि चेद्वचनसामर्थ्यात्सञ्ज्ञा यथाधिपरी अनर्थकौ सुः पूजायामिति च
निपातसञ्ज्ञया समावेशात्त्वयोः अपुक्तः लक्षणे इति तत्सम्बन्धे लक्ष्यलक्ष

Digitized by Panjab Digital Library | www.panjabdigilib.org

ध्वनोरितिद्वितीया ग्रामेउपवसतीत्यत्र ग्राममवमन्त्रिरात्रमुपवसतीत्यर्थ इति इदं नका
र्य्यमितिभाष्यस्पष्टं उपपदविभक्तिमाह उभेति उपपदविभक्तीनां सम्बन्धोर्थः विप्र
ष्ठार्थानुक्तेः षष्ठ्यपवादत्वाच्च उभसर्वयोस्तसावितिविग्रहः उभांशेउभयशाष्द।
निष्ठप्रकृतित्वमुपशोष्य आतोप्पतत्प्रकृतिकत्वं षष्ठ्यर्थः उभयशाष्द सर्वशाष्द प्रकृति
कतसन्तयोगे इत्यर्थः आम्रेडितान्तेष्विति कृतद्विर्वचनेष्वित्यर्थः धिक् कृत्येति धि
गर्थेनिन्दा कुत्साभक्तसम्बन्धिनिन्देत्यर्थः उपर्य्यादीनां समीपोर्द्धदेशादिवृत्तित्वम
र्थः अभितः परितः इत्यत्र पर्य्यभिभ्यां चेति तसिल तत्राघस्योभयत इत्यर्थोन्यस्य सर्व
त इत्यर्थः इति पर्य्यभिभ्यां चेत्यत्र भाष्ये अन्तरान्तरे अन्तरेण त्यपवन्तसाहचर्य्या
दन्तरेत्यघवन्तौ अन्तरेत्यन्ततीयान्तौ साहचर्य्याद् अन्तरेणेत्यन्ततीयान्तौ साहचर्य्यं साह(
रूपं तथाघास्य गोर्द्धितीयेनार्थ इति गोरेवापनीयते नाश्वो न गर्दभ इति दृष्टान्तपरिभा
ष्येत्ससदृशानामेव प्रयोगे सहायतेत्यर्थस्य प्रतिपादनात् तेन किमनयोरन्तरेणास्ता

Digitized by Panjab Digital Library | www.panjabdigilib.org

ला०श्रो०

२७५

सङ्गत्वनभिधानाद्धारणीय इति वदन्ति ह्रक्रोः तत्राभ्यवहारस्य हरतेर्भक्षणार्थत्वादविकारा
र्थकत्वेतेश्चाकर्मकत्वात्प्राप्तेर्यायन्तोऽपि चाप्तेऽभयत्र विभाषेयम् अभिवादिदृशः हेतुमत्यणन्त
स्याभिवादेर्दृशेश्च ग्रहणं तिकल्पनात्स्यचेत्यर्थः अधिशी० आधार इत्यनुवर्त्तते तस्यैवक
र्मत्वशक्तिमत्त्वानेन बोध्यते अभिनिविशश्च अभिनीति द्वन्द्वस्तत्र वोदिष्टिरिति समासः।
अभिनिवेशः आग्रहः सन्मार्गविषयकाग्रहवाचित्यर्थः व्यवस्थितेति परिकल्पनाद् इत्यन्यतो
न्यतरस्यांग्रहणानुवर्त्तेरस्यैवैकल्पिकत्वं प्रातिप्रसङ्गत्वनभिधानाद्धारणीयः एव
ञ्चैवाभिनिविष्टा नामितिसमर्थे च त्रैकेयपरे परेत्वेतज्ज्ञाप्यप्रयोगादभिनिविशत्यानु
पर्व्यां अविकृतापायत्र अग्रवाणे तत्रैवेन तत्स्वप्रवृत्तिरन्यतरस्यांग्रहणानुवृत्तौ व्यव
स्थितविभाषाश्रयणेऽचनमानमित्याहुः उपान्व० अन्वधिकरणत्वाभावाद्देवग्रहण
मित्याह वसतेरिति भाष्ये स्पर्द्धायामनेनतुकं न शाकार्थेऽध्यमिति वदन्ति निवसत्यर्थ
स्येति तदर्थस्तात्पर्यमाह अनुत्तपर्थस्य नेति उपोष्य रजनीमेकामित्यादौ कालात्॥

२७५

Digitized by Panjab Digital Library | www.panjabdigilib.org

कं नचकेचित्कालाभावाद्धर्मिकेकर्म्मकास्तु एवं विज्ञास्यामः कश्चिद्येकर्म्मकाइतीत्युक्तं
कश्चिदित्यस्यकालादेः कर्म्मसंज्ञाप्रयोजककृत्याभ्यादिरहितेइत्यर्थः तस्यायंभावः उक्त
रीत्याऽकर्म्मकपदसामान्याद्यत्रशास्त्रेऽकर्म्मकपदस्यावस्थान्तरेकर्म्मरहितेइत्यर्थेइत्य
र्थेइति तादृशत्वंचसर्वेषांद्व्यकर्म्माभावात् तदविवक्षणाद्वेत्युभयविधमपिकृतएवी।
त्यादिभाष्यग्रन्थविनिगमनाविरहाच्च अतएवाकर्म्माधिकारेऽकरद्यपादिभ्यश्चात्मनेप
दविधानंसंगच्छते अकर्म्मशब्देचधातुरेवान्यपदार्थः अर्थभेदेनचशब्दभेदः कर्म
त्वेनकालाद्यतिरिक्तकर्म्माननुयोगिकत्वंचतत्त्वमितिबोध्यम्॰ नचकेचिदितिभाष्ये
णधातुमात्रस्यकालकर्म्मकत्वेवचित्त्वमितिदर्शितं पठ्यायत्कर्म्मभवति नचभव
तितेनाकर्म्मकालानंचैकेचिदितिप्रतीकमुपादायकालादेरविवक्षयातेऽकर्म्मकत्वसम्
भवोत्सेवेत्याशङ्क्यात्मनाविद्यमानकर्म्मकालामेवात्रशास्त्रेऽकर्म्मत्वपपदेनग्रहणम्।
मन्यथापच्यादीनामविवक्षितकर्म्मकत्वेलादयःस्युरितियत्कैयटेनोक्तंतत्त्वताखं अतिप्र

Digitized by Panjab Digital Library | www.panjabdigilib.org

मान्यापेक्षं ज्ञापकं शास्त्रेऽकर्म्मकपदेनेदृशानामेव ग्रहणमिति तेन मासमास्यत इत्यादौ।
भावे लो भवति॰ नत्विति तदविवक्षाहि धा द्विधा तदन्यपर्योगपधात्वर्थत्यागात् सत्वेच ता।
त्किन्नर्थे तत्र सम्बधित्वेनान्यपविवक्षणाच्चेति भावः इदं केयटानुरोधेन परेतु अविवक्षि
तकर्म्मणामप्यकर्म्मकपदेन ग्रहणं कादीमविवक्षितकर्म्मकेभ्यः कृतस्वीकारमित्या
दौ भाष्यकृता केयटेन चाङ्गीकारात् लुनाते र्निवृत्तप्रेषणात् तत्तिच्चिलावयति केदारं देव
दत्त इत्यादौ केदारस्य कर्म्मद्वितीयान्तस्य तेरणाविस्यत्र केयटेन प्रयोगाच्च नचात्रार्थो।
नार्थेवस्याऽकर्म्मत्वेनत्वाविवक्षयेतिवाच्यं तत्त्व प्रत्यभिज्ञपार्थान्तरत्वाभावात् तदुदाह
रणान्तुस्यन्दतेइत्याद्यर्थकं नदीवहतीत्यापाकरेस्यपं अधीगार्थेतिसूत्रे कर्म्मणः शेष
त्वविवक्षयाऽकर्म्मकत्वमातुः स्मर्य्यते इत्यत्र भावे लस्य भाष्य उदाहृतत्वाच्च यत्तु प्रकृतसूत्र
~~त्रैकौलकर्म्मत्वेनत्वविवक्षयेतिवाच्यं तत्त्वप्रत्यभिज्ञपार्थान्तरत्वाभावात् तदुदाहरणं~~
~~रणान्तु स्यन्दते इत्याद्यर्थकं नदीवहतीत्यापाकरेस्यपं~~ कालकर्म्मणामुपसंख्याने कर्त्तव्यं नकर्त्त

Digitized by Panjab Digital Library | www.panjabdigilib.org

पत्नं वाच्यमिति तस्यगत्यर्थत्वमेवेतिबोध्यम्‌ः आदिखादयोऽतीति प्रत्यवसानार्थत्वात्त्रास्ति
प्रत्यवसानं भक्षणं भक्षयति बलीवर्दानिति हिंसायां भक्षणे भक्षेर्वृत्तिः परकीयस्यभ
क्षणेऽपत्तोहिंसितो भवतीति तत्स्वामिनोऽत्रहिंसा द्रष्टव्या जल्पयतीति पुत्रोधर्मंजल्पति त
द्बोधकवान्तानिकस्यपति देवदत्तोजल्पयति धर्म्मम्पुत्रमित्यर्थः शब्दापयतीति शब्दंकरोति
त्यर्थेशब्दवैरत्यादिक्षाङन्तासिच परे तु शब्दक्रियाणामित्यर्थेह्वापयति शब्दापयति
क्रन्दयती नोऽप्रतिषेधउक्तोभाष्ये ननुशब्दकर्म्मकाणामितिपक्षेएवंचतत्रपक्षे भाष्ये
शब्दापयतोऽप्रतिषेधानुक्तः कर्म्मकशब्दापतिसत्वेनमानं शब्दस्यधात्वर्थसंगृहीतत्वे
पिवह्निर्गतपुत्रादिकर्म्मणोऽभावेमानाभावात्ह्वापतादिवेतिचिन्त्योऽयंनिषेधस्त्वाहुः
येषामिति अयंभावःगतिबुद्धिप्रत्यवसानार्थशब्दकर्म्मकाणामणिकर्त्तासणौविनिमित्ते
त्रेनियमस्यसजातीयापेक्षत्वात्सकर्म्मकाणांचेदेषांमेवेतिनियमनपरंएवंसिद्धेकर्म्म
कग्रहणंसामर्थ्याद्देशकालादिभिन्नकर्म्माभाववतोकर्म्मकग्रहणेनग्रहणार्थंमात्रसा

Digitized by Panjab Digital Library | www.panjabdigilib.org

दितिबोध्यम् अन्यानधीनत्वलक्षणार्थप्राधान्यस्य शाब्दप्राधान्ययोः प्रयोजकव्यापारेण
त्वेन तदनुरोधिकर्मत्वस्यान्याकाङ्क्षादपि कर्तृत्वाद्बलवत्त्वेन कर्तुरित्यवसिद्धेति। नर्थीनाव्य
मानस्य चेऽत्यर्थादीनामेवेति नियमार्थमिदं तेन पाचयत्यादियोगे नेति हेतुमति चेति सूत्रे
भाष्यकृतः प्राधानकार्यं सर्वतो बलवदिति आकडारसूत्रे कैयटे स्पष्टम् तेन गत्यादियो
गेऽप्यन्यस्य कर्मत्वशक्तिमत्त्वापाचयत्यादियोगे कर्तृत्वशक्तिमत्त्वमेवेति बोध्यम् गम
यति देवदत्तो नेति यत्र कर्मकगमनानुकूलदेवदत्तकर्तृकव्यापारानुकूलो विष्णुमित्र।
कर्तृको व्यापार इति बोधः अन्यदेवदत्तस्य न कर्मत्वं नियमविति नियन्तृकर्तृकल्पना।
अकर्तिमतस्य त्वर्थः प्रापणार्थवहेर्गत्यर्थत्वाभावेपि ग्रामम्प्राम इत्यादौ तत्प्राप्ते गतिम्वि
नाऽसम्भवादादिमगत्यापि गत्यर्थत्वमित्यभिमानेन वार्त्तिकारम्भः सुखम्प्राम इत्यादौ
न तदाक्षेपः तत्र कर्त्रतिरिक्तस्यादिकर्मेति बोध्यः अत एव ग्रामम्प्रापयति देवदत्तेनेत्येवेति
ध्वनितं भगतीति सूत्रे नवेति सूत्रे च भाष्ये नयतेस्तु याप्राप्यतो इत्यादिविगन्तुपसर्जनं प्रा

Digitized by Panjab Digital Library | www.panjabdigilib.org

र्थानुवादिका हरेः कारिका कालभावाध्वदेशानामन्तर्भूततक्रियान्तरैस्सर्वैरकर्म्मकैर्योगे।
कर्म्मत्वमुपजायतेइतिसकर्म्मकविषयेप्यनेनप्रकारेण कालादिकर्म्मणा सकर्म्मकत्वं
तुल्यन्यायात् तेनमासमोदनंपचतीतिभवति तत्रकालादिकर्म्मप्रधानंद्रव्यकर्म्मतुप्र।
धानंकालस्याधारत्वेचद्रव्यद्वारैवक्रियासम्बन्धात् किञ्चकठिनवपाकस्यमहापरि
माणस्यबहुसंख्यस्यचचिरेणपाकोन्यस्याचिरेणेति द्रव्यधर्मस्यव्याप्तौच्चक्रियासु
कालयोगइतिसबहिरङ्गः अपिनसाधनसम्बन्धेजातेक्रियायाः परिच्छेदकत्वात्
कालाकांक्षेतिसबहिरङ्गः अकर्म्मकव्यवहारस्तुधातूनांद्रव्यकर्म्माभावनिमित्तकएव।
अत्रबीजंवक्ष्यते तदुक्तं अतस्तैःकर्म्मभिर्युक्तोधातुर्द्रव्यैरकर्म्मकः लक्ष्यकर्म्मणोभावे
चनिमित्तत्वापकल्पतेइति गतिबुद्धिः शब्दः कर्म्मकारकंयेषामित्यर्थः व्याख्यानात् तेन।
हापयतिकान्दपत्योर्न आणाविणिणिच्यसुत्पन्नेरर्थः अत्रणिजर्हेतुमणिजेवलणा
वित्यत्रापिसएवव्याख्यानात् अतएवभक्षेर्निषेधस्चरितार्थः सहिनित्यपन्नाप्युत

किञ्च भाष्ये निष्क्रियत्वतो वैयर्थ्यापत्तिः उभयार्थकयाचिग्रहणेनैव सिद्धेरित्यन्ये
त्वकर्म्मकधातुभिरिति तेषां स्वकारणोक्तव्यापनेच्छया व्याप्तिरूपफलाश्रयत्वेन क
र्त्रैकर्म्मत्वे मासमास्ते इत्यादेर्मासं समासनेन व्याप्नोतीत्यादिक्रमेणार्थ इति भावः॥
यत्विदमेव कर्म्मसंज्ञाविधायकमिति तन्न भाष्ये तादृशवचनानुपपत्तेस्मात्।
अकथितं चेति सूत्रे कर्म्मकप्रकृतिकल्पनानां कर्थोद्धि कर्म्मकत्वमिति शंकायां
कालभावाध्वगन्तव्याः कर्म्मसंज्ञा ह्यकर्म्मणां देशश्चेति भाष्ये उक्तं तच्च न विधायकं।
हि शब्द घटितत्वात् किञ्च कालाध्वनोरिति सूत्रे कालाध्वानौ कर्म्मवदिति वक्तव्यमिति वा
र्त्तिकप्रत्याख्यानेप्राहुः तमेवैतत्कर्म्म यथाकरं कतेनीत्युक्तं अस्य वचनत्वे उक्तं वा प्राहुः तं
वेति वदेत् तस्मात् उक्तरीत्या कालादीनां तद्योगे कर्म्मकत्वमित्येव तत्त्वात्पर्य्यम् अत एव
समासं मासं विनाय वृतेरिति सूत्रे समां समां विजायते इति विग्रह कैयटन परं भाष्ये संगच्छ
ते अन्यथानेन द्वितीयायां एव तत्र साधुत्वेन तदसंगतिः स्पष्टैव अत एवोक्तभाष्यात्

Digitized by Panjab Digital Library | www.panjabdigilib.org

त्वे तु कर्त्तुरितिकर्म्मत्वेव तत्त्वेनाविवक्षायामप्यनेन कर्म्मत्वमितिपरास्त्वं वदतो व्या
घातात्॥ अतएव कर्त्तुरित्यनेन न सिद्धिमाशंक्य त्यास्य वैयर्थ्यं भाष्ये नाशंकितं कारक
मितिक्रियाजनकमित्यर्थः॥ नन्वेवं नरस्य नगरं गच्छतीत्यादावतिप्रसंगः॥ सर्वथा
तत्र तदप्राप्तेः॥ गीतद्वाराविवक्षायां चानेन कर्म्मत्वं अत्र कर्त्तृव्यापारानन्तरं तज्ज्ञा
नाश्रयत्वरूपो मानवकस्य धर्म्मेण सम्बन्धः॥ न पतेस्संयोगानुकूलव्यापारानुकूल
व्यापारोऽर्थः॥ एवं तर्कन्ध्यग्रहणाद्धि दिग्वर्वी वहेरर्थः॥ गत्यनुकूलव्यापारविशेषः
लक्षेः वलात्यहणार्थकं देशान्तरप्रापणं हरतेः एषु कर्त्तुरितिकर्म्मत्वमबोध्यम्
एवं च भाष्यानुक्तानामत्र ग्रहणं ज्ञाचामनुरोधेनेति तत्त्वं भाष्योक्ताहिङ्डिहिपाचि
दुधिप्रच्छिभिक्षिचिञ्ब्रुविशासयः॥ अर्थे निबन्धनेयमिति इदमपि वे(?)पदानुरो
धेन॥ वस्तुतस्तु येषामेतदर्थानां द्विकर्म्मकत्वमिति तेषां बालरञ्जा(?)र्थेत्वे न कर्त्तुरि
त्येव सिद्धमन्यथा ज्ञात्वा तोयपयोगे इति सूत्रभाष्ये ऽ(?)परिगणनत्वसङ्गपत्तिः॥

Digitized by Panjab Digital Library | www.panjabdigilib.org

२१०श्लो०

२४१

तंडुलानिति तन्तुलान् विक्लेदयन्नोदनं निर्वर्त्तयतीत्यर्थस्य कर्त्तुरितिसूत्रस्य भाष्यं
केयटसंमतत्वेन कर्त्तुरित्येव कर्म्मत्वसिद्धेरस्यैतदुदाहरणत्वं चिन्त्यं एवं त्वसम्प्रदान
कदानानुकूलव्यापारानुकूलशासनरूपव्यापारार्थदलग्राद्दियोगे पितेनैव लिद्धं ए।
वंव्यापारद्वयार्थत्वेनसतिप्रयोगेबहूनान्धातूनांद्विकर्म्मत्वमन्वोध्यम् ग्रममिति निर्गम
प्रतिवन्धकपूर्वक यत्किञ्चिदधिकरणकचित्स्थित्यनुकूलव्यापारोवत्सधात्वर्थः ग्रमे
गोस्तिष्ठतितत्रतान्निर्गमप्रतिवन्धकपूर्वकंचिरंस्थापयतीतिसम्प्रत्ययात् अधिक
रणत्वाविवक्षायामेवतत्कर्म्मत्वं व्यापारद्वयार्थत्वेकर्त्तुरितिकर्म्मत्वं पन्थानमिति जि
ज्ञासाविषयार्थज्ञानानुकूलः केनयथागन्धव्यमित्यभिलापादिरूपोव्यापारः पृ
छेरर्थः ज्ञानविषयत्वेन पथः कर्म्मत्वं माणवकेनच तज्ज्ञानाश्रयत्वेसम्बन्धः
अपादानत्वंतुनात्रनप्रश्नादेर्वाधापायोभवति एवंशेषयथाचष्टेतदापादेनगृह्यते इ
तिभाष्योक्तेः सम्प्रदानमपिन कर्म्मसम्बन्धेनेच्छाविषयत्वाभावात् व्यापारद्वयार्थे

२४१

Digitized by Panjab Digital Library | www.panjabdigilib.org

गवादीनां कर्मत्वाविवक्षया । शेषान्वये षष्ठी न अनभिधानात् । षष्ठ्यन्तस्य पयसोऽन्व-
यस्यान्यानामसमभिव्याहारे तत्रैवान्वयस्योत्सर्गतो व्युत्पन्नत्वाच्च । अत एव तण्डुलानामो-
दनं पचतीत्यत्र धात्वर्थश्चेव पचेर्विकारयोगिकार्थीत्यव कर्तुरीतिसूत्रे भाष्ये उक्तमि-
ति दिक् । बलिं याचते इति यदात्वनिवृत्तिस्वत्वोत्पत्त्युभयानुकूलो व्यापारो याचेर-
र्थः स्वत्वैर्बलेर्निरूपकतयान्वयसत्त्वेनेन कर्म्मत्वं । एवं विषयस्य कस्याप्यभावात् न चा-
त्रापादानत्वमस्ति विभागस्य धात्वर्थत्वाभावात् न याचनादेवापायो भवति याचि-
तो यदि ददाति तदापायेन युज्यते इति भाष्योक्तेः । असंकीर्तितपर्यायवाकथितमहलो गां दो-
ग्धि गां दोग्धीति च याचिपृच्छिभिक्षिप्रयोगे कर्म्मसंज्ञैवेत्येषा व्यवस्थेति च सिद्धान्तो कैय-
टोक्तेः स्वव्यापारद्वयार्थत्वे तु कर्त्तुरीति कर्म्मत्वमबाधम् । वसुन्धयास्वामित्वसम्बन्धात्
कर्म्मोपयुक्तम् । अविनीतमिति याचेः स्वीकारानुकूलव्यापारोऽर्थः स्वीकारश्चेदमवश्यं
करिष्यामीति शब्दप्रयोजनको ज्ञानविशेषः विनयेन तद्विषयज्ञानवत्त्वं सम्बन्धः

Digitized by Panjab Digital Library | www.panjabdigilib.org

नाप्रधानगर्गानुरोधान्नप्रातावत्तितितिनवद्विकत्त्वस्यभाव्यविरोधः एवमेवप्रकाशकारमेतासि।
चोदितस्याप्युपपत्तिः अतएवप्रधानकर्मत्वपाक्षेपेतात्मादीनांकुठिकर्मत्वं अप्रधानेदुहादी
नांल्पन्तोकर्तुश्चकर्मत्वा इत्युक्त्वाउक्तागौणाप्तान्तातिरिक्तद्विकर्मकाः केइतिप्रश्नेनीवह्योर्हर
तेश्चापिगत्यर्थानांतथैवचद्विकर्मकेषुत्तांदृष्टव्यमितिनिश्चयइत्युक्तं तत्रन्यादिप्यह।
णांतवक्कबिवन्यमव्यापारद्वयार्थकधातुरूपलक्षणं एवंचेदंदृष्टव्यर्थन्तोपापि यदापये।
निष्ठविभागानुकूलव्यापारादिरेवधात्वर्थस्तदापादनात्वापयविवक्षायामन्येनानिष्ठकर्म
त्वार्थमिदमावश्यकं तदाचाप्रधानेदुहादीनामित्युक्तेप्रधानेगवादावेवलादयः अप्र
धानकर्मत्वंचोक्तप्रधानभिन्नाकर्मत्वं तञ्चोक्तार्थेगवादीनामस्त्येवफलानाश्रयत्वात्
•सांदोग्धीति• अन्तास्त्वितद्द्व्यवद्द्व्यनिष्ठविभागानुकूलव्यापारोदुहेरर्थः तत्रगोरपादाने
त्वाविवक्षायामनेनकर्मत्वं तद्विवक्षायांपञ्चमी गोः पयस्यन्वयेषष्ठी• द्विकर्मकेषु

Digitized by Panjab Digital Library | www.panjabdigilib.org

तु तदनन्तां तत्संबद्धत्वे बोध्यं तत्र सति संभवे प्रोक्त तत्सम्बद्धमेव ग्राह्यं एतेन स्थाल्या
देरपि तद्व्यापारादनन्तरं पयस्सम्बद्धत्वेन कर्म्मत्वं तेषां दुर्वारमित्यपास्तं तेन गास्पयो
दोग्धि स्थाल्याभित्यादौ स्थाल्यादेरधिकरणत्वाविवक्षायामपि नाम्न कर्म्मत्वं एवं।
चापादानादीत्यादिशब्देनापादानसंप्रदानाधिकरणान्येव करणत्वेनानुगृह्यन्ते ह
लादेः करणस्य पयआदिकर्म्मप्रयुक्ताभावात् यद्यपि गां दोग्धीत्यादौ गोः पयस्सप्रति
गवा पयसस्यापनयतीत्याद्यर्थे प्रतीत्या कर्तुरीप्सिततममित्यत्र तिङ्प्रधानकर्म्मत्वं च गवा।
दीनामिति तत्रैव लादिसिद्धिः प्रधानकर्म्मत्वं च कर्तृप्रत्ययपदसमभिव्याहारे कर्तृनिष्ठ प्रधा।
नव्यापारविशेषजन्यफलाश्रयत्वं एवं तादृविषये ईदृशप्राधान्यस्यैव ग्रहात् प्रकृते च पयो नि
ष्ठविभागानुकूलो यो गोनिष्ठो व्यापारस्तदनुकूलव्यापारस्यैव शाब्दतः प्राधान्यात् गर्गाः श
तं दंडयतामित्यत्र गर्गाणामेव तत्त्वमुद्देश्यत्वेन रूपमात्रस्य प्राधान्यानुरोधात्तस्यैव तस्यानुद्देश्यत्वे

Digitized by Panjab Digital Library | www.panjabdigilib.org

कर्तृत्वं न युक्तं अत एव कर्म्मत्वाद्धितीयेत्यस्यानवैयर्थ्यं अत एवैतत्सूत्रशेषे भाष्ये ऽनेनै
वक्तिवेत्याद्यस्तत्र तद्रूपवैयर्थ्यमाशंक्येप्सितमात्रस्याप्यनेन संज्ञायां वारणाय चीनामिति
सूत्रस्यानवकाशत्वेमाणवकादपि पञ्चमी स्यादिति ईप्सिततममित्याधार ऽध्यायमित्युक्त
रिते: एतेन दुहादीनां व्यापारद्वयार्थत्वे कर्त्रीति कर्म्मत्वे तत्त्वेनाविवक्षायामप्यनेन कर्म्म
त्वमिति परास्तं वदतो व्याघातात् अत एव कर्त्रीत्यनेन सिद्धमाश्रित्याप्यवैयर्थ्यमा
ष्ये नाशंकितं कारकमिति क्रियान्वनकमित्यर्थः ननु एवं न स्वस्य प्रयोगातीत्यादावतिप्र
संगः सर्वथा तत्र तदभावे: गौतमायेत्यव तस्य क्रियान्वनकत्वं न च तस्य कर्म्मकृत्वा
भावस्तदंशस्यापि पतिगामनलभ्यत्वात् न तस्यापादानत्वविवक्षानुन्नकदापि श्रा
व्यातेति सत्त्वेऽउपयोगग्रहणेनानुपयोगे श्रावणानुपादानत्वाविवक्षायां बोधनादतः
पतिगमनमाह दुःखोनितित कर्म्मयामीति कर्म्मत्वमुक्तं धात्वर्थव्यापारान्तराकृतदनन्ता
श्यासम्बन्धत्वं तत्र तु विशास्यतीति के तद्धात्वर्थ व्यापारान्तरागेवतत्संबन्धत्वं तद्विषये।

Digitized by Panjab Digital Library | www.panjabdigilib.org

तच्छेद्यमुदासीनेच तृणमिति यथा स्वपमानस्य गंगादेः स्पर्शादिजन्यसंयोगादिफला
धारत्वे तद्वत्तृणादेरपीतिभावः अनीप्सितपदाभावे ईप्सितस्य प्रकर्षहीनस्याप्यनेन
सञ्ज्ञाप्राप्तौ वारणार्थानामित्यनवकाशं स्यात् तथायुक्तमिति किं विषमोदनं भुंक्ते
इत्यादौ करणत्वमात्रविवक्षायां विषस्य मा भूत् अपायात्मकांशे गच्छतीत्यत्र अपा
गस्य च मा भूत् तत्सत्त्वे तु प्रकृतधात्वर्थफलाश्रयत्वरूपतत्त्वाभावान्न दोषः अपाद
नादिविशेषैरिति तद्रूपेणाभासमानमित्यर्थः अकथितशब्दोत्र संकीर्त्तितपदे ।
नाप्रधानपर इतिभावः एवं च पूर्वविधिविषयप्रसक्तिपूर्वकं तदविवक्षायां सर्वा
पापूर्वविधेरप्रसक्तौ चैतत्प्रसक्तिरिति बोध्यं अपादानत्वादिविवक्षायां पञ्च
म्याद्येव केनरूपेण तर्हि विवक्षेति चेत् कर्मत्वेनेति गम्यताम् कारकत्वव्याप्यसंज्ञा
नां स्वबोध्यधर्मे कर्मत्वादिशक्तिमत्त्वबोधकत्वात् बोधोपितथैव० तत्तत्संज्ञा
भावे सर्वत्र षष्ठीप्राप्त्या सर्वासां तदपवादत्वेन तदपादत्वमात्रेण संबंधार्थ

Digitized by Panjab Digital Library | www.panjabdigilib.org

वंचाध्याहृतत्तिज्यभिधानाद्द्वितीया। नादृशोद्ध्यापाः अन्याव्यत्वंचतद्विषयस्यान्याप्यत्वेन: एवम
मुनादृइत्यवोधिल इत्यादौ नादृइतीतिश्रीकल्पापन्नानानुकरणं नादृइत्येतत्स्वरूपाभिलप्य।
मानाकारोवोधइत्यर्थइतिप्रथमान्तस्याप्रातिपदिकत्वान्नातत्रद्वितीया अतएवायिहतीत्यादौ
समास: तद्वचनसामर्थ्येनद्युस्यपरिगणनत्वकल्पनेवयुक्ता अतएवात्रैश्रौअपइत्यादौ
सप्तमीकिंश्चनिपातेनाभिधानेपिप्रातिपदिकाद्भुत्ततत्रस्थकिमर्थत्वेनैवभानमितितत्रविभ
क्तिः सुलभास्रातिस्वभावादस्येवाच्यस्यद्योतकोनिपातः अतएवपरिगणनमत्रस्याव्याने।
पिनदोषइत्याहुः तथाचुक्तं तत्त्वञ्चसमभिव्याहृतधात्वर्थप्रधानव्यापारस्यपोन्यतदा
त्वर्थफलाश्रयत्वरूपं पराधीनतयाविषयेनुश्लानेपिनदोषइत्याहुर्जिज्ञ्किपाकलाश्रयत्वेनो
ऐश्रयत्वात्स्वेवैस्त्वेसिद्धं तदुक्तंभाष्ये अतस्त्वविषमीक्षितं यज्ञदक्षयतीति तस्माच्चौलन्यदृश्य।
तीतिदेष्योदाहरणंविषयेक्तिपसम्बन्धाद्दृश्यमानात्रपितेनदर्शनोद्दृश्या अपितुअनिष्टद
र्शनाएवेतिस्यष्टंभाष्यकैयटयो: एवञ्चातत्रदृर्वैलोत्राप्रोवचने. अनीसितमनुदृश्यं।

Digitized by Panjab Digital Library | www.panjabdigilib.org

सूत्रैरभिधाने तत्तच्छ्रुत्त्यावेशेनानभानंमितिविभक्त्या प्रसक्तिरत्रैवानभिहितइतितात्पर्य्ययाह
कं ध्वनितं चेदं तु पश्यात्मन इति सूत्रे भाष्ये तत्र हि स्पष्टः पुत्रस्यप्यते उत्रइत्यर्थे ~~स्य~~ च माशङ्क्य
त्वच्छब्देनोक्तत्वान्नेति समाहितं इत्थं शब्दसामानाधिकरण्यात् पुत्रार्थे कर्मत्वावगतावपि
पुत्र इति भवन्तो न कर्मवाचीति न ततः क्यच इति तद्भावः स्वकर्मत्वं तद्वाचकशब्दे न पुत्रगतं
कर्मत्वमुक्तं न तु पुत्रशब्द तत्र वृत्तिरित्यक्षरार्थः उपश्यात्मन इति सूत्रस्य कर्मत्वबोधकसु
वन्तादित्यर्थ इति तदाशयः वस्तुतः कर्मत्वमुक्तं न तु पुत्रशब्दस्य तत्र वृत्तिर्विशेष्यबोध्ये
स्तद्बोधकादित्यर्थे इह भवन्ता इत्यादिनासमाध्यन्तात् सुकम् वाक्यफलं विशेष्ये वृत्तौ व्यापार
इति समानार्थकत्वाभावात्तत्रार्थे वृत्तिर्नेतीत्याहुः आच्यानुसारेणोक्तस्यआयेत्यत्वस्यफ
लमाह कश्चिदिति परे तु अत्र तु पुनः साधुत्वायैष्यतइत्यध्याहार आवश्यकः अन्यथाक्रि
यार्थक्रियोपपदत्वाभावात् ण्वुलकादियोगाभावाच्चतुमुन्लिभः स्यात् अध्याहारे तु इच्छार्थेषु
तुमुनितिसुलभः विवक्षोपि समवाप्येच्छे तुमिष्यतेइतियत्तदत्सात्मतमन्यार्थैमित्यर्थः ९

वि०प्रि०प्र०

।स्यमानस्तात्समानाधिकरण्याभावात् तस्मात्कालाः परिमाति नेत्यादि सर्वभाष्योक्त
॥ स्यवर्त्तिविशिष्टरूपयोः समानार्थत्वस्य निर्वाहार्थं स्ववृत्तिविषयरूपयोः श्रामिकत्रीनन्दकर्मप्रेषव
बोधः विशेष्यतन्निरूपकत्वबाधेन तु विशेषतामेतत्राष्टैतात्पर्य्यावला नेत्यर्थान्ध्वस्त इति व
तः शाब्दबोधलक्षविषयेः तदात्ययेति यथाय॥ एवं चात्र शाब्दाकर्मादेः क्रियाजनकत्वेन
विभक्त्यावाच्यतावच्छेदकोद्भूतशक्तिमत्त्वेन चैव न तेनापि भक्तिप्रसक्तिः ण्वुलादेकर्तृकार
कोपपदात् इति लक्ष्यातिकारकोपपदा ति किमर्थं मत्सके कारकं परमकारके मिति । प्रतीक
मुपादाय यथास्मदादिनादपि शब्दाः न कारकेत्यस्य तात्पर्य्यातिपादयन्ति तथाकारकशब्दे
पीति इदन्तु हि क्रियायोगयतावच्छेदकत्वचिनेन तेहरां कारकशक्तिप्रतिपादन्ती॥ कैयटे
नोक्तम् अनाएतस्य कर्मत्वस्य नक्रियान्वयनियमः अन्यथाकारकशब्देः क्तेः क्रियावि
शेषणत्वे नियमेन कर्म्मादिनाधान्यानापत्तेः एवं कर्मादिपदे विपक्षादिकर्तृत्वानभिन्न
त्विनयोजनेति लक्षणेन कर्म्मादिनोभानेति अर्थितलमनासे रमिधानेह स्पष्टा । यमर्थः

Digitized by Panjab Digital Library | www.panjabdigilib.org

तेनोपगवादौ वचिषष्ठीवाऽस्तित्वेति तयोःप्यप्रत्युदाहरणत्वमेव। तदुक्तमनेकमित्यत्र भाष्ये
पित्रिचत्रगुरित्यत्र षष्ठ्यर्थे ष्यनिपमेन भानात्षष्ठी प्राप्नोतीत्याशङ्क्याभिहितः सोऽर्थो नाभू
तः प्रातिपदिकार्थसम्पन्न इति प्रत्यमप्युक्तं अनेनान्यशेषत्वहेतु षष्ठ्या [illegible] ।
शांसीति पराद्यशब्देजसः शौ नपुंसकस्येति नुमि सान्तेति दीर्घः आक्रंस्यते इ
ति कमेर्लृट् आङ उद्गमने इति तङ् स्यः अनुस्वारस्य परेति लुप्तषष्ठीक(
म्यच्चकं पदम् अत एवोदः स्येत्यादौ सवर्णग्रहणानुवृत्तिर्व्यते नुनासिके
तदपकर्षेण सिद्धः ववीति स्वपक्षार्च्ये न्दंशानमित्यादौ तु न दोषः शकारसवर्णा
प्रसिद्धेः प्रयत्नभेदेनाऊष्मणोः सावर्ण्याभावात् अचि अनुस्वाराभावात् मो
राजि० नेति वक्तव्यम् इत्युक्तिर्हे मपरे इत्येतद्विषये प्रशाम् ललयती त्यादौ मो(
नोधातोरिति नत्वबाधनार्थानिषेधत्वनन्तरत्वादनुस्वारस्यैवस्यात् ध्वनि
तश्चेदमेतदोनमोमशिलि सूत्रयोर्भाष्ये हे मपरे मपरेइति बहुव्रीहिः मोनु

Digitized by Panjab Digital Library | www.panjabdigilib.org

त्रिपाद्यामपरत्वादितिभावः हलोयमामितिसूत्रोक्तभाष्यसम्मताष्टाध्यायीपाठे
ऽस्यासिद्धत्वाभावेनचर्त्त्वमप्यवत्येव अतएवोत्सर्वस्कन्देतेगेउपसरः त्यानमु
क्तन्दोरोगइतिभाष्यंसंगच्छते हलनुज्ञाचामनुदोध्येनेतिपरे नचेदंसूत्रमप्य
र्थम् हलोझलीत्यनेनसस्यलोपेउत्थानस्यपत्तिहेवाच्यम् हलादोजत्यवेते
नलोपइत्यर्थेस्थानेनस्लोपनात् उदःस्थादित्यत्रतुनिर्दिश्यमानपतिभावपा
निर्दिश्यमानादेरेवस्थानित्वान्नदोषः झयइतिपञ्चमीत्याह झयः परस्येति पू
र्वस्येत्यनुवर्त्तते थोषवतइतिसमनियतत्वेपिविनिगमनाविरहात् त्वत्प
प्रतिपादनायचत्रितयग्रहणम् नयइति पदान्तादित्यपिबोध्यम् तेनविर
हलमित्यादोष्यत्वंन नकारेकृतेइति छत्वमितिशेषः इर्वोक्तभाष्यसम्मताष्
टाध्यायीपाठेचर्त्वस्यछत्वंप्रत्यसिद्धत्वात् मोनु० पदस्येत्यधिकृतंमइत्यनेन

रिति ४

Digitized by Panjab Digital Library | www.panjabdigilib.org

ल०कौ०

७४

दनुस्वारस्येति सूत्रात् सवर्णग्रहणमपकृष्य परसवर्णोऽनुनासिको भवतु तत्त्वार्थो
न दोषः तदुक्तं भाष्ये रेफोऽननुनासिकपरसवर्णयोः प्रतिषेधो वक्तव्यो रेफे न व
क्तव्यो रेफोष्मणां सवर्णा न सन्ति चिन्मयमिति स्वार्थिकस्तत्प्रकृतवचने इति
मयट् तत्र तदिति वाक्यभेदेन कश्चित् प्राचुर्य्ये तत्प्रकृतवचनाभावेपि मयडर्थे
मत एव चिन्मयं ब्रह्मेति सामानाधिकरण्यम् चिन्मात्रमिति क्वचित्कोपपाठः
मात्रचः प्रत्ययस्याश्रोतुस्त्वभावात् मयट्र व्यंजनकादिष्वेवार्थमात्रे शब्देनात्र स
मासस्य वक्ष्यमाणत्वात् निपातनादिति यवादिगणे ककुद्मानिति प्रकृतिप्रत्य
यसमुदायः मन्यते इति मतेनेदम् उदः स्था तस्मादित्युत्तरस्येति परिभाषालभ्य
मर्थमाह उदः परयोरिति अत्राघोषस्येति समनियतत्वेनान्यतमाग्रहणे बाध
काभावेन स्थास्तविकारयोरल्पप्राणेपि न स्मरन्तीति बोध्यम् घस्यासिद्धत्वादिति

७४

Digitized by Panjab Digital Library | www.panjabdigilib.org

ष्टुत्वेन दत्वे तस्य चुत्वेन जकारे च त्त्वमिति बोध्यम् तयोरत्रात्वेत्तु वैचित्र्यार्थः वि
श्नः प्रश्न इति यजयाचयतविच्छप्रच्छरक्षो नङ् । तिनङ् । छ्वोरिति शादेशे ङित्वात् गुणा
भावः प्रश्ने चासन्नकाले इति निर्देशात् सम्प्रसारणाभावः न पदान्ता० पदान्ताट्टो
रित्येव सिद्धे अनाग्रहणं स्पष्टार्थम् टोः किमिति षकारस्यापि पदान्ते जश्त्वविधानात्
प्रश्नः कृत्वा तासाविति षत्वस्यासिद्धत्वाज्जश्त्वाभाव इत्युत्तरम् षण्णवतिरिति षड
धिका नवतिरिति विग्रहः षष्णगर्य्य इति पच्यक पदे परोनु० पदान्तस्येति किम्
वेष्टि बध्नाति सर्पिश्चरिताचे इति उपलक्षणमिदम् वलयोरपि प्रवृत्तेः एतच्च
जातिपक्षे स्पष्टमेव व्यक्तिपक्षेपि तादृशाव्यक्तौ चरितार्थस्यैतद्व्यक्तिविषयतयो
पक्षावएवनेति बोध्यम् स्पष्टञ्चेदमिको यणचीत्यत्र कैयटे परे तु स्थानेन्तर
तमसूत्रे सम्पन्नपाठस्य भाष्यकृता दूषितत्वेनैतदुक्तेर्दृक्ति सम्भवेन० तस्मा

एव१

Digitized by Panjab Digital Library | www.panjabdigilib.org

ला०शे०

७३

शावेन तेन ताद्रूप्यानतिदेशेऽपि तद्धर्मातिदेशाङ्गीकारात् अत एव राभावित्यादौ प
रादिवत्त्वेन सत्त्वात् पदत्वं साधितम् अन्तादिवत्त्वे भाष्ये इति स्पष्टमाकरे असन्धि
रिति सिद्धमननित्वाद्विवार्त्तिकप्रयोगेलालल्पाच्तरमिति सोऽत्रप्रयोगेत्वाकथमन
त्वमिति भाष्यप्रयोगे सच वर्त्तिघटकाच्पदे पदान्तकार्य्यस्य तत्सन्निधानेन श्चु
त्वस्य चाभावो बोध्यते इति केचित् इति स्वरसन्धिः स्तोः श्चुः सितिष्टितिचलुप्त
विभक्तिकेपदे भिन्ने योग इति संयोग इति तदर्थः तेन चित्तमित्यादौ न दोषः अ
त्रपदस्येत्यधिकृतमपि न सम्बध्यते शादिति ज्ञापकात् तेन प्राश्नः सिद्धा प्रश्नात्प
रस्य तोऽश्चुत्वनिषेधकृतश्शादिति लिङ्गादेव निमित्तकार्य्यिणोर्यथासंख्यं न ॥
एवमुत्तरसूत्रेऽपि तोः षीति ज्ञापकान्नातत् शाकारच्चवर्गोस्ति इति यथासंख्यमि
ति शेषः हरिश्शेते इति वारारीति विसर्गाभावेशः तच्छिदिति न चुत्वस्यासिद्धत्वा

७३

Digitized by Panjab Digital Library | www.panjabdigilib.org

केवलसमासावंमानाभावइतिनतत्रदोषः वाच्यामस्त्वइति सुप्सुपेतिसमासः
सञ्ज्ञायामितिवानलुक्सञ्ज्ञायामितिसमासेवाक्येनसञ्ज्ञानवगमान्नित्यसमास
त्वेनविग्रहोनुचितइतिचेन्न तेषुसमासस समानार्थैकवाक्याभावेननित्यंस
मासस्यदृष्टत्वेपिनित्यसमासत्वाभावात् विभाषाधिकारबाधकमानाभावात् नि
त्यसमासेहिवृत्तिघटकपदानांघप्यकुप्रयोगाभावएवात्रतुघप्यकुप्रयोगेपित
द्बोध्यविशिष्टार्थप्रतीतिमात्रमित्याहुः अलोपंअलइतिकिम् कर्त्तृ हर्त्तृ अत्रा(
एएहूर्वैलैवव्याख्यानात् आगच्छतमग्नीइत्यादोप्लुतस्यासिद्धत्वात्ततः प्रागेवयचो

देशात्वाप्लुते अगृह्यत्वेपरत्वांप्लुते तस्याप्यनुनासिकत्वतिवन्धार्थम्पुनस्सञ्ज्ञेतिना
नुनासिकः सञ्ज्ञायाः कार्यार्थत्वात्पुनः प्रवृत्तौकार्य्यमेववीजंस्यानिवत्वन्तुन
प्लुतस्यान्यत्र वृत्तिधर्मत्वेनालविधित्वात् पूर्वसवर्णेकृतेद्विवचनत्वन्नुपतादिव

Digitized by Panjab Digital Library | www.panjabdigilib.org

ल०को०

७२ दू०

नचतदभावे ईदेदितिवदीदूदन्तायासप्तमीत्यर्थापत्तिः तथा च वपीइत्यादावेवस्यात्
एकादेशस्यपरादिवद्भावेन सप्तमीत्वान्नातुगौरी इत्यादाविति तत्सिद्ध्यर्थं तदावश्य
कमितिवाच्यम् ईदूतौ सप्तमीत्यग्रहणे अदसः एच्चद्विवचनमित्येवलिङ्गे गुरु
भूतत्वात्सकरणेनतत्प्रकरणवैक्षयावैजात्यबोधनादेकादशान्ताऽशेऽसम्भवाच्च स
प्ताविधाविति तदन्तग्रहणनिषेधाप्रवृत्त्या ईदूदन्तं सप्तम्यन्तमित्यर्थे नेष्टसिद्धे
रितिप्रश्नः पचीत्यादेरनभिधानमेवेतिपरे वत्नाविति अर्थवद्ग्रहणसामर्थ्या
त्सप्तम्यर्थमात्रेषष्ठीवसन्नामि त्यर्थेनात्रतत्संलग्नाधेयार्थेपिवृत्तेर्नदोषः
सप्तम्यामितिसमासे जहत्स्वार्थायाम्च गौरद्धपदास्यानर्थकेपि सुपस्तुपेतिसमा
सेऽजहत्स्वार्थायामसत्केदोषस्याकूरीत्येववारणमितिभावः गौरी अधिश्रितर
थ्यच्च अधिश्रयणक्रियायामिव गौरीपदबोध्याधिकरणत्वान्वयइति गोर्थ्याधिक ७२

Digitized by Panjab Digital Library | www.panjabdigilib.org

तदन्तानुवादेन सञ्ज्ञादेशयोः सहविधानमेवन्याय्यमादेशस्या निवृत्तावा प्रगृह्यत्व
कार्य्यमप्राप्य प्रगृह्य। सञ्ज्ञकस्यैवस्यविस्या निवृत्तावलभ्यार्थस्वरूपकथनमितिन्याय
ना३ विदोविचारेव नुम् मपउओ व्याख्यानादन्नमप्रत्याहारः अस्यत्रैपादिकत्वे नैवसिद्धत्वा
न्मुत प्रगृह्याश्रयनेनवाधः नानुस्वारइति किम् चितीत्यादौ प्रगृह्यसञ्ज्ञाभावेऽस्या
सिद्धत्वादिकोयणचीतियणि अनुस्वारोभवत्येव ननु यः शिष्यते सलुप्यमानार्थाभि
धायीतिन्यायेन गौरीशब्दस्य सप्तम्यर्थवृत्तित्वेपी कारस्य तत्त्वाभावोऽत आह ईदू
तमिति शब्दस्वरूपस्यविशेष्यत्वात्तदन्तविधिरितिभावः मामकी तनू३ इति प्र
८३ गृह्येष्विति शब्दप्रयोगस्य पंकारैर्नियमितत्वात्पदपाठे प्रगृह्यत्वफलमत्रबोध्यम्
ईदूतौ किम् अद्यामवातिसप्तम्याडादेशल्लपरत्वमसन्देहाय सप्तमीति किम् धी
तीमतीहस्वो न्ताभ्यां तृतीयैकवचनस्य पूर्वसवर्णे सवर्णदीर्घः अर्थग्रहणं किमि
ति

पदकारा एव इति शाहं नलिपिपत्रिना मेइतिभावः २

Digitized by Panjab Digital Library | www.panjabdigilib.org

ला॰ शे॰

गस्यउइतिलुप्तविभक्तिकं: फलमितिस्पष्टमेवलभ्यतेऽतोयोगविभागेनव्याचष्टे उञोवा(
चकमप्रगृह्यपदमितिअर्थः शाकल्यस्येतौप्रगृह्यमित्यनुवर्त्तते तदाहोञ इतौवेत्यादि
विकल्पानुवृत्तौहि निपातएकेत्यवसिद्धेरुदन्तमपूर्वमेवस्यादेवमत्रापिविभाषेयम्
ऊँइत्यत्रशाकल्यप्रगृह्यपदयोरसम्बन्धेउभरस्त्यर्थाधिकारादप्रगृह्यस्यैवादेशाते·
स्यैकोपस्थितौ ऊँइतीत्यस्यासिद्धिः दीर्घोच्चारणवैयर्थ्यापत्तिश्चविकल्पमात्रसम्ब
पि५ न्धेऊँइतीत्यस्यासिद्धिरितिविधानसामर्थ्यात्प्रगृह्यपदसम्बन्धः प्रगृह्यपदमात्र
सम्बन्धेअर्थाधिकारादप्रगृह्यस्यापिस्येऊँआदेशो ऊँइतीतिप्रगृह्यस्य ऊ उ इतीति
सि३ वैपिवितीतिनसिद्ध्येत् तदाह उञइतौदीर्घोनुनेत्यादि अत्रविशिष्टस्यविधिरितिन(
वाक्यभेदः नचप्रगृह्यत्वमादेशश्च शाकल्यमतेइतितयोरेकप्रयोगएवप्रवृत्तिः
स्यादितिवाच्यम् योगविभागसामर्थ्येनशाकल्यमतेएवभावाभावकल्पनात् नखलु

७

Digitized by Panjab Digital Library | www.panjabdigilib.org

तद्धि वक्ष्याच्च वर्ण्णोच्चारणेनिपतेनार्द्धमात्राकालव्यवायेनोच्चारणेच्छा तदधि
कार्द्धमात्राकालव्यवायेनोच्चारणेच्छा च तदविवक्षेति बोध्यम् उञः ० अत्रोञ्
निपात एव उत ऊँ इत्येकसूत्रत्वे तु शाकल्यग्रहणं नानुवर्त्तेत ऊँ इत्येकमेव स्यात् प्र
गृह्यसंज्ञाप्रकरणेन प्रगृह्यत्वस्यादेशस्य च सहविधानात् उँ इति विती ति च न स्या
त् आदेशे प्रगृह्यत्वकार्य्यन्तु स्यान्निवृत्ताभावेन बोध्यम् प्रगृह्यत्वस्य साक्षादुद्दे
श्यसम्बन्धस्य तात्पर्यात्र विधेयविशेषणत्वे मानाभावात् शाकल्यग्रहणानुव
त्तावपि प्रगृह्यत्वस्य ऊँ आदेशस्य च विकल्पे ऊँ इति विती ति सिध्यति नन्विती प्रगृह्य · ति ४
त्वविकल्पेन पक्षे तदभावेपि अस्य तात्पर्य्यात् एतदभावे निपात एकाजिति अस्याप्रव
र्त्तेः तर्हि ऊँ भाष्ये योगविभागमत्र दर्प किमर्थो योगविभागः शाकल्यमते ऊँ वि॰
भाषा यथा स्यात् ऊँ इति अन्येषामाचार्य्याणां मतेन विती ति अनेन हि योगविभा

Digitized by Panjab Digital Library | www.panjabdigilib.org

सार्थकनिपातानां निपात पदेन तत्तदर्थविशिष्टानामेवोपस्थितिरित्याह ओदन्तइति नि
पातसंज्ञा चादिपदोपस्थितचादीनां सतितस्या एवार्थवतामेवेति सार्थकनिपातानां नि
गोरामुख्येन्यायेन प्रकृतसूत्रस्थानिपातपदेन गौणार्थानां न ग्रहणमितिगोनवदित्यादौ
[illegible] व्यन्तेनास्य प्रवृत्तिः एवं च कार्य्यकालपक्षेपि चव्यन्ता निपाता इत्यस्यानुपस्थि
तिरेतत्परिभाषावशात् अव्ययसंज्ञादौतु नैतत्परिभाषाप्रवृत्तिरनित्यत्वादेतत्प
वानर्थकेपि निपाते सा संज्ञा सिध्यति विष्णो इतीयादौ प्रगृह्यत्वापाह संबुद्धिनि
मित्तकइति संबुद्धिपरइति व्याख्याने तु सोर्लुक्कालुप्तत्वेन तत्परत्वाभावान्नस्या
त् नलुमतेतिनिषेधानित्यत्वं त्वगति रुगतिः इतावितिकिम् पटोत्र अनार्षेकिं
म् ब्रह्मबन्धवित्यब्रवीत् संहितायाविवक्षायामप्यवादिरहित प्रयोगार्थमिदं

पातपदेनतत्त
दर्थविशिष्टाना
मेवोपस्थिति
रितिरा २

७०

Digitized by Panjab Digital Library | www.panjabdigilib.org

[illegible]त्वात् ञाङि॰ ति प्रतिषिद्धार्थीयमारम्भ इति भाष्यं तु पर्य्युदासे प्रियाम्यस्य प्रतिषेधस्य
सत्वान्नानुपपन्नम् अनाङि॰ ति पर्य्युदासादेव निपाते काऽन्यस्य पत्ते लब्धे निपाते काऽज्ग्र
हणं स्पष्टार्थम् स्वाङ्गः समुदाये स्वाङ्गः त्वाभाववदच्समुदायेऽच्त्वाभावादति स्ये वाच्
समुदाय ग्रहणाभावे सिद्धे एकग्रहणमन्यत्र वर्णग्रहणे जातिग्रहणार्थ्यं न तेन धी स्सती त्यादि
सिद्धिरिति भाष्ये स्पष्टम् जातिग्रहणार्थमित्यस्यो पात्तमात्या श्रये कानेकाव्यवतिक्ति ग्रहणा
र्थमित्यर्थस्तेन तितउशाद्देकदेशस्यानुवृत्तस्यानुकरणे अउ अकरोदित्यत्रौनुकरणम् चा
निनीति निपातत्वेपि प्रगृह्यत्वाभाव एकग्रहण फलम्बोध्यम् ननु ङ॰ कारस्य काप्यश्रवणेन ङि॰
दङि॰ द्विवेको दुर्ज्ञेय इत्यतआह वाक्यस्मरणयोरिति वाक्यशब्देन स्वार्थगतमनभिगतत्वम्॰ स्म
रणमित्येतस्य स्मतिविषयता॰ एवं कित्तदिति स्मृतार्थनिर्द्देशः निपात इत्यनुवृत्त सोदित्य
नेन विशेष्यते इत्याहोदन्ताइति (निपातसञ्ज्ञा चादिपदोपस्थितवादीनां सतिसत्वे एवतामेवेति

Digitized by Panjab Digital Library | www.panjabdigilib.org

सि०श०

६६

वमिन्नेवैदिकेतिशब्देचेत्येवंपरतयाकथंचिद्व्याख्येयमित्यन्ये उदेद्रूपत्रतिनिर्द्देशपरोरेकमा
पाद्यन्सर्वनामपर्य्यायेण तत्तद्व्यक्तिः भागिनीयमितिनिर्द्देशः विशेषणेन तदन्तविधिमा
श्रित्याह ईदूदेदन्तमिति द्विवचनमिति संज्ञाविधौप्रत्ययग्रहणे तदन्तविधिनिषेधादि
तिभावः एदन्तमितिव्याख्यानफलमाह पचेतइति निपातएः० निपातइतिकिम् चका
रान्त्रप्रत्ययस्यग्रहणात्कल्पितार्थवत्त्वात् एकानितिकर्म्मधारयोवर्त्तिपदार्थप्राधान्येनान्त
रङ्गत्वाद्व्याहरतिमृगाइत्यादिनिर्द्देशाच्च तेनप्रेदमित्यादौनदोषस्तदाहैकोजिति आङ्व
र्ज्जइतिपर्युदासस्यौचित्यात् अतएवेकाजनाङिति नोसू त्रि० वासुदेववाचकस्य अशब्द
स्यत्र्याललक्षणाव्ययीभावेआ आत् अमित्यादौसत्यपिधानेत्वतत्राङ्भिन्नत्वेन सर्वाना

७२

त्वेननिपातत्वेपिप्रगृह्यत्वेन सर्वानात्वत्वेनाङ्त्वातिदेशेतिदिश्यमानेधर्म्मविरुद्धत्वा

६६

दयधर्म्मप्रयुक्तकार्य्यनिवृत्तेरतिदेशस्वभावसिद्धत्वात् ओदितिसूत्रेआङ्ओइत्यत्रा

Digitized by Panjab Digital Library | www.panjabdigilib.org

स्थितार्थाभिप्रायेणेति बोध्यम् अगृह्यास्य इति प्लुते कृतेपि तस्यासिद्धत्वात् दीर्घत्ववृद्धिवत्
तपरत्वमगृह्यत्वमनुकार्यस्तुल्यम् अनुकरणे तु प्रकृतिवदनुकरणमित्यतिदेशात्तत्त्वमिति
भावः किमयं पाकर्तव्यमिति पृष्ट आह चिनुही३ इदमिति विभाषात्र पृष्टप्रतिवचने हेरिति प्लु
तः इदंशब्दोत्र वाक्यान्तरस्य इति हेरिकारस्य वाक्यटित्त्वम् उभयत्र विभाषेयमिति उपस्थि
ते प्राप्तेऽनुपस्थिते वाप्राप्ते इत्यर्थः विभाष्यते विकल्प्यते इति विभाषा गुरोरनृत इत्यत्र त्वपे
टाप् नवेति विभाषायामिति भाष्यप्रयोगात् भाष्ये तु किमर्थमिदमुच्यते उपस्थितार्थं तत्र
ईग्रहणेन नार्थः अविशेषेण चाकवर्मणस्य प्लुतवदित्येवेदमपि सिद्धे वद्यादयं वद्येयमि
त्युक्तं तद्बलेनोपस्थिते पूर्वविप्रतिषेधेन ईग्रहणेपि नित्यप्लुतवद्भावस्येष्टः तत्याख्याने।
नित्यप्लुतवद्भावस्य येन नाप्राप्ते न्यायेन वैकल्पिके तद्बोधिताभाषांप्राबाधकत्वात् उपस्थि
त इत्यस्य निवृत्त्या पाविप्रतिषेधाद् उभयत्र विभाषेयमिति कैयटस्य प्रमादः मतान्तु इति प्रा

Digitized by Panjab Digital Library | www.panjabdigilib.org

ल०व्या०

६८

स्त्रे विभाषेति योगविभागो दर्शितः सापि व्यवस्थितविभाषेति कैयटः अत एव ओ
श्रावयेत्यस्येति वक्तव्यमिति वचनस्याग्नीत इत्यादौ प्लुतनिवृत्तये प्लुतस्य विभाषेति
योगविभागेन प्रत्याख्यानं भाष्योक्तं संगच्छते एवञ्च भाष्यसंगतेयं व्यवस्थितवि
भाषेत्याहुः अप्लुतवदित्युक्त्वा प्लुत इत्यध्याहारस्तदाह प्लुतोऽप्लुतवदिति प्लुत एव नि
षिध्येतेति तत्स्थाने अप्लुतस्य विधाने न त्वनिवर्त्तते [illegible]र्थः प्रसज्यप्रतिषेधेन व्याख्या
नं तु युक्तं गौरवात् किञ्च तथा सति प्लुतप्रकरणे एव नोपस्थित इति वदेत् न च पर्यु
दासेऽग्नीइ३ती इत्यादौ प्रगृह्याश्रयप्रकृतिभावमबाधित्वा परत्वात् प्लुतवद्भावे दीर्घादिकं
स्यादिति वाच्यम् शास्त्रत इति शास्त्रसापेक्षा प्लुतवद्भावापेक्षया बलं मात्रापेक्षप्रकृति
भावस्यान्तरङ्गत्वात् अप्लुतवदित्यस्य प्लुतकार्य्यं नेत्यर्थस्तु न शास्त्रमर्य्यादालभ्यः प्लुते
ऽप्लुतस्यादेशरूपविधानस्यैव शास्त्रतो लाभात् भाष्ये प्लुतकार्य्यप्रतिषेधार्थमित्युक्तिस्तु फ

६८

Digitized by Panjab Digital Library | www.panjabdigilib.org

तद्विषयेपिउपलक्ष्यबोधनसत्त्वात् सर्वप्लुतप्रकारकत्वस्यतुनदोषः तथाहिस
तिवाक्यस्यटेरित्यनेनसहैवास्यापाधिकारत्वमेवकुर्य्यात् एतत्प्रपविषयमेवदर्शि
तिप्रकृतप्लुतत्वेनुदात्तौ ग्रहणानेति प्लुतत्वेचस्तौस्यष्टम् अपिशब्दोयथाप्राप्तस्वरितमुच्च
यार्थः यदितुगुरोः सन्निधानादनन्त्यागुरुरेवसमुच्चीयते तर्हि लघुमिति अनन्त्यगु
त्य
रावेतस्यां त्यलघौ प्लुतेच त्यादीनां दुर्वारत्वेन प्लुतसमावेशापत्तिः एकैकग्रहणंत्वे
तद्विहितानामेवपर्य्यायार्थंस्यात् तेनयत्रानन्त्यापिगुरुररनन्त्य इत्यादिर्वागुरुस्तत्रैव
पर्य्यायः स्याद्व्याख्यानाच्च तदर्थलाभः अनन्त्यस्यापीति अपिनानन्त्यस्यगुरोरगुरोश्च
त्यर्थः पर्य्यायार्थमिति अन्यथासमावेशः स्यादितिभावः अनुदात्तंपदमितितु
त्रिपाद्यांनप्रवर्त्ततेइतितत्रैववक्ष्यते भाषायामितितुपक्षे सर्वेषांप्लुताभावार्थं॰ वि
कल्पतइति साचव्यवस्थितविभाषा तेनाग्नीदग्नीन्विहरेत्यादावग्नीत्प्रेषणाद
तिन भाष्येतुविभाषापृष्टेति

Digitized by Panjab Digital Library | www.panjabdigilib.org

ल० प्रा०

१६७

गुरोरनृतइत्येवसिद्धे नियमार्थमित्याह हे हयोरेवेति हेहन्त इत्येवसिद्धे प्रयोगग्रहणा
दनन्त्ययोरपितदाह हे ३ रामेति केचित् एके हेहयग्रहणमनन्त्यार्थम् अन्यथा बा
क्य स्येटीत्यधिकाराद्नन्त्ययोरेव तयोः स्यात्तदाह हे ३ रामेति प्रयोगरहितेन पत्रसम्बोध
नोत्तरं तयोः प्रयोगस्तत्रैवाभिमुख्यस्य द्योतितत्वेन द्योत्याभावादनर्थकयो रपित
योः प्लुतार्थन्तदाह राम है ३ इति अन्यथा प्रयुक्तयोः प्लुतासम्भवात्तद्वैयर्थ्यं स्पष्टमे
व हेहयोरितितु तयोर्हूयमानपदत्वाभावादप्राप्तेर्विध्यर्थत्वनियमेतु नमानं तेनात्र
प्लुतसमावेशं तत्सर्वं भाष्यकैयटयोः स्पष्टमित्याहुः यत्तु अयं हूयमानार्थप
दटेः प्लुतस्य बाधकत्वं कश्चोडिन्यन्यायादिति तन्न शिवहे इत्यादौ तस्याप्राप्तेस्तत्रा
स्य विषयाभावात् गुरो० दूराद्धूत इत्यनुवर्त्तते तेन दूराद्धानएव प्रवृत्तिस्तदाह दूरा
द्धूत इति दूरत्वं चात्राविवक्षितं तेन प्रत्यभिवादेभोराजन्ये त्यस्य विषये प्रवृत्तिः

३

६७

Digitized by Panjab Digital Library | www.panjabdigilib.org

भोः शब्दस्यात्राग्रे इतरयोस्तु नामत्वात्ताग्रे विभाषेयम् दूराद्धूते यावति देशे प्राकृतप्रयत्नो
च्चारितं सम्बोध्यमानो न शृणोति किन्त्वधिकमप्रयत्नमपेक्षते तावद्दूरम् दूराद्दाह्वानं च
हूतं तत्सम्बोधनस्योपलक्षणं सम्बोधनविभक्तिनियामकस्याभिमुखीकृत्यसम्बोधन
रूपस्य सम्बोधनस्योपलक्षणम् आगच्छतु भवान्देवदत्त इत्येवमाह्वानस्यं सम्भ
वात् अत एवाकडारसूत्रे नदीगुरुलक्षणयोः समावेशो वा स्त्री बन्धुरित्यत्र गुरोरिति प्लुतो
नन्दी बन्धुनीति पूर्वपदान्तोदात्तत्वं च फलमुक्तमाष्येन्यथात्र सम्बोधनाभावेन गुरो
रित्यस्याप्राप्त्यात्तदसङ्गतिः स्यादेव उपलक्षणत्वादसत्यप्याह्वाने भवति तदाह सक्तू
नित्यादि अत्रापि दूराद्धूते इत्येतदनुवृत्तस्य पदस्येत्यस्य विशेषणं तेन हूयमानार्थ
वाचिनः पदस्यैव टेः प्लुतः तच्च रूढं यौगिकं वेत्यन्यत् हे हे३० हे हयोः सम्बोधनयो
तकत्वेन केवलाभ्यामपि ताभ्यां सम्बोधनदर्शने न चैतयोरपि हूयमानार्थपदत्वात्

नतु२

वि४

Digitized by Panjab Digital Library | www.panjabdigilib.org

लं०प्रा०

८८

आयुष्मानित्यायुष्मत्वस्य विधेयत्वात्सम्बोध्यनविभक्तभावः एधीति भवेत्य
स्याप्युपलक्षणम् प्रत्यभिवादे शर्म्मादिप्रयोगो न नियतः एचोऽप्रगृह्यस्येति सू
त्रे प्रत्यभिवादे नाम्नश्च टेः प्लुतविधानात् आयुष्मानेधि अग्निभूता३ इति भाष्ये त
दुदाहरणाच्चाशर्म्मादिप्रयोगे तु [illegible] तद्देरेव प्लुतः शर्म्मान्तं नाम ब्राह्मणस्येत्या
दिस्मृत्या तस्य नामत्वावयवबोधनात् स्त्रियां नेति स्त्रियाः अपि नाम्नाभिवाद प्रत्य
भिवादश्च स्पष्टैव भाष्यसम्मतत्वादिति भावः नाम गोत्रं वेति अभिवाद प्रत्यभिवादे
नाम गोत्राभ्यामेव स्मृतिषु प्रसिद्धेः तत्राधिकृतस्य पदस्य त्यस्य प्रत्यभिवादे इत्यने
न विशेषबलात् [illegible] प्र त्यासत्त्या अनुपमानार्थ्यैवाचकस्यैव प्लुत इति भावः तत्र नाम श
ब्देन द्वादशेऽह्नि पित्रादिकृतं गृह्यते अत एव आयुष्मान् भव दण्डिन्नित्यादौ प्लुतो नेति
स्पष्टं भाष्ये भो राजन्येति भोशब्दस्य राजन्यवैश्यवाचक नाम्नश्च टेः प्लुत इत्यर्थः ॥

प्रत्य३

८८

Digitized by Panjab Digital Library | www.panjabdigilib.org

आर्छदिति आङोधात्ववयवत्वेनापदान्तादितिभावः एत्तेनाठस्थेति पुनर्वृद्धिविधा
नार्थ्येन चैनोस्योमाङ् ऋतुपररूपबाधवत् प्रकृतिभावस्यापिबाधेनैवृत्तिद्धिरित्यपा
स्तम् समासेचेति व्याख्यानादितिभावः ममस्थीलामिति दिकूसङ्ख्येइतिसमा
सः प्रकरणम्भुरूपे प्रकृतिभावविधायकस्त्वद्रूपमुपन्यस्य प्लुतप्रगृह्याइतिस्त्रा
का इः क्षितप्लुतप्रगृह्ययोर्मध्ये प्रथमोपात्तत्वात्प्लुतप्रकरणमारभते वाक्यस्यटेः
वाक्यस्येत्यस्याभावे पदस्य टेरित्यर्थेनन्त्यस्यापिपदस्य टेः प्लुतःस्यात् ततस्त्वेतुवा
क्यस्य टेरन्त्यपदस्यैव न सम्भवतीति न दोषः प्रत्यभिवादे प्रणामादिमितशिवमभ्या
व्यमानो गुर्वादिर्यत्प्रतिलंभाषते तत्प्रत्यभिवादः नत्वाशीर्वचनम् अशूद्रे आशीर्वा
दरूपप्रत्यभिवादाभावे नाशूद्रेऽस्य वैयर्थ्यापत्तेः अतएवभाष्ये अशूद्रे इतिकिम्
कुशलत्वमसि शूद्रकेत्युक्तम् अभिवादयेइति नमस्कारपूर्वमाशीर्वादवाचयामी
त्यर्थः

इत्यर

रित्रहणेभावे
प्लुतप्रसङ्गोपाक्षि
ताभ्युदेभावया
जन्तस्यैवस्यात्
दित्रहणेतुम्बाम
र्थ्यादिनाचोविशे
षणं भ्रमेणान्त
स्यापिभवति ४

Digitized by Panjab Digital Library | www.panjabdigilib.org

सं०१२१०

६५

ति हूराहूते चेति प्लुतः अत्र प्लुतस्याश्रयात् सिद्धत्वम्बोध्यम् नित्यमिति किमिति वाग्रह
णं निवृत्त्यैव तल्लाभ इति प्रश्नः नाम्रेडिते नित्यग्रहणसामर्थ्येन पुनर्विधानाद्बाधक
विषयेप्ययमेवेति भावः इकोऽसवर्णे एङः इत्यतः पदान्तादित्यनुवर्त्तत्र्यथमपावि
वरित्याप्यनदित्याह पदान्ताइति वेति ह्रस्वपक्षेर्विधानसामर्थ्यात्पुनर्विकल्पसिद्धिः
अपदान्तादेपक्षेश्चरितार्थत्वात् सामर्थ्यादेवेति चेन्न प्रकृतिभावाकरणे तो ह्रस्व
क इत्यत्र वा बहुलग्रहणेन तदसम्बन्ध इति तदर्थं ह्रस्वविधानसामर्थ्यस्यावश्यकत्वेन
चकारो व्यर्थ इति भावः नाप्युत्थितमिति प्रकृतस्सूत्रे इति शेषः एतेन ह्रस्वाभावे प्र
कृतिभावार्थश्चकार इति व्याख्याप्रयुक्तमपास्तम् चक्रीत्र्यत्रेति तु संहितायामविव
क्षायां बोध्यः न समासे इति चेति वार्त्तिकम् वाप्यमिति पश्चाल्लस्त्वबाध्य इति लास्।
सितिचेति पदत्वं ऋत्यकः सवर्णदीर्घमनिजर्थ्येदं होत्रृकारः ब्रह्मर्षिः ॥

६५

Digitized by Panjab Digital Library | www.panjabdigilib.org

भाष्योक्तातिरिक्तव्यवस्थितविभाषालाभसम्भामालिकत्वज्ञापनार्थत्वात्तत्त्वादित्याहुः इन्द्रे
च कश्चित् भाष्यपुस्तके च शब्दरहितः पाठः इन्द्रावयवेऽचीत्यर्थस्तेन षष्ठीतत्पुरुषोत्तरप
दकषष्ठीतत्पुरुषेण वेन् परत्वादावङ् सिद्धिः अन्यथा वाक्ये गोशब्दस्य इन्द्रपरत्वाभ
भावेन समासासे पादिन्द्रशब्दस्योत्तरपदत्वमेव प्रवृत्तिः स्यात् प्लुतप्रगृह्या इत्यस्यप्र
हत्येति पाठ एव सामञ्जस्यं मत्वाहुर्यत्प्रकृतीति न चैतत्घटकपदार्थज्ञानाय प्रगृह्य
त्वादिकथनं सर्वयुक्तमिति वाच्यम् इकोत्यत्र प्राचीनपठितनित्यग्रहणस्य प्रामादिकत्वं
बोधयितुं तदव्यवहितमेतत्सूत्रस्थले येनात् तत्र नित्यग्रहणे तदव्यवहितोत्तरैतत्सूत्रे तद्वै
यर्थ्यस्य स्पष्टमेवेत्याशयेनाह प्लुताः प्रगृह्याश्च वक्ष्यन्ते इति अचीत्यनुवर्तमाने पुनर्
ग्रहणं प्रत्यासत्त्यापन्नाचि अनयोः प्रकृतिभावस्तदन्निमित्तकार्यस्यैव तेनाभाव

इत्यर्थक्तेनानुड् अस्य इनतिजान् अस्यैत्यादेः सवर्णदीर्घरूपसिद्धिर्भवत्येव रहिकृहर

Digitized by Panjab Digital Library | www.panjabdigilib.org

लं० श० ६४

र्वत्वादिकमपि विकल्पेन निषिध्यत इति बोध्यम् अवङ् स्फोटायनस्य स्फोटं अयनं यस्य स।
स्फोटप्रतिपादक इत्यर्थः स्फोटायनस्येति पाठेन डादित्वं कल्प्यं स्फोटायनो वङः स्मर्ता अप(
स्तु तदभावस्येति स्वस्वतन्त्रानुसन्धानद्वारेणात्र विकल्पो बोध्यः नित्यमिति अत एव नेन्द्रे
इति सामर्थ्येन नित्यमिति भाष्यादावुक्तं गवाग्रमिति सन्निपातपरिभाषया अनित्यत्वाद्दी
र्घ इति बोध्यम् व्यवस्थितेति देवत्रातो गलो ग्राह इति योगे वसद्विधिः नित्यत्वेन वि
भाष्यन्ते गवाक्षः संशितव्रतस्तेन आप्यवपवेनेति शाब्दो दीतिसूत्रे भाष्ये स्पष्टम् ॥
अग्नी त्वेषतो इति सूत्रे अग्नीदग्नीन्विहरेत्यत्र एतद्भावत्प्रयोज्यान् किं कृहुहुलग्रहेला(
घटितं भ्यासं हृतवान् तत्रत्व्योमाय भाष्ये कृतेन विभाषेति योगविभागे न विभाषेत्यस्य
व्यवस्थितविभाषात्वं ध्वनितं तथा अने व्यय अपोरिति व्यवस्थितविभाषेति अनेकीति
सूत्रे भाष्ये स्पष्टम् न च व्यवस्थितविभाषया इन्द्रे नित्यावङ् सिद्ध इन्द्रे चेति व्यर्थमिति वाच्य
म्

स्फ... ने वर्णा अ
नेन स स्फोटः

६४

Digitized by Panjab Digital Library | www.panjabdigilib.org

त्वा

विति ऌलृ इत्यवत्सवर्णसाहचर्य्यादितिभावः अत्र ऋत्वे ऋकारद्वयस्थानिकैकादेशे एव पूर्वस्य साधनं ऋत्वे ऋकारऌकारस्थानिकैकादेशे एवोत्तरस्य साधुत्वमत एव ऌतीति न ऋकारो नाप्य ऌकारः अत एव वार्त्तिके ऋतीति तपरकरणमुत्तरवार्त्तिके ऌतीति च चरितार्थन्तत्तुल्या स्यसूत्रे भाष्ये यदेतद्दतीति एतद्धत इति वक्ष्यामीत्येतद्वचनाप्रयत्नेन ऋ ऌ वर्णयोस्सावर्ण्येन कार्य्यमितिच संगच्छते उपस्थितरेकीयप्रयत्नत्यागे मानाभावादीषत्स्पृष्टाविमौ विवृतत्वे हि विवृतऋकारऌकाराभ्यां मनवोत्विग्रहलोकः सवर्णइत्यनेनैव सिद्धौ वार्त्ति-कस्यैव वैय्य-र्थ्यापत्तेः एङः॰ प॰ पदान्तात् किं भवति सर्वत्र वि॰ प्रकृत्यान्त इति सूत्रात्र प्रकृत्येत्यनुव र्त्तते प्रकृतिशब्दोऽत्र स्वभाववाची उत्पन्नाप्रकृतिरित्यादौ तथा दर्शनात् प्रकृत्या स्वभावे नावस्थानमित्यर्थः अत एव न प्रकृतिभावेन पूर्वरूपम् नाप्यपाद इति भावं । नान्तः पादमितिपाठे त्वनेन सूत्रेण गोशब्दस्य पदत्वाप्रन्नान्नोति व्याख्यानेन नान्तः पादमित्यनेनैव

Digitized by Panjab Digital Library | www.panjabdigilib.org

ल्पास्यतिसूत्रेप्रत्याख्यानम् द्विरेफाविति अत्रापितदेवभाष्यमानं द्विरेफत्वेहिरेफद्व
यवतिस्यान्निन्यपंलकारवत्पप१इति व्यवस्था सिध्यति अभितादिति द्विरेफावित्यनुष
ज्यतेतच्चद्वितीयान्तं अभितः पदयोगात् ऋऌक्सूत्रेभाष्येमात्रकाणाभित्यादौ णत्वादि
सिध्यर्थमवश्यमङ्गीकर्त्तव्यः वर्णैकदेशावर्णग्रहणेनगृह्यन्तेइतिपक्षेत्रऌप्यवर्ण
द्धाभिवीचातरतीत्यादौतुगैलक्षत्रलक्षणत्वनो द्वाद्धापादीर्घादितितुग्विधानसाम
र्थ्यात्परकरणासामर्थ्यनोपचइतिऌत्वस्यनोग्रहणसामर्थ्यान्नेदेनाप्रतिभाससमानेषु
वर्णविषयेषुअतएव सइशास्तृतन्त्रवर्णाप्रयकार्याभावत्तापं नतद्रूपसमाधान
स्यचकरणेवत्प्रातःर्कतम्मित्यत्ररोरीत्यस्यतत्रऌकार इत्यादौ तोत्नी त्वस्यचद्राक्
कासमाधानाकरणेनपक्षान्तरेफात्परंभक्तेरितिहयवरट्सूत्रस्यभाष्येणचसूत्रक
सूत्रस्यवोरर्द्धमात्राग्भागस्याभितः कृशत्वेन तथैवोचितत्वादितिभावः द्वैलकारा

Digitized by Panjab Digital Library | www.panjabdigilib.org

मेसर्वस्येत अकारणे संज्ञाकरणात् ऌलां अन्तग्रहणं ऌली तिनिवृत्त्यर्थम् सर्वोपद
कारजनपाचवकरणोन्तेस्यत्रेव: एतेन अदित्यैव लेखेवउचितइत्यपास्तम् अऌलोः
लावल्पेनिषेधादाह अचिकिमिति अनिष्यन्तेरिति नाऌलावितिसूत्रविषयनिर्ण
येऽपवादविषयपरिहारेण तत्तद्वर्णोपलावर्णपदवाच्यत्वनिर्णयोत्तरं तावतांग्रहण
स्यग्रहणकशास्त्रबोध्यत्वे तद्बोधकाले ग्रहणकशास्त्रस्य तावद्ग्रहणबोधकत्वानिर
पेक्षेरित्यर्थः सूत्रानन्तरम्पाठादचूत्वे तेनतयोः स्थाने शुतासिद्धिः तयोश्वर्नैपरत्व
म् द्विमात्रमिति अतएवाकः सवर्णेइत्यनेनैव ऋकारद्वयस्यस्थाने रेफद्वयवतामृ
वेण कृतान्तर्य्येण कदाचिद्ऋकद्वय [illegible] र्भऌस्य विवृतत्वान्तर्य्येण कदाचिद्विवृतस्यल
कारेलकारवतान्तर्य्येण कदाचिद्वितलकारस्य कदाचिद्विवृतत्वसाम्येन रेफवतासा
म्येन च तादृशास्य ऋकारस्य सिध्या [illegible] विकल्पफलसिद्धिमाश्रित्येतद्वचनद्वयं तु

त्रै२

२५

Digitized by Panjab Digital Library | www.panjabdigilib.org

तस्य चाव्यक्तानुकरण एव सम्भवतीत्याह अनुकरणस्येति अत्रालोन्त्यस्येति नप्रव
र्त्तते नानर्थकइति निषेधात् आम्रेडितस्यवेति वक्तव्ये नाम्रेडितस्येत्यारम्भाद्वा अ
तइतिकिम् बरगिति नाम्रेडितः अव्यक्तानुकरणस्येत्यत इति च वर्त्तते अव्यक्तानुक
रणावयवीभूताम्रेडितावयवाच्छब्दस्येत्यर्थः नाम्रेडितस्य तन्तु वेति नस्तान्त्रितम् वै
चित्र्यार्थं फलकल्पनाभिनिवेशस्तु नयुक्तो भाष्यानुक्तेः अत एव तद्धीते तद्वेदेति स
त्रे द्विस्तत्यग्रहणमप्रमादकृतमाचार्यस्येति भाष्य उक्तौ लाघवानवधानलक्षणोत्र प्र
माद इति कैयटः कृतदवधानं कृतदनवधानमिति तु भाष्यकृदुक्तप्रयोजनं नेतदव
धानमन्यत्रान्यदिति निर्णयम् न तु डाचो भावादेतदर्श्रिरत आह बहुलवचना
दिति तस्य परं अवयववाचिपरे शब्दयोगेऽत एव ज्ञापकात्षष्ठी तस्यग्रहणं स्पष्टा
र्थम् हे इत्यनुवर्त्त्य षष्ठ्या विपरिणामेन लिङ्गैः अन्यद्धि सूक्तं परस्य तु न सञ्ज्ञा अप

Digitized by Panjab Digital Library | www.panjabdigilib.org

स्सङ्गः इत्यादौ समासग्रहणे न पदविधिरिति सूत्रस्वरसेन न च पदत्वेन सुबन्तत्वेनैव तत्र सा॰ वा१
क्षादुद्देश्यता तत्रैव तत्परिभाषाप्रवृत्तिस्वीकारात् ओत्वोष्ठ्यादिमात्रस्य पदत्वाभावात्
अवर्णादोत्वोष्ठयोरचितत्तद्घटितसमासइत्यर्थो दन्त्योष्ठ्यो वः स्मृत इति च योगसिद्धिः
अन्यथा अत्यासत्त्योत्वाप्युत्तरपदकसमासएवप्रवृत्त्यापत्तौ तदसङ्गतिः स्पष्टैव ओ
तुर्विडालः ओमाङोः। अत्र एङीति नानुवर्त्तते तेन ईषदर्थकाङा सह ऋषभशब्द
स्यसमासेऽपऋर्षभ इत्यत्र पररूपेऽपर्षभसिद्धिः न चात्र परत्वाद्दीर्घप्रसङ्गः प्रति
पदविधित्वं च निरवकाशत्वे सत्येव बाधकत्वे प्रयोजकमिदं च मध्यापवादन्यायेन
अचेहीत्यादौ वृद्धेरेव बाधकं स्यादिति वाच्यम् लक्ष्यानुरोधेनात्र बाध्यसामान्यचि
न्ताश्रयणात् अन्यत्र प्रतिपदविधित्वस्य बलवत्त्वे प्रयोजकतादर्शनेन परदीर्घात्पू
र्वरूपप्रवृत्तेश्च अव्यक्तशब्दार्थो ध्वनिरिति अविद्यमानकत्वादिशब्दस्येत्यर्थः
ईस्य

Digitized by Panjab Digital Library | www.panjabdigilib.org

संकीर्त्यत्वादिना नास्ति सम्भवो भोजनस्येति गम्यते अचोन्त्या अच इति निर्द्धारणेष
ष्ठी अन्ते भवोन्त्यः अन्त्यादीति गमकत्वाद्बहुव्रीहिः मार्त्तण्ड इति मृतण्डादागतो मा
र्त्तण्डः अत्विषयएवपरत्वम् ननु मार्त्तण्डशब्दान्त्याच्चूतकारात्कारः सआदिर्यस्येत्यन्य
पदार्थो बहुव्रीहिरिति चेत् एकस्मिन्नेव समुदायस्त्वपत्वारोपेण तदवयवत्वारोपेण च तदु
पपत्तेः एतन्मूलकमेव व्यपदेशिवदेकस्मिन्निति वक्ष्यते इत्यलम् वस्तुतः आरोपस्य ना
त्रोपयोगः शब्दज्ञानानुपाती वस्तुशून्यो विकल्प इति पतञ्जल्युक्तेरर्थाभावेपि विक
ल्पात्मकं ज्ञानमत्र तदपि लक्ष्यानुरोधाच्छास्त्रप्रवृत्त्युपयोगीति बोध्यम् पतञ्जलिरि
ति तु अञ्जलेः पतित इति विग्रहे मयूरव्यंसकादित्वात्समासे तत्रैव निपातनादितरा
कस्य लोपे दकारोदात्तादित्वाच्छान्तस्य लोपे साधुः गोनर्द्ददेशोकस्यचिदृषेरञ्जलेः सन्ध्याक
रणसमये पतित इत्यैतिह्यात् अल्लोपश्छयोः अत्र समर्थपरिभाषोपतिष्ठते समासेकृ

Digitized by Panjab Digital Library | www.panjabdigilib.org

ढुइत्यत्र भवतीति प्रकृतसूत्रे भाष्ये स्फुटमेतत् सुप्धाताविति सुबन्तप्रकृतिके धा
ताविस्यर्थः तुल्यास्य सूत्रे उपास्त्कारीयतीत्यादेरेतदुदाहरणत्वस्य भाष्ये उक्तत्वात् प्रा
ग्सुबन्तस्य धातुप्रकृतित्वेनोक्तत्वात् तत्प्रकृतिके इति व्याख्यानमेवोचितम् स्पष्टमस्य
समीपमनुपर्षभं तदिच्छतीति उपर्षभीयतीत्यत्र तु न वृद्धिः उपेत्यस्यानुपसर्गत्वादत्रा
पि धाताविस्यनुवर्त्य वाक्यभेदेन व्याख्येयं तेन सुब्धातावपि न प्रकृतिभावः प्रार्षभीय
तीति अत्र शरोचीत्यस्यानुपन्यासेन व्यञ्जनात्परस्यैकस्यानेकस्य वोच्चारणे विशेषाद
भावेनाचो रहाभ्यामित्यस्य तन्निषेधस्यावानावश्यकता सूचिता वाक्यभेदेनेति इदम्
वसौत्स्पष्टं भाष्ये तु न दृश्यते एवे चेति वार्त्तिकं सूत्रे धाताविसनुवृत्ते रश्रयम् अव
धारणे निपातः एवशब्दस्य द्योत्यमर्थं द्रूयमवधारणमसमर्थवृत्यानवक्लृप्त्यादि च
तयोरन्त्यो त्रेव शब्दार्थ इत्यभिप्रेत्याह अनवक्लृप्तावेवेति क्वेव भोक्ष्यसे इत्युक्ते स्यल

Digitized by Panjab Digital Library | www.panjabdigilib.org

प०११०

९०

रोवत्रिपादीस्थैन्तरङ्गः उचितः अतएवविसर्ज्जनीयसूत्रे भाष्येऽस्मामेवयुक्तिमुक्त्वाऽयु

क्तोयम्परिहारोनवावहिरङ्गलक्षणत्वादितिउक्तम् एवंचतत्रतत्रवचनान्येवकाव्या

वा३ ति तापकानुसरणंकर्त्तव्यम् अतएवनिगाल्यतेइत्यादौलत्वायपर्य्यन्तस्यदोषइति

वचनमेवारब्धम् अन्यथान्तरङ्गत्वात्तिलोपात्पूर्वम्वैकल्पिकलत्वेचक्रन्त्रमाषव

२५ पनीत्यादौवहिरङ्गासिद्धत्वेनैवसिद्धेव्यर्थ्यंस्पष्टमेव एतद्ग्रन्थस्वानुरोधात्काव्यकाल

पक्षेउपस्थितवान्तरङ्गः परिभाषवानुमानिकान्तरङ्गपक्षासिद्धस्यापिपूर्वत्रेत्यस्यवाधइ

ति तन्न लक्ष्यलौकचक्षुष्कमादरणीयमतएवोरत्यादिसूत्रेरेफस्यपूर्वान्तत्वेविसर्ज्ज

नीयप्रतिषेधोवक्तव्योनाकुर्द्दाघर्थ्यमित्युक्तंभाष्ये इतिदिक् उपसर्गाःक्रियायोगेवेति तत्र

सञ्ज्ञायाः क्रियायोगनिमित्तत्वादित्यर्थः यद्यर्थ्यैक्रियारूपेप्रादीनामन्वयस्तत्रैवयोर ९०

पसर्गत्वमितिभावः प्रकृतेप्रत्यासत्त्याऽरुकारादिनिमित्तोपसर्गग्रहणात्रागतरुद्धंःप्र

वा१

Digitized by Panjab Digital Library | www.panjabdigilib.org

स्थानिवत्त्वेन स्वशब्दतया तत ईर्न्शब्दस्यापत्तेः किञ्चोभयतआश्रयणे नान्तादि
वदित्यसंगता चमीयादित्याद्यसिद्धिः स्थानिवत्त्वे तूभयतआश्रयणे इष्यत एवान्यथा
ऽचः परास्मिन्नित्यस्याप्युभयतआश्रयणेऽप्रवृत्त्यापत्तौ ह्लायतह्सार्यं सिद्धिरिति दिक्
निर्दिष्टादिति न च कर्त्तरि चर्षीत्यादेर्गुणस्य पदद्वयसम्बन्धिवर्णद्वयाश्रितत्वेन बहि
रङ्गत्वाद्रेफाभावेन न विसर्ग इति वाच्यम् गुणस्यैव पदद्वयसम्बन्धिरेफस्वरात्मक
वर्णद्वयाश्रितत्वेन विसर्गस्यापितत्वात् परनिमित्तकत्वमप्युभयोस्समं किञ्च कार्य्य
कालपक्षे विपाघान्तदुपस्थितावपि पूर्वं प्रति परस्यासिद्धत्वादन्तरङ्गाभावेन पूर्वस्यान
रङ्गनिरूपितबहिरङ्गत्वाभावात्कथं तस्यासिद्धत्वप्रतिपादनं न चाऽन पूर्वस्यासिद्धत्वाद
भावेन तम्प्रति परासिद्धत्वं पूर्वं चेत्यनेन वक्तुमशक्यमिति वाच्यम् एवं हि विनिगमनावि
रहादुभयोरप्यप्रवृत्तौ विसर्गोऽदुर्वारः एवञ्च विरोधात्कार्य्यकालपक्षेपितदनुपस्थिति

Digitized by Panjab Digital Library | www.panjabdigilib.org

२०२१०

यस्मात्सविहितस्तदादेस्तादन्तस्ययह
णमितिपरिभाषा

५९

यस्माद्विहितस्तदादितदन्तत्वमार्च समानमग्रस्तमिति पदत्वसिद्धिः तद्वर्णमात्रवृत्ति
धर्मानतिदेशात् एव ह्यामिरित्यनेनात्वनिबन्धनऐत्व अयजे इन्द्रमित्यादौ सवर्णदी(
र्घश्च न अत एव तुक्सिद्धवचनं चरितार्थमन्यथाधीत्य त्यादावादिवत्त्वेन कृत्त्व
प्रयुक्ततुक् सिद्धौ तद्वैयर्थ्यं स्पष्टमेव तदुक्तम् वर्णाश्रये नान्तादिवत्त्वप्रतिषेधो
वक्तव्यो न चेताइत्यातिदेशादिति अन्तादिवर्णमात्रवृत्तिधर्मानतिदेशादिति तत्(
दर्थः श्रीरपेरेगत्योदावेकारविशिष्टे एकाज्जुत्तरपदत्वं भवत्येव स्थानिवद्भावेन तेन
तत्वम्पम् अप्राधान्येनाश्रयणात् किञ्च एकादेशे वर्णयोरेव स्थानित्वं न समुदायस्ये
ति भीईभियेइत्यादावेकादेशविशिष्टे धातुत्वानापत्तिः धातुत्वस्यैकादेशस्थानिध
र्मत्वाभावात् आनुमानिकादेशकल्पकवाक्यमन्त्रादिघटित समुदायस्यैकादेश
घटित आदेशाइत्येव नत्वप्रत्येकन्तयोः स्थानित्ववोधकं तथासति त्वाश्रवशाद्दस्य(

अतो लिसग्रेदी
नेनऐसत्यादेशः

५९

समुदायघटित २

Digitized by Panjab Digital Library | www.panjabdigilib.org

सदादावलग्रहतो
इति ३

उपसर्गादृति तपरकरणादुपर्च्छकारीयतीत्यादौ वा सुपीति न वृद्धिः सौत्रश्च तिस्त
न गृह्यते व्याख्यानात् आदित्यनुवृत्तेनतदन्तविधिरित्याहाव र्णान्तादिति यस्मिन्
विधिरिति परिभाषयाह ऋकाराद्धाविति पूर्वपरयोस्तयोस्समुदाययोरन्त्याद्योर्वर्णयो
रेकादेश इत्यर्थः उपसर्गावयवाकारात्धात्वावयवे ऋकारे तयोः पूर्वपरयोर्वृद्धिरित्यु
चितम् गतेरिति तु नोक्तम् अच्छर्छतीत्यादौ दोषात् अन्ता इह पूर्वपरयोरिति वर्त्तते
यथासङ्ख्यन्त्व अन्तादिशब्दावुपस्थितेकादेशस्यानिपरे पूर्वपरशब्दौ च तत्रघा।
टितसमुदायपरे एवं च पूर्वस्य परस्य समुदायस्यान्तादिभ्यां वर्णाभ्यामपृथगवस्थि
ताभ्यांयेव व्यवहाराः प्रातिपदिकत्वसुबन्तत्वप्रत्ययत्वादयस्ते कृतेकादेशस्य भवन्ति
न तु तद्वर्णमात्रवृत्तयोः त्वं कृत्य त्वादयः इत्यर्थः तत्फलितमाह योयमित्यादि तेन
रमाविल्यादौ बतादिवत्वेनौ इत्यस्य सुब्त्वे पूर्वमान्तस्यैकदेशविकृतन्यायेन प्रकृतित्वे

सुपोभावस्तत्त्वे १

Digitized by Panjab Digital Library | www.panjabdigilib.org

६

तस्येण एत्येधे।

ति प्रष्ठम्वहतीत्यर्थे वहेर्ण्विस्ततः शस्यूठि सम्प्रसारणे पूर्वरूपेऽनेन वृद्धिः प्रेदिधादि
ति परेल्लिलीकारादेः प्रतिषेध इति वार्त्तिके एधत्यनुपादानात् नत्वेधतेरव्यभिचारादि
वृत्ते ३ ति व्याख्यानं भिधानमेव एत्येधत्यो रेचीति विशेषणमिति भाष्यस्यैधत्यंशे सम्भवमा
त्रेणोपरञ्जकतयाविशेषणमित्याशय इत्याहुः उपेधयते इत्यादावपि वृद्धिर्भवत्येव
प्रकृतिभागस्यैधरूपत्वात् किञ्च एत्येधत्यवयवे चीत्यर्थः प्रत्ययलक्षणसूत्रभा
ष्यसम्मत इति अत्र न दोषः पुरस्तादिति पुरस्तादपवादा अनन्तरान्विधीन्बाधन्ते नोत्तरा
निति न्यायः अवश्यं स्वपरस्मिन्बाधनीये मेदेनापेक्षायां प्रथमोपस्थितबाधे
नाकाङ्क्षानिवृत्तिर्हि तद्बीजम् असाधुरेवेति आङ्-ओरेकादेशस्य पूर्वान्ततया
ङ्-पररूपेणबाधादिति भावः अर्थवद्ग्रहणा इति अस्या[illegible]तं त्वं रूपमिति सूत्रेउ
क्तम् पररूपप्राप्तमिति एवं धातुः साधनेन युज्यते इति सिद्धान्तादिति भावः ॥

त्वमितीदमप्युक्तमिति वाच्यम् फलविशेषाभावेन तदनादरणात् नन्वत्र जश्त्वात्पूर्वमन
न्तरङ्गत्वाद्द्वित्वे रूपे विशेषोऽस्ति तदनन्तरं जश्त्वप्रवृत्तेस्तस्य परिभाषात्वेन फलविशेषप्र
वर्तकत्वादित्यन्यत्र विस्तरः पञ्चमीति। विनिगमकाभावादिति भावः अत एवास्य वै
कल्पिकत्वं कृष्णेकेति कृष्णेतिसम्बुद्ध्यन्तमुपञ्चकपदमिति कश्चित् एत्येध। ऊठ्स्व र
त्रादेश एव व्याख्यानात् एचीति नोढो विशेषणम् ऊठस्त्वासम्भवात् एत्येधत्यो
रिति योगविभज्य तयोरेवेचीति विशेषणस्य भाष्ये कृतत्वाच्च तदाहेनाद्योरिति एति
रत्वैत्वे वक्ष्यति वृत्त्वात् उपेतीत्यादौ वृद्धिरेचीत्यनेन गतार्थत्वमाशङ्क्याह पररूपगुणेति
एत्येधत्योरेङि पररूपस्यापवादत्वानुगुणस्येति विवेकः उपेधते इति अत्र न सर्वादेशः
एत्येधत्याद्यवयवे चीत्येवं क्रमेण सूत्राणामर्थात् अयमेवार्थ इति प्रत्ययलक्ष
णसूत्रस्य भाष्यस्वरसः वक्ष्येशाख्येतिवदेत्येधत्यूठ्स्विति सप्तमी बोध्या प्रष्ठौहः

Digitized by Panjab Digital Library | www.panjabdigilib.org

रत्वं कलपरत्वमिति व्यवस्थानुपपत्तिस्तु नरेफवत्स्थानिकस्यापि म्हरेफपरत्वं लृ
कारवत्स्थानिकस्य लपरत्वमिति व्यवस्थासंभवात् तत्रान्तरतम्यादिति स्थानत
इति भावः रेफादिद्वारा देशस्यापि मूर्द्धादिस्थानत्वात् तत्र तत्रादेशानेव रलपरान्
द्यार्थ्यं दंष्ट्रं नकार्यमिति तु न वाच्यम् आपृच्छधामीत् म्भ्रमिदिस्याद्देदोषाप
त्तेः अत्रारापूर्वैलोव प्रग्नास्त्रुणामिति निर्देशात् बल्कतोरत्रत्याहाराभावेन रपर
इत्यस्य स्थाने लपर इति पठनीयमिति लपरत्वमवक्ष्यामीति तुल्यास्यसूत्रभाष्याद्व
म्यते मतोरु० रुयोह इत्यतो वावसाने इत्यतो वा विकल्पोनुवर्त्तते हयवरट् सूत्रस्थ
भाष्येत्स्यष्टमिदम् लोपइति स्पृधधातोर्लुङ् इति भावः अस्पसीति द्वित्वाभावद्
त्यनुलक्ष्यते त्रिधमिति त्रिधकारत्वमप्रक्रियाभिप्रायेण न च द्वित्वमिन्को पूर्वत्रकर्त्त
व्योपरमसिद्धमित्यपर्यकेन पूर्वत्रासिद्धमद्वित्वे इत्यनेन धातुधकारस्य जश्त्वे दस्यादि

Digitized by Panjab Digital Library | www.panjabdigilib.org

इत्यवयवंवाचिना परशब्देन षष्ठ्यर्थेबहुव्रीहिस्तेनास्यावयवत्वात् यणागमाऽइति न्यायेन
विशिष्टस्यगुणवृद्धित्वेन ऋकारस्यगुणवृद्धी अरारावेव नैचइतिनियमोपपत्तिरत एव
बरदाभ्यामितिसूत्रेऽधातोश्चसेटीति सूत्रे च भाष्ये गुणो भवति वृद्धिर्भवतीति रेफशिरा गु
णवृद्धिसंज्ञकोऽभिनिर्वर्त्ततेइत्युक्तं ऊः स्थाने ऽण्प्रसज्यमान एव रपरो भवति पूर्वं भक्तश्च
रेफइत्यर्थं गुणइति कैयटः अवयवत्वं बाचनिकमेव तत्साहचर्यबोधनपर्य्यवसायि अ
न्यथा वर्णस्य वर्णान्तरावयवत्वं हलन्ताच्चेति सूत्रभाष्योक्तरीत्याऽसंगतं स्यात् पर
श्चासावर्थेबहुव्रीहिणा नवयवत्वेतु गुणवृद्धिशब्देनाकारादेरेव रे परस्य तदेकवाक्यत
या विधानं स्यात् गुणत्वादिकन्त्वकारादिनिष्ठमेव स्यादित्युक्तनियमानुपपत्तिः अ
त एव बर्ब्रश्च्यादौ हलादिःशेष इति सिद्धिरभ्यासावयवस्यैवानादेस्तेन निवर्त्तेः एतेना
ऽमनन्तरं परत्वं विधीयत इति परास्तम् उक्तनियमानुपपत्तेः अत्रपक्षेऽकारस

ध्र१

स्थान्यवयवत्वाना
४

लं०४१०

५६

लागृहत्रस्योक्तभाष्यविरोधेनस्पष्टमेवकैयटेनोक्तम् अतएवभाष्येउत्तरार्थमित्यु
क्तं हलिसर्वेषामित्यत्रैवप्रयोजनमुक्तम् हलिसर्वेषामित्यत्रवकारनिवृत्त्येवात्रत
द्वारणसम्भवान्नतत्राप्युभयग्रहणस्यप्रयोजनमितितद्भाष्यमेकदेशयुक्तिरेवेत्याहुः
कानिसन्तीति वाक्यसंस्कारपक्षेपिपूर्वोपस्थितनिमित्तक त्वरूपान्तरङ्गत्वमाश्र
यान्तरङ्गाणां पूर्वमप्रवृत्तिरितीकारादेः स्थानिभूतादचः पूर्वत्वमबाधम् एकः ६०
गुणइत्यादेर्विधेयसमर्पकत्वेनतत्रैकत्वसङ्ख्याया विवक्षितोनोभयोः पूर्वपरयो
रेकवाक्यतयैवविधेयान्वयेनचानयोः स्थलयोः कथंकुर्वित्यादितद्वोभयसम्बन्धे
कविधेयस्यैवप्रतीतेरङ्गग्रहणंस्पष्टार्थम् उरणर० स्थानेइतिषष्ठीस्थानेइतिपरि
भाषालब्धम् उदात्तस्वरितयोर्यणइतिवत् स्थानेन्तरतमइत्यतः स्थानेग्रहण
मनुवर्त्ततेतस्यलक्षणयाप्रसङ्गावस्थायामित्यर्थस्तदाह रः परस्सन्नेवेति रपर

५६

Digitized by Panjab Digital Library | www.panjabdigilib.org

कोवलोपोत्र दुर्बोरइत्यपास्तम् किञ्च स्थानिवत्त्वनिषेधं विनाप्यपदान्तत्वासिद्ध्यात्रनि
षेधाप्रवृत्तिः स्थानिवत्त्वनिषेधज्ञाने पदान्तत्वज्ञानं तन्निर्णये च स्थानिवत्त्वाभावज्ञान
मित्यन्योन्याश्रयस्तत्राप्रवृत्तौ बीजमिदं च नपदान्तसूत्रे भाष्ये स्पष्टम् नच पदसंज्ञा
यां हिलोपस्य स्थानिवत्त्वाद्धस्य पदान्तत्वमेव नास्तीत्यस्त्रीति व्यर्थमिति वाच्यम् पूर्वत्रा
सिद्धीयइति निषेधात् साक्षात्पदत्वादि द्वारक परम्परया वा पूर्वत्रासिद्धीय प्रापकस्य प्र
तिबन्धकस्य वातिदेशस्यते न निषेधादिति केचित् परे तु नपदान्ता हलोऽचः सन्तीति
लण् सूत्रस्य भाष्याद्धस्य वादेरनभिधानमेव भोभगो इति सूत्रे ऽस्य ग्रहणमनर्थकम
न्यत्राभावादिति वार्त्तिकाच्च ग्रहणं ह्यत्र तन्निमित्तकार्यं कार्यित्वोऽभावादिति तदर्थः न(

५२ ह्येमत्र सरस्तीति तथाख्यानं भाष्ये ऽस्य ग्रहणमुपलक्षणं। एतदाशयमज्ञानानेन केदे
शिनोक्तं दीर्घहल्लिसर्वेषामिति वक्ष्यौक रोतीत्यत्रमा भूदिति उक्तमस्यैवैकदेश पुत्रोलं

Digitized by Panjab Digital Library | www.panjabdigilib.org

लौ०प्रि०

१५

अधान्यं केयम् इत्येतु नञ्कप्यत्वं नापि केयत्वं किन्तु धान्यादेरेव शक्तिस्वभावात्
भाव्यत्वरसोऽप्येवमित्याहुः लोपः शा० भोभगोअघोअपूर्वस्य योऽशीति चानुवर्त्तते
ओकारान्तो घोतो गार्ग्यस्येति बाधकमित्याशयेनाह वतोर्वयोरिति व्योरित्यनुव
र्त्तावपि वर्णसमाम्नाये यकारस्य प्राक् पाठात् क्रमेणाह यवयोरिति सतस्मा आच
ष्टे इत्यादि भाष्यप्रयोगादत्र रीतित्वस्यासम्बन्धः इदं सूत्रं लघुप्रयत्नेन शाकटाय
नमतेत योर्विधानेन शाकल्यमतेतदभावात् अवतीति किम् गोर्घ्यत्र पदान्तयोः
किम् हरये अग्नि किम् वृक्षं वेतीति वृक्षवीः क्विप् तमाचष्टे इति णिपन्ताद्विच् वृक्षव
करोति क्विपि तु ह्स्यात् विज्निमित्तको लोपो व्योरिति लोपस्तु न णिलोपटिलोपयोः
स्थानिवत्त्वात् प्रातिपदिकात् णिजुत्पत्त्यापदत्वाभावेन परपदस्यानादेशाभावेन ब
लोपस्य पदचरमावयवत्वाभावेन चनपदान्तेति निषेधाऽप्रवृत्तेः एतेन कन्निमित्त

५५

Digitized by Panjab Digital Library | www.panjabdigilib.org

त्वेनैवोचादिष्वत्ययनिमित्तकर्त्ता तन्निमित्तस्येति किमिति । तत्रमेव किमर्थमिति चेत्
हम: श्रायतेइति वेत्त्यः कर्म्मणि लटि यक्रि पजादित्वात्सम्प्रसारणे हलः स्ताद्वेति दीर्घे श्रा
ज्ञा सहाकुशः नधातुलोपस्तत्रभाव्यतीत्याव हिर्भूत धात्वुपसर्गकार्य्यस्य वहिरङ्गत्वा
द्वान्तादेशो गुणोऽसिद्धइत्यस्त्वेवाह श्रायतेति तस्मादेव कर्म्मणि लङ् आडागमे वृ
द्धि: श्रौबस्त्रूर्द्धवत् क्षय्यज्य्यौ शक्यार्थे जिन्यये इत्यनयोरेव ग्रहणं न तु क्षीबृहिंसायां
क्षैत्रैक्षये इत्यनयोर्व्याख्यानात् अतएव क्षिणोरेवैवेच इति भाष्येउक्तम् तस्मेप्रेति
क्रय्यार्थे बस्तु निक्रय्य इति निपात्यते इत्यर्थो व्याख्यानात् गुणाभावस्तस्यापि तदापराम
र्श: क्रय्यार्थेश्च फलोपधानस्त्पन्नदर्थ इति विशेषणाच्चा दाह क्रेतार इति योग्य
तामात्रग्रहणे त्वव्यावर्त्तकं तत्स्यादिति भाव: केचित्तु स्वीयं धान्यादिदत्वा यत्र तन्मू
ल्यग्रहणं तत्र धान्यं क्रय्यम् यत्र तु स्वयं धान्यं द्रव्यं दत्वा परकीयधान्यादिग्रहणं त

Digitized by Panjab Digital Library | www.panjabdigilib.org

१०१८०

५४

वेइत्यादौ तस्य लोपइति दुर्धीरम् गवङ्ता वुच्चारणास्य चारितार्थ्यादिति वाच्यम् गविचयुक्तेइत्या
दिनिर्देशेर्वारणात् यत्तु सा पूर्वपक्ष युक्तिरिति न बकार श्लेषो लोपे नोच्चितः किञ्च छन्दसि स
र्वे विधीनामव्यवस्थितत्वान्नतेलोपश्रुतिस्तत्र त्वेगवङ्तौ श्रध्वपरिमाणोपि सञ्ज्ञाशब्दोयं त
त्रसञ्ज्ञात्वभङ्गापत्तेर्न वलोपः यथा रघुनाथेति सञ्ज्ञाशब्दे नित्यस्यापि णत्वस्याभावः सर्व
नामशब्दे णत्वाशङ्कातु तस्य सञ्ज्ञाविशेषेआधुनिक विनियोगात् शास्त्रानुसारि शब्दस्यैव
विनियोग उचित इत्यभिप्रायेण निरूपितश्चैतत् सर्वादिशब्दे भाष्यप्रदीपोद्योते इत्याहुः निरू
पयिष्यते चेदमग्रे पूर्वपदात् सञ्ज्ञायामिति सूत्रे धातोस्त ० धातोरित्यस्याभावे प्रातिपदिकमात्र
विषयो नियमः स्यात्तथा च गव्यमित्यत्र न स्यात् श्रोयत इत्यत्र स्यात् तदभावे सामान्यतो नि
यमापादनन्तु योगविभागेवकारबैयर्थ्यापत्तेरयुक्तम् तन्निमित्तस्य चेद्धातोरेवेति नियमे
बाभ्रव्यसिद्धेस्तद्वारणायैवकारः लव्यमित्यादिः अत्र गुणवद्धोर्व्यतत्प निमित्तक

५८

तन्निमित्तस्यैवेति र

Digitized by Panjab Digital Library | www.panjabdigilib.org

१० शे०

ऽन्यन्यायप्राप्तानवकाशविधयो विधेयविषयप्रवृत्तिस्य चंतद्धिते घञ्चामिति सूत्रे पद्ः वि-
धायकेच भाष्ये अनेन उत्तरयोर्विग्रहेण विशेषाः समस्तत्ययानित्यग्रहणान्वयेकंक्रियास-
मभिहारेच नैतेभ्यो पञ्चभवितव्यमिति भाष्यम् चेन विशेषाः समस्तत्ययादित्यनुकृष्यते अन्य
थातक्रकौण्डिन्यन्यायेन सिद्धे विशेषाः समस्तत्ययादित्यनुकर्षक. चकारवैयर्थ्यापत्तिः निष्ठ
पयिष्यतेचेदं पङ्न्ते तस्य च वार्त्तिकेनुवृत्त्यापूर्वतो स्वरूपमात्र वकारान्तआदेशइत्यर्थः सूत्रे
तुनफलम् गव्यादौ भत्वेन वान्तस्यपदत्वाभावाद्यत्वेप्यत एव तदभावाद्यत्वोपात्वाप्तेः गोश-
ब्दादिभ्यः क्यजादावपि नः क्ये इति नियमेन पूर्वस्य पदत्वाभावात् एवन्तर्हि वार्त्तिक एव
अश्लेष उचितइत्याशयेनाह वकारान्तेति लोपो व्योरिति सूत्रे वकारग्रहणव्याख्यानेन लौकि तु २
कोदाहरणाभावेन तदर्थतयावाध्यम् अत एव इको गुणेति सूत्रेतो लान्तस्येत्यत्र लुप्तनि-
र्दिष्टोवकार इत्युक्तंभाष्ये शास्त्रीयस्यात्र प्रयोगार्थत्वादिति तदाशयः नचैवमपि हलवेद्या

Digitized by Panjab Digital Library | www.panjabdigilib.org

गा०प्र०

ह यकारादाविति ओदौतोरिति ओदौतोरिति वक्तव्यमिति वार्त्तिकमूलाद्याख्या(

नादिति भावः पूर्वसूत्रे वान्तोयीति तयोरेवस्यानित्यत्वनिर्लोपादिति स्थानेन्तरतम

५३

सूत्रस्य कैयटोक्तं तु न युक्तम् वान्तज्ञानाय सूत्रपर्य्यालोचनस्यावश्यकत्वेपि

तद्यावयार्थपर्य्यालोचनेमानाभावात् यथासङ्ख्यसूत्रसहकारेणबोधोत्तरं त

पा५ योस्तत्त्वनिर्णयात् आन्तरतमपरिभाषं निर्वाहेतुलक्ष्यपर्य्यालोचनकालेतन्निर्णयः।

अतएवपूर्वसूत्रेस्थानिविशेषलाभोयथासङ्ख्यसम्बन्धादिह तु निमित्ताभावात् त[illegible]

पा४ भावः इतिषष्ठेत्रकृतसूत्रेकैयटः गव्यमिति भत्वादूलोपानचीति किम् गोभ्याम्

प्रत्ययेकिम् गोयानम् ननुगव्यूतिरित्यत्र वस्य हलि सर्वेषामिति लोपः शाकल्यस्ये(

तिवालोपःस्यादत आह वान्तोयत्ययेति नचविशेषविहितेनकार्य्यित्वेन लोपेवस्यनिमि

त्तत्वबाध इति वाच्यम् निमित्तता नाक्रान्तेविषयेकार्य्यित्वस्य चारितार्थ्यात् तक्कौ ५३

Digitized by Panjab Digital Library | www.panjabdigilib.org

ना० शे०

ध्यमर्थमाह क्रमादिति उदात्तादिगुणयुक्तानामन्यगुणकत्वावृत्तिस्तु स्थानेन्तर
तमपरिभाषयाबोध्या एतदेवाभिप्रेत्य यथासङ्ख्यसूत्रे भाष्ये प्रकृतेत्रसूत्रे स्थाने
न्तरतमसूत्रेण व्यवस्थोक्ता संवृता वर्णस्य संवृता वर्णा विवृता वर्णस्य विवृता
वर्णा इति एतद्भाष्यप्रामाण्येन एओ इत्ययोरकारांशे संवृतत्वं इतरांशे विवृतत
रत्वं तदुपरागाच्च न संवृतत्वस्य दृष्यग्रहणम् ऐऔ इत्यनयोस्त्वकारांशेपि विवृ
तत्वमेवेति बोध्यम् तस्य लो उपदेशेजित्यत इदित्यनुवृत्त्या विभक्तिविपरिणा
मेन च सिद्धौ तस्य ग्रहणं सर्वलोपार्थम् तेन नेति इदितामन्त्यस्य लोपो न नानर्थ
के इति परिभाषानुभाष्यप्रत्याख्यानेवेति दिक् न भवतीति फलाभावादिति भावः
वान्तो यि न विधिरित्यस्यापवादभूतया तस्मान्नुड्द्वीत्या यच्चमावश्यकतया बाचनि
कया यस्मिन्विधिस्तदादावल्ग्रहण इति वार्त्तिककृदुक्तपरिभाषयालभ्यमर्थमा

न ४

तस्य व दत्तो तस्येत्
तस्येति ग्रहणेन ४

नन्वेतु व स्या
पल ...
हलेन कर्तव्यं लोपड
स्येवाह तत्राह उप
देशेति ५

Digitized by Panjab Digital Library | www.panjabdigilib.org

सा० प्र०

५२

नुवत्याः नचीत्येव सिद्धे तुसूत्रत्रयमपि तस्येति बोध्यम् अचो र अच इति स्फुतत्वा
द्वाव्यानाच्चरहाभ्यां सम्बध्यते तस्मादित्युत्तरस्येत्येतत्सम्प्रमाहाच: परस्यामिति
वायमीति सयोह इत्येतोन्यतरस्यामित्यनुवृत्तेरिति भाव: दीर्घादाचार्याणामितु
नेरमनुस्वारस्य यथि· वापदान्तस्य तोर्लि उद: स्था झयोहो शश्छोटीति बद्दसूत्रीपा
ठे न्नुरं झलां जश्झशि· अभ्यासे चर्च खरि च वावसाने अणोऽप्रगृह्यस्येति पञ्चसू
त्रीं पाठ इति भाष्यसम्मता ष्टाध्यायीपाठे तु वावसाने इत्यतोऽनुवृत्तिर्बोध्या एवं चास्य
वैकल्पिकत्वं ल्यत्सूत्रे भाष्ये आदित्य इति आदित्यशब्दात् बार्हस्पत्यों ता देवतार्थेण्यः
यस्येति चेत्यलोपेनेन यलोप: आपत्यस्येति तु न आपत्यत्वाभावात् हल इति किम्
शय्या वमामिति किम् आधीत् वमीति किम् रामाभ्याम् एचोय इचोचियलाय
वायाव: अवायावोपि प्रत्यये इति सूत्रेपि तु मुचितमित्याहु: यथासङ्‍ख्यसूत्रेल

हलोयमांमितियमे॰ 3

न ४

सतिसूत्रद्वयेसूत्रपाठकमोरेवंनास्ति ५२ कमिति भावलेबोम २

शेषार्थ्यायाय अन्तेयस्यतस्मा दित्ययं ४

Digitized by Panjab Digital Library | www.panjabdigilib.org

आदिनीशब्दे परे इति च आधान्याधारस्य विशेषणम् सूत्रे आदिनीति ङ्यन्तानुकरणं लुप्त
तसप्तमीकं अत एव तत्परे वेत्यस्यादिनीशब्दो यस्मात्परस्तत्र परे इत्यर्थं हरदत्तो व्याख्यात
अद्यातो माधवोप्येवमेव ईदृशाक्रोशस्य शिष्टेष्वदर्शनाच्च आक्रोशे निंदां तदाह पुत्रा
दिनीति तादृशाक्रोशस्य शिष्टेष्वदर्शनादाह पुत्रहतीति अनचिचेति सिद्धे पुत्रस्यक्तान्ते
वेद्वतन्मध्ययोरेवाक्रोश एवेति नियमार्थमिदम् संयुक्तेष्विति त्रिप्रभृतिष्विति सूत्रे
वर्णानां सजातीयानामेव ग्रहणं परस्परसाहचर्यात् वच तथा च सम्भवन्ति अतए
वाचोरहाभ्यामिति साचर्यकं निर्धारणे सप्तमी अचइत्यनुवर्तते त्रिप्रभृति संयुक्तवर्ण
मध्ये यः परस्परतो द्वे वा न स्त इत्यर्थः तेनेन्द्रः राष्ट्रमित्यत्र नकारषकारयोः द्वाभ्य
द्वित्वस्यैव निषेधविकल्पः अनचिच सर्वत्रशाकल्यस्येत्यस्यावश्यकत्वेदं सूत्रद्वयं वि
कल्पस्य मदभेदप्राप्तव्यवस्थाबोधनार्थमिति बोध्यम् यरोनुनासिक इत्यतो वेत्य

Digitized by Panjab Digital Library | www.panjabdigilib.org

५१०

५१

मीविधानेनतस्याप्राप्राङ्गेः तत्त्वेतुअत्स्यैवार्थतोल्पवत्तस्यप्रसक्तिः तस्मात्प्रयुइत्यत्र
क्रियोदर्शनसत्त्वेनप्रत्ययलक्षणेनतुगापत्तिर्दोषः कृतप्रत्ययेनप्रकृत्याक्षेपः स्तुन
अत्रैवप्रकृतिम्विनातिदेशातः प्रत्ययस्थानसत्त्वेतदभिव्यामनदाक्षेपासम्भवात् इ
तिपक्षेइतिविनिगमनाविरहादितिभावः द्वित्वस्यत्रैपादिकत्वात्तत्रनयणोवहिरङ्गा
सिद्धत्वम् अतएवदध्यत्रेतिभाष्येउदाहृतम् धकारयकारयोरिति तेनविसर्गादिद्वित्वे
नाधिक्येपिनक्षतिः द्विधमिति द्विधत्वमक्रियापाभ्यांध्यम् एकस्याआकृतेश्चरितः
प्रयोगोनद्वितीयस्याभविष्यतीतिकृत्वानुप्रयुज्यतेइतिसूत्रभाष्योक्तन्यायेनैकस्यद्वित्वे
परस्यतदभावोनुचितइतिनवाच्यम् सार्थकानेकविषयेतत्राङ्गीकारात् पुत्रान्याकृ
तिकरणेपिभिन्नार्थत्वसम्भावनातद्विषयत्वाच्च हलोयमामितिलोपेद्वित्वाभावेचेत
देवरूपम् नादिन्या परोनुनासिकइत्यतोपरइतिवर्ततेपुत्रशब्दस्येत्यवयवषष्ठी ।

५१

पपदानामित्यस्यानित्यत्वेन सुबुत्पत्त्यनन्तरमेव समासः उत्तरपदत्वे चेति अत्यपल
स्याल्लप्रतिषेधश्च अत्यासत्त्योत्तरपदस्य कापित्वे एवेति न दोषः पदे इति पदत्वेपोऽप्योप
लक्षणम्वा अचेदश्चाभाष्यमपिमानम् अत्र पदचरमोवयवादिलोधकः प्रतिबन्धकश्च(
स्थानिवद्भावो निषिध्यते विनिगमनाविरहात् एतत्सूत्रभाष्यकमेलिङि॰ स्यादिसूत्रभा
ष्ये: पूर्वत्रासिद्धे न स्थानिवदित्यवष्टम्भ्य वरे यलोपस्वरदीर्घग्रहणावर्जोन्द्विर्वचनादिष्वत्या(
(व्यातत्वितिलभ्यते निषेध इति द्विर्वचनग्रहणात्पूर्वत्रासिद्धे इति निषेधाद्वेतिभावः द्काकार
इति स्थानतत्त्वान्तर्यादितिभावः अदर्शनम् स्थानमितिवर्त्तते असजेसतीति तदर्थोसत्ता
ह प्रसक्तस्येति शास्त्रतोऽर्थतो वेति भावः अत्र इग्लिर्जीन सामान्ये तत्रज्ञानस्याबर्जोनी
यत्वेन तत्सामग्ध्यन्तर्गता उच्चारणकृताससतीनिषिध्यते तत्र अत्यपलोपे शास्त्रतोऽर्थतश्च
न तत्र लक्ष्मिरिति न दोष इति तत्र॰ तेन अत्यालस्यात्यवन्तार्थकर्म्माधिकरणयोरेव पश्च

प्रसक्तोच्चारणत्वं लोपविधानेन तस्य तत्लिन्नविषये उत्पत्तेरेवान्यारव्यानंपुत्पत्तक्षणार्थमितिबोध्यम् अर्थस्येबोल
स्थाप्याव्यानाद्यत्तु प्रसक्तस्येतिकिं ग्रामेतिष्ठतीत्यादौ त्यपरलोपइतिपञ्चम्यापत्तेः आलिचाव्त्यपादर्शनम् शास्त्रि
तोऽर्थतश्च २

Digitized by Panjab Digital Library | www.panjabdigilib.org

लॅ॰ शे॰

५०

नः पदान्तेत्यत्रान्तशब्दश्चरमावयववाची कर्म्मषष्ठ्या समासः तेन एषोयन् हस
तीत्यादावेतत्तदोरिति सुलोपो न इष्टः प्रातरिह्लपम् तत्रयत्नः स्थानिवत्त्वात् उत्वे
च न स्थानिवत् अनेन निषेधात्स्यषं चेदम्भाष्ये इति भाष्यप्रदीपोद्योते निरूपितम्
अत्र पदेन्त इति सप्तमी समासो भाष्य उक्तस्तेन त्र्यत्यासत्त्यापरपदस्थानादेशास्ये
वानेन स्थानिवत्त्वनिषेध इति त्वेतत्स्थानित्यादेन दोषः नचैवमपि पूर्वत्रासिद्धीये
न स्थानिवदिति निषेधोत्र दुर्वारः पदेन्त इत्यर्थे न तत्र स्थानिवत्त्वनिषेधव्यावृत्ति
परभाष्यआमात्पेन पूर्वत्रासिद्ध इत्यत्र पदचरमावयवविधायकातिरिक्तस्यैवात्रै
पादिकस्य ग्रहणात् अत एवमहिष्माणित्यत्र नश्रुंवन सूत्रे न प्रपदेन रुलांजशि
त्यस्यैव ग्रहणं च सन्निहितस्यैव ग्रहणौचित्यात् कार्य्यकालपक्षेपि त्रिपाद्यामन्त
रङ्गपरिभाषा न प्रवर्त्तते इति वक्ष्यते इति न तपास्य सिद्धिः गोचेत्यादौ गतिकारको

५०

Digitized by Panjab Digital Library | www.panjabdigilib.org

अतएवैनेय इत्यादौ यस्येति चेति लोपे तस्य स्थानिवत्त्वात्सन्नियोगशिष्टत्वापत्त्या न नि
वृत्तिप्रतिबन्धेन नकारस्थितिः अतएव नपदान्तसूत्रे यञ्चेन्द्रोत्स्यादेवता यस्य यञ्चेन्द्र
इति लुकि न स्थानिवदित्यस्योदाहरणं दत्तमाध्ये अन्यथा तत्र पूर्वत्वेन दृष्टस्य सम्वन्धि
नः कस्यचिद्विधेयस्याभावात्स्थानिवत्त्वाप्राप्तिरेवेति तदसङ्गतिः स्पष्टैव अस्मत्सूत्रेऽपि
भाष्ये कर्म्मसाधनस्य विधिशब्दस्योपादानेन सर्वमिदं संगृहीतमिति भावसाधनो वि
शास्यते पूर्वस्य विधानमप्रति पूर्वस्य भावमप्रति स्थानिवदिति उक्तं तत्र भावसाधन इ
त्यस्य सोपयीत्यर्थः पूर्वत्वञ्च व्यवहिताव्यवहितसाधारणं अव्यवहितग्रहणे माना
भावात्सरे निषेधाच्च तेन पटयतीति सिद्धं अत एव द्वित्वनिषेधे स्थानिवत्त्वप्राप्तिः
न पदान्तः अत्र द्विर्वचनसवर्णादिग्रहणं वति घटितान्यातिदेशानां त्रिपाद्याम
प्रवृत्तिबोधनार्थं तेन रामइत्यादौ विसर्गादिसिद्धिः अत्र विधिशब्दो भावसाध

Digitized by Panjab Digital Library | www.panjabdigilib.org

त्व. प्रो.

६९

पादिर्न स्यादिति॰ पूर्वविधाविति किम् नैधेयः निरर्बाह्याग्निः किन्तु पये भ्रातो लोपे
तस्य स्थानिवद्भावाद्ग्यत्वव्यपदेशाविरोधात्त्वाश्रय घत्वनिवृत्तौ ढगनापत्तेरिति अत्र स्था
निनि सत्ति यद्भवति तदादेशोपि भवति स्थानिनि यन्नाभवति तदादेशोपि नेति भाववोह्म
योरव्यतिदेशः तत्र भावोदाहरणं निगाल्यते इति अन्योदाहरणम् पटयती त्यादिस्व
तनिनिमित्तकं भवत्यादेशानिमित्तकं नेति च तदर्थः लघूपधत्वसम्पादने द्वारा लोपनिमि
त्तकावृद्धिरित्याहुः स्थानिनूतादचइति सूत्रेप्रवणाध्याख्यानाच्च तस्यैव पूर्वत्वे वधित्व
मितिभावः पूर्वविधावित्यस्य पूर्वसम्बन्धिन्येव शास्त्रविधेयेकर्त्तव्ये इत्यर्थस्तेन पूर्व
परयोर्विधौ न तेनारतुरित्यादौ स्वच्छन्दतामिति गुलस्यसबले दीर्घे न स्थानिवत्त्वम्
वस्तुतोऽत्र पूर्वविधिशब्दे तन्त्रमेकस्योक्तेर्थः द्वितीये भावे किः सम्बन्धसामान्यषष्ठ्या
म् ॥२॥ इति शेषः ॥ अनुस्वारनम् वाच्येत्यपृच्छः अन्येत्विति ॥ गे तृतीय चतुर्थ
पञ्चमास्सायमाह कारानुस्वारोपरालवाद्यत्वर्थः नादभागिनस्तत्र पञ्चकाः य
द्यपि खेपदादिषु घोषाघोषान्यतरप्रपञ्चमात्रेणापि प्रक्रियायां निर्वाहस्तथापि ॥
शिक्षानुरोधेनान्येषामुक्तिः अल्पासवोऽल्पप्राणाः यतएतेषां चारणोत्तरं प्रा ॥
णानामल्पत्वमितिबभवति वर्गेष्विति विद्यमानानामितिशेषः चतुर्णामिति नि
र्धारणे षष्ठी अन्यतमादिति शेषः दुर्बलदृष्टा इति सादृश्यंपञ्चकं तेऽप्यत एवावो
गवाहेषु पञ्चमानां गणनं भाष्ये चत्वारस्वयमाः स्मृता इति पाणिनि शिक्षा च संग
च्छते अपंच वेदे एवतनदाह प्रातिशाख्ये इति अन्येषामिति अयामुक्तान्यह ॥

स्वर२

वे३

६५

२६

ज्जिह्वस्य वर्णानभिव्यनक्ति ततो यत्नविशेषेण गलबिलविवरविकासादीन् करोति तत्र येन
तत्स्थानाभिघातकोपचारोस्ति आस्यान्तर्गतात्तत्कार्य्यकारित्वादाभ्यन्तरा इत्युच्य
न्ते गलविवरविकासादिकृतश्चास्य बाह्यभूतदेशकार्य्यकरत्वाद्बाह्या इति मात्राका
लिकत्वादिरूपकृत्स्वत्वादिकं तु वाय्वल्पत्वमहत्त्वकृतमिति नाभिप्रदेशात्प्रेरकः प्रयत्न
एव कश्चिद्धि लाक्षणिकोऽल्पं वायुं प्रेरयति कश्चिदधिकमिति तस्य वायुप्रेरणाद्रूपंका
र्य्यमास्यबाह्यदेशमिति तदपि वास्यमेवात एवाइउण्सूत्रे भाष्ये कृत्स्वत्वादिजनक
प्रयत्नस्यास्यविशेषणेन सवर्णेषु सूत्रेऽग्रहणमित्युक्तम् प्रयत्नैक एव प्रयत्नः सर्वकार्य्य
जनको वर्णनाशकश्चेति परस्मान्नैक इति सूत्रे भाष्ये उक्तम् तथापि तत्तत्कार्य्य
लोपाधिना एकस्मिन्नपि भेदमारोप्य तथा तथा व्यवहार इति बोध्यम् उदात्ता
दिजनकप्रयत्नस्याभ्यन्तरकार्य्यकत्वेपि उदात्तादिशब्दैर्विना बोधितानोक्तेषां

Digitized by Panjab Digital Library | www.panjabdigilib.org

बपसन्धावनयासर्वेषान्नलोपापत्तेरितिदिक् वायुश्च पञ्चदशइति काकलकाधस्तात्जल
विवरसंकोचविकासरवासोत्पत्तिः ध्वनिविशेषरूपनादस्तद्विशेषरूपघोषाल्पत्वघोष
प्राणत्वत्वमहत्वस्वरूपकार्य्यकरत्वमेषाम् तथाहि आत्माबुद्ध्यासमेत्यार्थान् मनो
युङ्क्तेविवक्षया मनः कायाग्निमाहन्ति सप्रेरयति मारुतम् सोदीर्णोमूर्ध्न्यभिहतो
वक्त्रमापद्यमारुतः वर्णान्जनयते इतिशिक्षायामुक्तम् आत्मान्तःकरणसं
स्काररूपेणस्वगतानर्थान् बुद्ध्यास्वस्वरूपया समेत्यैकबुद्धिविषयान्कृत्वातद्बोधने
च्छयामनः युक्तंकरोति तदिच्छावन्मनः कायाग्निंजाठरमग्निमभिहन्ति सकाया
ग्निः सोदीर्णः मारुतः उदीर्णः ऊर्द्ध्वंप्रेरितइत्यादिस्तदर्थः एवञ्चशब्दप्रयोगेच्छ
योत्पन्नप्रयत्नाभिहताग्निनानाभिप्रदेशात्प्रेरितोवायुर्वेगान्मूर्द्धपर्य्यन्तंगत्वाप्रतिनि
वृत्तोवक्त्रंप्राप्यउक्तप्रयत्नलाघवेनतत्तत्स्थानेषुजिह्वाग्रादिस्पर्शपूर्वकंतत्तत्स्थाना

Digitized by Panjab Digital Library | www.panjabdigilib.org

बाधनापत्तिः अतिदेशस्यारोपरूपत्वान्निरधिष्ठानारोपासम्भवेन कार्य्यप्रवृत्तेर
त्रपक्षेऽभावरूपकत्वात् शास्त्रासिद्धत्वे तु यत्राप्यन्तरङ्गत्वात्प्रापादिकमप्रवृत्तम् तत्रा
पि तत्तच्छास्त्रे एवाभावारोपेण तन्निवृत्तिबुद्धेरभावस्यादेशानुद्भावालक्ष्येणातत्त्व
बुद्ध्यभावस्य ज्ञाप्यमानकार्य्यत्वादेश एवस्यानिवृत्त्या प्रवर्त्तते नहि रमनतमनप्रयु
क्ताप्रवृत्तिः शुक्तिं न गोचरयतीति न दोषः यत्र तु सहप्रसङ्गस्तत्रा प्राप्ते एवाभा
वारोपात् न चैवं पूर्वत्रनेत्यवसरत्र मास्त्विति वाच्यम् पूर्वशास्त्रप्राप्तो निषेध इत्यर्थे
नलोपः सुबिति सूत्रासंज्ञन्ते: तद्धि नियमार्थम् त्वदीत्यात न नम्बरत्यस्यान्त्यशावां
कस्यापि पूर्वशास्त्रस्याप्राप्त्यात न्निषेधाप्रवृत्तौ नलोपेनातेमुक्त्व वन्तामितिन्यायेनेत
दप्रवृत्तौ तन्नाम्वदीर्घसिद्धानियमानुपयोगात् राजभ्यामित्यादावपि दीर्घापत्ते
श्च पूर्वशास्त्रविषयसम्भावनायामित्यर्थे राजभ्यामित्यादौ नलोपे सुब्विधिरीर्घवि

Digitized by Panjab Digital Library | www.panjabdigilib.org

त्रस्यासिद्धत्वम् पूर्वत्वंच क्वचित् सपादसप्ताध्याय्याः क्वचित् सूत्रान्तरसहितायाः
तत्रायमर्थः लोडइत्यादावस्यापास्थितौ वाक्यभेदेनान्वयः ह्रस्वयो भवति इदञ्चपरा
त्वं पूर्वत्रासिद्धमित्यत एव न तु ने[illegible]त्यादिभिस्तन्निषेध उपपद्यते पूर्वत्रेति संग्राहक
मेव शंगग्राहिकयेव तु तत्तच्छास्त्रं प्रति तस्यासिद्धत्वमापाद्यते तेनापवादस्य पर
स्त्रत्यपवादत्वन्तत्रासिद्धत्वाभावेप्यन्यत्रासिद्धत्वम्भवत्येव असिद्धमिति सिद्धंनि
ष्पन्नं प्रवृत्तंसिद्धस्य प्रत्ययविधावित्यादौ तथा दर्शनात् तद्भिन्नमसिद्धमनिष्पन्नं
मप्रवृत्तम् यद्यपि लोकेऽनाहार्य्यज्ञानस्यैवाप्रवर्त्तकत्वं इदं तथापीह शास्त्र
प्रामाण्यादाहार्य्यशेषोपि शास्त्रप्रवृत्त्यावप्रवर्त्तौ नियामक इति बोध्यम् अत्र
कार्य्यासिद्धत्वेऽप्यत्र इत्याद्यसिद्धिः अदस्‌औ इति स्थिते परत्वान्मुत्वे तस्य सपाद
सप्ताध्यायस्थकार्य्ये दृष्ट्याऽसिद्धत्वेपि देवदत्तहन्तृहतन्यायेनाकाराभावेन परत्

Digitized by Panjab Digital Library | www.panjabdigilib.org

सनस्यादितिभावः दीर्घोकारस्य विवृततरत्वन्तु पाणिनिशिक्षानुक्तत्वान्नेतच्छास्त्र
प्रक्रियोपयोगीतिदिक् तस्य प्रयोगे सम्वृतत्वमानमाह अत्र प्रपन्नभेदाद्दीर्घा
भावः अत्रोद्देश्यसवर्णग्रहणं जातिनिर्देशेनाव्याख्यानात् अधिकारत्वे फलमा
ह त्रिपाद्यामपीति अन्यथायोगाधुडिमानित्यत्र घत्वजश्त्वानुनासिकेषु भष्भावा
नापत्तिरितिभावः वस्तुतो घत्वे कृते झषइति ढत्वापत्तिर्दोषः नच ततः परत्वाज्जश्त्वा
नुनासिकत्वयोस्तद्बाधेतिवाच्यम् विप्रतिषेधे परमित्यस्यपद्योद्देश्यत्वेन त्रिपाद्या
मप्रवृत्तेः पूर्वत्रासिद्धेनास्तिविप्रतिषेधोऽभावादुत्तरस्येत्यनेन तस्यापद्योद्देश्यत्वस्य
वबोधनात् अन्यथापरस्यासिद्धत्वे विप्रतिषेधस्तत्रस्य सिद्धत्वात्परिभाषान्तरामि ॥३
वास्यात् अधिकारपक्षे तेनाकर्षणापत्तेः अतएव [illegible] दभाष्ये नत्वमेवापादित
म् अधिकारत्वादेवष्टुत्वे धुटिसिद्धं वाच्यमित्यादि चरितार्थम् एवं च पत्रानुवृत्ति

Digitized by Panjab Digital Library | www.panjabdigilib.org

मेकस्यान्तत्वेपि कस्यचिदुच्चारणे सम्यक् स्पर्शः कस्यचिदीषदिति शिक्षाकारोक्ति
मनुभवं चानुसृत्य विवेक्तव्यम् प्रयतनमित्ति नपुंसके भावे ल्युट् प्रयत्नमित्यपि
पाठः नङन्तस्य पुंस्त्वात् तथा च शिक्षा स्वराणामूष्मणां चैत्याद्यनन्तरं अचोऽ
स्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः शलः स्मृताः शेषाः स्पृष्टा हलः प्रोक्ता इति अचो
ऽस्पृष्टा स्पर्शाभावरूपविवृतत्ववन्तः यणस्त्वीषदित्यनेन तेषामीषत्स्पृष्टत्वमी
षद्विवृतत्वं च बोधितम् नेमस्पृष्टं तेन शलामीषद्विवृतत्वं यणपेक्षयाधिकवि
वृतत्वं चेति बोध्यम् अत्र शिक्षोक्तव्याप्यधर्मवता व्यापकधर्मादाय न सावर्ण्य
मिति यणां च वर्गादिभिर्न सावर्ण्यं तेनाग्निचित्इत्यादौ न यादिः पालबर्णः वि
वृतमेवेति प्रक्रियादशायामविवृतत्वमतिदेशमित्यर्थः तेन दण्डाढकादौ
दीर्घसिद्धिः अन्यथा सम्वृतस्य ह्रस्वाकारस्य विवृतेन दीर्घेण सावर्ण्याभावात्

पञ्चोद्भिधेति क्वचित् पञ्च इत्येव पाठः चतुर्द्धेति प नुस्वाराणामूष्मणां चैव विवृ
तं करणं स्मृतम् तेभ्योपि विवृतावेङौ ताभ्यामैचौ तथैव चेति शिक्षावाक्याद्विवृ
ततरविवृतमयोः प्रतीत्या नाज्झलाविति सूत्रभाष्याद्रूष्मणामीषद्विवृतत्वस्यात्र
तीत्या चतुर्द्धत्वसंगतमिति तन्न नाज्झलाविति सूत्रेणा विवृतत्वप्रत्याख्यानामेषां
सवर्णसंज्ञानुपयुक्तत्वबोधनमित्याशयात् भाष्यमते तु सनुसत्त्रप्रयत्नाः
एवं चैदैतोरोदौतोश्च न सावर्ण्यप्रसक्तिः प्रयत्नभेदादिति बोध्यम् नाज्झलाविति
सूत्रमपि प्रयत्नभेदप्राप्तसावर्ण्याभावानुवादकं सत्स्यैव बोधकमत एव भाष्ये
तन्नाबक्तव्यमिति नोक्तम् स्पृष्टादीनामाभ्यन्तरत्वन्त्वोष्ठप्रभृतिकाकलकपर्यन्त
रूपस्थानगततत्तत्स्थानेषु जिह्वाग्रादीनां स्पर्शेषत्स्पर्शाद्यवस्थानसमीपावस्था
नरूपाभ्यन्तरकार्य्यकारित्वाद्वर्णोत्पत्तेः व्यवहितप्रागभावित्वाच्च बोध्यम् तन्नवत्ना

याज्ञिकाः कण्ठ्या वहाविचुयशास्तालव्या ओष्ठजावुपू स्युर्मूर्द्धन्या ऋटुरषा दन्त्या लृतु
लसाः स्मृताः जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठ्यो वः स्मृतो बुधैः ए ऐ तु कण्ठताल
व्या ओ औ कण्ठोष्ठजौ स्मृतौ अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा जिह्वा
मूलं च दन्ताश्च नासिकोष्ठौ च तालु च हकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम्
औरस्यं तं विजानीयात्कण्ठ्यमाहुरसंयुतम् यत्तु दन्तोष्ठादि समुदितं स्थानमिति
तन्न शिक्षायां दन्त्योष्ठ्याकण्ठतालव्यावित्यादौ तत्र भव इत्यधिकारविहितयतः
प्रत्येकमनुत्पत्त्यापत्तेः दन्त्योष्ठाभित्यादित्वसंगतमेव स्वाङ्गसमुदायस्य स्वाङ्ग
त्वाभाववच्छरीरावयवसमुदायस्य शरीरावयवत्वाभावात् एतेन दन्तोष्ठस्य
मतिरिक्तं स्थानमित्यपास्तम् अष्टौ स्थानानीति प्रतिज्ञाविरोधश्चेति दिक् सवर्णप्र
शब्देन विलक्षणार्थबोधो ऽपि लोके यत्नप्रयत्नयोः पर्यायतेति ध्वनयन्नाह प्र

तुल्य[illegible]देशप्रयत्नमितिवार्त्तिके किमास्योपादाने प्रयोजनमिति प्रश्ने प्रयत्नवि-
शेषणमास्योपादानमित्युक्त्वा तद्व्यावर्त्यत्वेन बाह्यप्रयत्नान् प्रदर्श्य यथा तत्ती
यास्तथा पञ्चमा अनुनासिकत्वमेषामधिको गुण इति भाष्ये तस्या बाह्यप्रयत्नत्वो
क्तेः तत्र नासिकाया आस्यशब्देन तत्रत्यप्रयत्नस्य च प्रयत्नशब्देनाग्रहणबोधना
त् नासिकाया आस्यबाह्येति वदतां मते तदग्रहणाभावाच्च अत एव बाह्यप्रयत्नौ पर-
कम्पामेऽनुनासिकानुह्रौ नादिनो हझषः स्मृताः ईषन्नादा यणो जश्च श्वासिनस्तु
खफादयः ईषच्छ्वासांश्चरो विद्यादित्युक्तं शिक्षायाम् नादेति संवारघोषयोरुप
लक्षणं श्वासेति विवाराघोषयोः नञ्चावित्युपलक्षणं त्वेचः सर्वस्य [illegible]
रस्य च अनुनासिक[illegible]स्यादर्शनादित्यलम् एदैतोरित्यादि लोकानुभवसिद्धाची
नुनादकेन तपरकरणस्यात्र वृत्त्या प्लुतानामपि तत्स्थानत्वम्बोध्यम् तथा च पाणिनी

३५

न० श्रो०
१६

परीक्षोपयुक्त कण्ठ विवरादि निष्ठ विकारादेरास्य वहिर्देशावच्छिन्न कार्यस्य जनकोयत्नो
गुण शब्देनोच्यते अकारादि निष्ठानुनासिकस्य भेदकत्वा गुणत्वेन व्यवहारस्त कण्ठाद्य
वच्छिन्न वायुसंयोगेनोत्पन्नो ऽनुनासिकावच्छिन्न वायुसंयोगेन तद्रूप धर्मोत्पत्त्या एव
चानासिकायास्तत्र गुण जनकत्वादनुनासिकारादीनां नासिकास्थानं नोक्त मन्तूले ए
कोपमात्सोदकं नाम तस्य गुण भेदादन्यत्वं भवति अन्यदिदं प्रीतमन्यदिदमुष्णमिति दृ
ष्टान्त परभाष्य एतदेव प्रतीतिः आत्मा त्र द्रव्यम् उदात्तत्वादीनां गुणत्व व्यवहारस्त
सावर्ण्यानुपयुक्तत्वान्तरतम्य परीक्षोपयोगित्व रूप साहश्येनेति बोध्यम् ञादीनां
तु [illegible] णारहित स्वरूपानुपलम्भेनोभयावच्छेदेन वायु संयोगोत्तर [illegible] स्वरूपोत्
त्या विनिगमनाविरहे णोभयोः स्थानत्वम् [illegible] तुल्यास्यमानां चेति शिक्षायां चेन ञादी
नामपि संग्रह इति युक्त मतएव कल्पाः कालः कड्.यो स्नाबर्ण्यानुभवत्येव आस्य

स्थेत्याद्यो गुण २

का ४

५३ १३

१५

कण्ठोज्ञवः कण्ठ्यः । इत्याद्युक्तो नासिक्या नासिकापमानुस्वारावित्ति
स्थानानीत्युक्तं प्रातिशाख्ये नासिकाड् ञणनमा

Digitized by Panjab Digital Library | www.panjabdigilib.org

युक्तदेशा इत्यर्थः अतोऽयमदन्तस्याप्युच्चारणं भवत्येव उश्चवश्चध्मावेते अनेनं त
त्रभव इति योगेनोपध्मानीयस्योष्ठत्वमित्याह उपूपेति रूढत्वाच्च न व्यवहारातिप्रसङ्गः
नासिकाचेति येनत्वत्व वर्णानुकूलं ताल्वादिगृह्यते अतएवैषामत्र तिशाख्ये नासिका
यामभव इत्यर्थे नासिकाशब्देन व्यवहारः यत्वनुच्चार्यमाणानाञ्च नासिकास्थानमिष्यते इ

वा ५

ति शिक्षोक्तेरेषां नासिकाकरणम् किञ्च स्थानत्वेकइः योऽस्तावर्ण्योनापत्तिः यावत्स्था
नैक्याभावात् यत्किञ्चित्स्थानैक्येन तत्त्वे कुम मामपि परस्परं सावर्ण्यापत्तिरिति तत्र

त ५

त्कण्ठादीनामपि करणत्वस्यैवास्यन्त्यनेन वर्णानिति भाष्यात्प्रतीतेः स्थानत्वव्यवहा
रस्तु वर्णाभिव्यक्तिजनकताल्वादौ वर्णजनकवायुसंयोगाधारे वर्णाधारत्वारोपेणात
तत्स्थाने नासिकायादिसम्बन्धेन वर्णोत्पत्त्या नासिकायादौ तत्सम्बन्धजनकप्रयत्नविशे
षेस्पृष्टतादौ च करणत्वव्यवहारः वर्णाभिव्यक्त्यनन्तरभावी सा वर्णानुपयुक्तः प्रयत्नानात्तस्य

Digitized by Panjab Digital Library | www.panjabdigilib.org

पितृघाऽकारादीनामुच्चारणेऽनुनेतिभावः कचयोस्तु न तालव्यत्वं तालव्यस्थानता-
स्याभावात् भिन्नस्थानघनत्वेऽप्यर्च्यापत्तेश्च अत्र कण्ठपदं कण्ठस्थानतत्समी-
पजिह्वामूलस्थानोभयपरम् तेन कण्ठ्या बहो तिह्वामूलेऽनुकुः प्रोक्ता इति शिक्षावा-
नविरोधः जिह्वामूलीयपदस्यच बलिविप्रोषेऽलदि रीतिव्यवहारातित्रलकुः अतए-
वायोगवाहेऽपि जिह्वामूलीयगलनमप्याश्च तत्तद्वर्णोत्पत्तेः प्रोक्ता न तत्स्थाना-
दौजिकास्पर्शाद्यनुभवेन तत्तद्वर्णानां तत्स्थानत्वनिर्णयेऽप्यकुहेत्यादिकथनं साधा-
रणधर्म्मबोधनायानुबादकम्
नत्वेतदेव कण्ठादिस्थानविधायकमिति
भ्रमितव्यम् विसर्जनीयपदेनात्रसाहचर्य्यादकाराश्रयस्य तस्य ग्रहणम् अतएवायो-
गवाहाविति पाश्रयस्थानभागिन इति शिक्षयानविरोधः दन्ता इति दन्त्याः लं

Digitized by Panjab Digital Library | www.panjabdigilib.org

त्वादेतौ स्त इति न । अत एव प्रयत्नशब्देन यत्नमात्रग्रहणमिति पक्षे यत्किञ्चित्प्रयत्नभेदे
यत्किञ्चित्प्रयत्नैक्यमादाय सवर्णसञ्ज्ञेत्यर्थो ऋतो ऋति सवर्णे इति सवर्णग्रहणेन स्थाप
केन साधितो भाष्ये तेन स्थानांशे यावत्स्थानसाम्ये इत्येव स्वारसिको ऽर्थ इति प्रतीयते न
च यावदास्यभवतुल्यत्वं विवक्ष्यते प्रयत्नग्रहणं न्यूनार्थं प्रयत्नस्याप्यास्यभवत्वादि
ति वाच्यम् ह्रस्वदीर्घयोः सावर्ण्यानापत्तेः तयोर्हि न कालमात्रास्यभवानां वायुसंयो
गानां तुल्यत्वात् तस्मादास्यभवानां कण्ठादीनामेव ग्रहणमिति बोधनाय तत्
सार्थक्यात् आस्येति किम् तेषां ऋतो ऋतीति त्यो पो मा भूत् प्रयत्नेति किम्
वा कश्चो ततिं छेतिकिम् शाद्भयोः श्वासाघोषविवारात्मबाह्यप्रयत्नसाम्येने(
तत्रैव दोषात् वक्ष्यति किंस्यो नाम इत्याकाङ्क्षायामाह अकुहेति यद्यपि सर्ववर्ण
र्णोच्चारणे कण्ठव्यापारः आवश्यकस्तथापि चकारादुच्चारणे तालवादिव्यापारो

Digitized by Panjab Digital Library | www.panjabdigilib.org

ना० शे०
१७
त

रोदनादौ चतुर्मात्रार्द्धमात्रादीनामनुपलम्भेपि शास्त्रीयकार्येऽनुपयोगाभावाल्लोके प्रयोगे
षप्रयोगाच्च नोक्ताः अतएवानुदात्ततरस्यानुक्तिः एकश्रुतेः स्वातन्त्र्ये इदमनुपलक्षणम्
तस्या लोकेपि सत्त्वात् तुल्यास्य तुल्यावास्यप्रयत्नौ यस्येत्यर्थः आस्येभवमास्यम् व्या ख्या
नोच्चवर्णोपयोगित्वात् स्थानमेव प्रयत्नस्य दृष्यनुपादानात् प्रकृष्टोयत्न आभ्यन्तरः
तस्यावर्णोत्पत्त्यव्यवहितप्राग्भावित्वरूपप्रकर्षवत्त्वात् जनकत्वं षष्ठ्यर्थः तत्तत्कार्यंग
तभेदस्यानेपारोप्यभेदघटिततुल्यत्वस्यनिर्वाहः स्पष्टं चेदं भाष्ये तदाह ताल्वादीति शि
क्षायां कण्ठादीनां कण्ठत्वादिनैव स्थानत्वोक्त्या तद्रूपेणैवास्य भवशब्देन ग्रहणमिति तद्भागभे
दमादायनोदात्तादिषु तावत्यभङ्गः इति बोध्यम् यस्यैतद्रूपं येन यदीयेनैतद्रूपेण तुल्यमित्य
र्थः मनुष्येकेषामिति निर्द्दिश्य यावदास्यभवं तुल्यत्वं ग्राह्यम् अतएवैचोः सावर्ण्यमाशङ्
क्यनैतौ तुल्यस्थानाविति भाष्ये समाहितम् अतएव वर्त्लयोर्न सावर्ण्यं नेन तत्स्थानासामि

१७

Digitized by Panjab Digital Library | www.panjabdigilib.org

बचनः बाहुलकात्कर्म्मणि ल्युट् मुखसहिता नासिकेति विग्रहः तथा च बचन इतिसा
धनं तत्र कृतेति समासस्तदाह मुखसहितेत्यादि मुखेति किम् यमानुस्वाराणामेव ग्रस(
ज्येत एवं चाङोऽनुनासिक इत्यत्रानुस्वारः स्यात् नासिकेति किम् श[illegible] त्र इत्या[illegible] दावनु
दात्तोपदेशेत्यादिना कलोपो [illegible] मा भूत् [illegible] दशेति यद्यपीदं नव्यक्तिपक्षे व्यक्तीना
मानन्त्यात् तथाप्यष्टादशधर्म्मवत्त्वमकारादीनामादेरित्यर्थः ऋत्वेत्यादिना ता
त्तत्समानाधिकरणोदात्तत्वानुनासिकत्वादीनां च भेदमादाय [illegible] त्वेदम्बोध्यम् एव
मग्रेपि लवर्णस्ये ति विवृतस्येत्यर्थः तेन लृति ल्वेति विधेयस्येषत्स्पृष्टत्वे दी
र्घत्वेपि न क्षतिः दीर्घाभावादिति अत एव तुल्यास्यप्रयत्नेभाव्ये लृतिसवर्णे इ
त्यनेन पक्षे द्विलकारकाभावेऽकः सवर्णे इति दीर्घत्वे होतॄकार इति ऋकार [illegible] घ
टितप्रयोगः संगच्छते ऋत्वाभावादिति इदमेवाभिप्रेत्य इत्यादौ भाष्ये स्पष्टं गान

Digitized by Panjab Digital Library | www.panjabdigilib.org

वेदेनुपयोगाग्रयोगमर्थ्रातिशाख्यादस्माच्चव्यवस्था तस्यचेति अनुदात्तस्येत्यर्थः उदात्ते
ति उदात्तस्वरितयोः परत्वेसतीत्यर्थः तयोः परत्वेवोपस्थितानुदात्तापेक्षयैव अन्यत्र
उदात्तस्वरितयोः परत्वाभावे प्रातिशाख्येइति लोकेत्वनुदात्त एवेतिभावः ह्रस्वस्वरितमु
दाहरति क्वेति किमोऽदित्यत् क्वातीति क्वादेशःति त्वस्वरितमितिस्वरितः दीर्घनानुदाहरति
रथानामिति येषामिति स्वरितोवानुदात्तेपदा[illegible]दावित्येकारः स्वरितः नोदात्तस्वरितो
दयमनतिनिषेधसूत्रात्तादनुदात्तस्यस्वरित इत्यस्येवानन्तरस्येति न्यायात् स्वरित
परमुदाहरति शतचक्रमिति अहेरित्यर्थःऽध्यः बव्हस्येत्यर्थः छन्दसीवावचनंश्राऽ
लोचश्छुपधायाइतिवचनान्नुगाभावः उदात्तस्वरितयोरिति स्वरितउदात्तयलोह
ल्ह्स्वौदितितुनच्छान्दसत्वात् पञ्चमः किमर्थ इत्यन्नोदात्तत्तदेकादेशाश्ववास्वरि
तःसइति उदात्तादिकस्वादिसंज्ञकइत्यर्थः मुखनासिकावचनइति उच्यतेःसोव

Digitized by Panjab Digital Library | www.panjabdigilib.org

६३

पाच्युदः फिषोऽन्त उदात्तः अस्तुस्वादनुदात्तः एकादेशउदात्तेनेत्येकारउदात्तः
अर्वाङिति आभिमुख्यवाच्य सुत्यन्नाम् फिषोऽन्त इत्यन्तोदात्तम् आद्यस्य शेषानिघा
तेनानुदात्तत्वम् अन्तम अव्ययीत्यर्थे तेऽउत्तरपदप्रकृतिस्वरे ग्रावानोदात्तत्वम् एकस्मि
न्नच्युदात्तानुदात्तेयोर्धर्मिणोर्मिलनविरोधादाह वर्णधर्मा विति बाहुलकादेधिकर
णोघम् अर्धाश्रयतीत्यन्ये इयंत्रिस्वरीस्पष्टार्था लोकवेदयोरुदात्तादिव्यवहारस्यप्र
सिद्धत्वात् कृत्स्नग्रहणमिति कृत्स्नपदघटितग्रहणमित्यर्थः अतन्त्रमिति स्वरशास्त्र
संकेतितरूपेणाबोधकमित्यर्थः किन्त्वर्द्धमात्रा रूपार्थबोधकमितिभावः एव(
स्वदीर्घादिष्वप्यर्द्धमात्रे वोदात्ता इत्यारभ्य नवस्त्वा अन्त्यरत्यतः प्रागुक्तकर्णस्य
त्रिपाद्यामपि नवतिः सर्वत्रेदं भाव्यस्यष्टम् अर्धमुदात्तमिति वत्तिस्तुसत्या
सत्यभामेतिवद्व्याख्येया उत्तरार्द्धमित्यस्य चार्द्धमात्रातो विशिष्ट उत्तरोभाग इत्यर्थः

Digitized by Panjab Digital Library | www.panjabdigilib.org

वीरः स्यात्ति तदुच्छत्रमित्यत्र दीर्घात्पदान्ताद्वेति तुगापत्तिरिति वाच्यम् ज्ञापकसिद्ध
त्वेन तस्या सार्वत्रिकत्वात् अन्तरङ्गत्वेन छत्वनिमित्तनित्यतुक एव प्राप्तेश्च
अन्तरङ्गं ग्रहणं प्रत्यक्षेत्यादौ छत्वस्येति तुग्व्यावृत्त्यर्थम् उच्चैरुदात्तः नात्र श्रुतिकृतमुच्चैस्त्व
मुपांशुप्रयोगेऽव्याप्तेः श्रुतिप्रकर्षस्याव्यवस्थितत्वाच्च किन्तु स्थाने कृतमुच्चैरित्य
धिकरणप्राप्तिप्रधानमधिकरणत्वं चोच्चारणस्याति तच्च ताल्वादीनां सभागत्व
एवेत्याशयेनाह ताल्वादीति इदमाचार्यमनुरोधेन वर्णसमाम्नायेऽकारस्यप्रा
यम्यात् कण्ठादीतिवक्तुमुचितम् एवमन्यत्रापि बोध्यम् उपलब्धेरितो वायुरूर्ध्व
देहभागे प्रतिहतो चन्म्यस्तं जनयति तदासउदात्त इतिभावः नीचैरिति ऊकालो इत्यतस्तद
नुवर्त्तते उदात्तत्वादीनामज्धर्म्मताया एव लोकप्रसिद्धत्वेन हल्स्वरप्राप्तौ व्यञ्जन
स्याविद्यमानत्वाच्चेदंस्वरूपकथनपरम् बोध्यम् आपेशति पच्छष्टः फिषोन्त इत्यन्तो

Digitized by Panjab Digital Library | www.panjabdigilib.org

समाम्नायेप्रसिद्धेः प्रत्याहारेष्वितामित्यनुपपन्नमत आह आदिरन्त्येनेतीति वा
र्त्तिके तादर्थ्यात्ताच्छब्द्यमिति भावः ऊकालोऽच् कुक्कुटरुते उकारस्य एकद्वित्रिमा
त्रत्वप्रसिद्धेरकारादयो नोक्ताः इति एकद्वित्रिमात्राणां क्रमेण प्रश्लेषनिर्देशाः
व्याख्यानात् तेन त्वोच्चारणकालसदृशो लक्ष्यते स कालो यस्येति बहुव्रीहिस्तत्फलि
तमाह उ ऊ ऊ३ इति ननु ऊकालोऽच् ह्रस्व इति वाक्येन त्वात्सवर्णग्रहणाद्द्वित्रिमात्रयो
रपि ह्रस्वसञ्ज्ञायां प्रदायल्लूयेत्यादि ह्रस्वस्येति तुक स्यादिति चेन्न ऊ अजित्येवाग्रह
णसामर्थ्याद्दूसदृशो ऽजित्यर्थलाभस्य व्याख्यानात्कालकृतस्यैव ग्रहणमिति
सिद्धेः अधिककालग्रहणमुच्चारितसम्बन्धिकालसदृशकालकस्यैव सञ्ज्ञा ननु
तेन गृहीतसम्बन्धिकालसदृशकालकस्यापीत्यर्थेनादोषात् तदुक्तम्भाष्ये
यावत्परकालं तावदेव कालग्रहणमिति न चाजिति वर्णग्रहणे जातिग्रहणस्य तु

Digitized by Panjab Digital Library | www.panjabdigilib.org

त०बो०

१४

पूर्वोक्तव्यतिरिक्तः तन्मध्यवर्तीरकार

अन्योपि तज्जातीयश्चिन्त्य एव एकाच उपदेशे उपदेशेऽवृत्त इत्यादौ तु भावसाधनः
एवेति स्वधियो विभावयन्तु इत्याहुः ननु शास्त्रेऽनुनासिकोच्चारणाभावात्तत्त्वज्ञानं दुर्लभ
मत आह प्रतिज्ञेति प्रतिज्ञाविषयाऽनुनासिक्यवन्त इत्यर्थः पाणिनीया इत्यस्य पाणिनिप्र
भृतिप्रोक्ता वर्णा इत्यर्थः प्रतिज्ञा चाप्यमेवेति कल्पनं वर्णानां तत्त्वज्ञापको व्यवहारश्च ताभ्यां
तज्ज्ञानं सुलभमिति भावः प्रतिज्ञाता रश्च प्रत्यासत्त्यैतच्छास्त्रकर्तार एवेति दिक् निर्देशादि(
ति तेषां तद्ग्रहणेऽपि हि नासिकादौ पदाप्रवृत्तिरिति भावः न चेत्त्वविधानसामर्थ्या घ्राणाभावः
सिद्धः तस्यापि प्रत्याहारेष्वनुबन्धाग्रहणज्ञापनद्वारैव पराभावकल्पकत्वौचित्या
त्साक्षाच्छास्त्राबाधकल्पनापेक्षयाऽन्त्यार्थस्यौचित्यात् निर्देशादित्यस्य तन्मूलभू
तेत्त्वविधानसामर्थ्यादित्यर्थ इति तात्पर्यम् आदिनात्त्वविमर्षविह्वबिरेकः पूर्वेत्यादि
संग्रहः ननु प्रत्याहारेऽनुबन्धानां कथमग्रहणं सो बुनेति वार्तिके प्रत्याहारशब्दस्य वर्ण

प्रकरणोऽन्यसम्व न्धसत्वा प्रत्याहारि ताभेत्यर्थः कांप्यप्र काशः प्रकरणादीनां विशेषस्मृतिहेतुत्व मिति भावः ५

Digitized by Panjab Digital Library | www.panjabdigilib.org

त्तिहीत्सम्भ्रोच्यतेइति एवञ्चेत्वदुक्तिर्व्याहतेत्याशयः तदग्रेउपदेशपदानुवृत्तिमभिप्रे
त्यापवातानुत्पन्नेसतिप्र कृत्याभवितव्यम् यदावोत्पन्नास्तान् तदातत्कृतसा
मर्थ्यापन्नमेतिप्रकृत्मिर्न्नभविष्यति इतिसमाधानान्तरंकृतम् तत्रपरत्वविशिष्ट
स्यसनउत्पादनेपञ्चम्याउपक्षपात्स्वत्वस्यान्तराभावान्नात्तितस्याः प्रकल्पकत्वमि
तितदर्थकैवरश्चाह एवंचप्रकृतसूत्रस्य स्यसूत्रार्थेप्रतिपादपिवपात्रवत्तस्य
भाष्यवार्त्तिकस्यैकदेशयुक्तितन्त्राभाष्यबलेन प्रौढिवादकल्पनं नोचितं लाघ्याविद्धि
प्रव अरउलित्यादीनामपिक्रमवोधकत्वेनार्थवत्त्वात् प्रातिपदिकत्वेचित्रङ् (
श्वोः कुरित्यादेरप्राप्रातिपदिकत्वम् लोपश्चेत्यत्रापिशकारस्यत्वक्षपेताद्र्थवत्त्वा
त्प्रातिपदिकत्वमनुबन्धानामेकान्तत्वेतुलोपोपीत्यतोलोपग्रहणेऽनुवर्त्तमानेपु
नर्लोपग्रहणात्सर्वादेशत्वम्बोध्यं एकाचउपदेशाइत्यत्रत्यः कैयटोपिचिन्त्यएव।

ग्रन्थेसत्वमवः

चिन्त्यएवेत्याशयः
प्रमादत्सवतित्वेम
वसतोचिन्ताविषय
त्वमितिभावः १

Digitized by Panjab Digital Library | www.panjabdigilib.org

ल० शे०

१३

परत्वानवकाशत्वाभ्यां पञ्चमीनिर्द्देशो बलवानिति सिद्धान्तिनोक्तम् तत एकदेशिना
पञ्चम्यर्थं वा षष्ठीनिर्द्देशः कर्त्तव्य इति समाधानान्तरमुक्तम् यथाविषयम्प्रागुक्तेषु का
र्य्यिणः षष्ठ्या निर्द्दिष्टत्वादिति तदर्थः तेषु सप्तमीनिर्द्देशस्य क्वचित्पूर्व्वत्र क्वचित्परत्रा
वश्यकत्वेनोभयनिर्द्देशो गौरवमित्येवैकदेश्युक्तिः ततः परेणैकदेशिना षष्ठीपक्षानुव

ल५

र्त्तनात्स्थानिनि त्यादेरेव षष्ठीप्रकॢप्तत्वमाश्रित्य पञ्चम्यर्थत्वात्षष्ठ्येकदेश्युक्तिः प्रत्याख्या
ता षष्ठीपक्षानुवृत्तौ गौरवादुभयोः प्रकल्पकत्ववारणाय परत्वानवकाशत्वयोः
एकः पूर्व्वपरयोरिति पूर्व्वपरग्रहणस्य युगपत्प्रकल्पकत्वाभावे ज्ञापकत्वं चावश्यक
त्वाच्च पक्षयोरप्येकदेश्युक्तिः ततः पूर्व्वेणैकदेशिना तस्य स्थानेऽगुणवृत्तिजित्यादौ दोषः श
ङ्कितः ततः षष्ठीप्रकॢप्तिवादिनैकदेशिनोक्तम् स्यादेष दोषो यदीत्संज्ञा आदेशस्य
तीक्षेत तत्र खल्वलुक्तायामित्संज्ञायां लोपे च कृते आदेशो भविष्यति उपदेश इ

१३

Digitized by Panjab Digital Library | www.panjabdigilib.org

ष्येप्रत्याख्यातम् अत्राधोच्चारणार्थकोपदेशपदानुवृत्तौ तस्य वार्त्तिकस्यानुत्थान
मेव स्यात् उद्देशोऽस्य प्रातिपदिकानां नोपदेश इत्यादेश्च इति सूत्रभाष्ये उक्तेः एतद्भा
ष्येकवाक्यतापादस्य शाङ्किकान्तस्य ऽग्रहणं प्रातिपदिकानामनुपदेशः कर्त्तव्यः म
ध्यको मन्त्रक इति मा भूदिति भाष्ये उपदेशशब्दो ग्रहणं कर्त्तव्यमित्यर्थकः तच्चानु
वादरूपमेव सन्देहनिवर्त्तकमिति बोध्यम् न न्वेवं तस्मिन्निति निर्दिष्ट इति सूत्रे
षष्ठीप्रकल्पकत्वं तस्येति पक्षे गुप्रतिजूकिद्भ्यः इत्यादावपि षष्ठीप्रकॢप्त्यापत्तिः
नच सतः सन्नेवादेशो न विध्यतीति बाधकाभाव इति वाच्यम् उपदेश इत्यनुवर्त्य
माने तस्यानवप्रकल्पेते तु क्तभाष्ये तद्विरुध्येत तत्रोपदेशपदानुवृत्तावि
ति चेन्न तस्यैकदेशयुक्तित्वेनासाधकत्वात् तथाहि तत्र ङमो ह्रस्वादचीत्यादौ
पञ्चसप्तमी पञ्चमी च तस्मिन्नपि निर्दिष्टे ते तत्र किं पूर्वस्य कार्यं मयवापरस्येति सन्देहे

Digitized by Panjab Digital Library | www.panjabdigilib.org

लौ॰ शे॰
१२

नसूत्रार्थमित्युक्तं नच करणसाधनोपदेशशब्दानुवृत्त्या सिद्धे हल्यन्त्यमसृज्ये व्यवस्थि
तान्त्यमिति वक्तव्यं के पुनर्व्यवस्थिता धातुप्रातिपदिकप्रत्ययनिपातागमादेशा इ
ति वार्त्तिकाद्यनुत्थानमिति वाच्यम् समुदायशक्तावयवस्याप्युपदेशकारणत्वा
त्तदन्त्यस्यापि लोपापत्तिरित्याशयात् भाष्यकृता चान्त्यग्रहणसामर्थ्येन प्रत्याख्या
तम् तत्रानुबन्धविशिष्टानां धातुत्वादितु॰ धातुत्वादियोग्यघटितत्वाद्बोध्यम्
निपातानां द्योतकत्वेन ब्राह्मणवशिष्टन्यायेन च पृथग्ग्रहणम् व्यवस्थितत्वं च
धातुत्वादिनापरिच्छिन्नत्वादिति कैयटः एवं चोदश्विदादिप्रातिपदिकान्त्यस्यापि
लोपः प्राप्नोतीति प्रातिपदिकानां प्रतिषेधोऽकृत्तद्धितानामिति वार्त्तिककृतो॰
क्तम् कुम्भकार इत्यादावपवादविषयपरिहारेणोत्सर्गप्रवृत्तेः पूर्वस्मादिति पदि
कत्वेनादिलोपो न स्यादिति अकृदित्यादि तच्च फलाभावान्नेत्संज्ञेत्यादिना भा

यथा ब्राह्मणा आनिय
न्तां वशिष्टोऽपीति
ब्राह्मणेभ्यो वृषिष्ठ
स्य पृथक्त्वमिति न्या
यशरीरम् ५

वा॰ भा॰ ३
१२

लौ ३

Digitized by Panjab Digital Library | www.panjabdigilib.org

र्भवति येन स विशेषः क इति चेत्सः तत्संग्रहार्थमेव लोकव्यवहारेणापितयोः संकी
र्णत्वमुपपाद्येत तद्व्यावर्त्तये तत्संग्रहाय चोपदेशेऽजनुनासिक इति वक्तव्यम् किं
पुनरुपदेशनं शास्त्रमित्युक्तं वार्त्तिककृता तत्र शास्त्रपदेन प्रयोगशासनकरणम
त्वाधातुप्रातिपदिकप्रत्ययनिपातागमादेशा हलन्त्यसूत्रे व्यवस्थितपदार्थत्वेन भाष्य
उक्ता गृह्यन्ते एवञ्च तत्संग्रहोऽत्रत्या इत्येतद्व्यावर्त्तिश्च विसिद्धा तस्य वार्त्तिकस्य बाहु
लकात् करणे घञ प्रत्याख्यानं भगवता कृतम् किञ्च हलन्त्यसूत्रे भावघञन्तो
पदेशपदानुवृत्तौ भवतष्ठकछसावित्यादिविहिते घित्संज्ञानापत्तिः प्रत्यय
त्वेन कादेरन्त्यत्वाभावात् यदि तूपदेशे प्रत्ययत्वादिविशिष्टान्त्य इदित्यर्थ उच्यते
तदोपदेश इति व्यर्थम् अन्यपदसामर्थ्येनैव तल्लाभात् अत एवात्र सूत्रे उपदेश
ग्रहणात्प्यानुबन्धा अनेकान्ता इत्यास्थितपक्षेऽत्रत्या आदिति इति प्रयोजनमुक्तं

Digitized by Panjab Digital Library | www.panjabdigilib.org

चारणवचनउपदिश्यिर्गृह्यते इति आदेचइति सूत्रेपिचेषां स्वरूपज्ञापनायाहूर्वमु
चारणं तेषामेवोपदेशव्यवहार इति तत्रसूत्रेभाष्येपि उद्देशश्च प्रातिपदिकानांनो
पदेश इति प्रकृतसूत्रेभाष्येपि तत्पक्षमाख्यानमुद्देश इत्युक्तम् तस्यचोक्त एवार्
थः परेतु उपदेश इति किमर्थमभन्नमाख्यानमृपः कः पुनरुद्देशोपदेशयोर्विशेष इति
भाष्यउक्तम् प्रतिप्रत्यक्षमाख्यानमुपदेशो गुणैः ज्ञापनमुद्देशस्तर्हि लटः तद्वा
निष्टेतिविहितानांशानशानचक्तक्तवतूनामवयवस्येत्संज्ञानापत्तिः तथातत्र
स्वरूपस्य विसर्गिचित्येचेत्यादिनिपातनानुमितवचनादीनां यादेरित्वानापत्तिः व
दः सुपीत्यत्रोच्चारितस्तुनेतत्सम्बन्धी अत एवतस्यापत्यमतइञितित्यादेरन्यस्य
वत्सम्बन्धापत्यार्थस्यानुकृत्स्वरूपंशेषत्वमुक्तमाकरे तस्मादत्र सूत्रेउपदेश शब्देनो
द्देशस्यापि ग्रहणं वक्तव्यमेवं वान्तरंगांइत्यादावपि प्राप्नोतीतितेषां संग्रहोप्यावृत्ति

Digitized by Panjab Digital Library | www.panjabdigilib.org

अत एव वुञ्छण्कठजिति सूत्रविहितकेत्तित्त्वप्रयुक्ता वृद्धिर्न तस्य लोप इति भाष्ये ए
कान्तत्वमेव न्याय्यमित्युक्तं स्थोपदेशो जिति सूत्रे उपदेशग्रहणं स्वरूपार्थमेवेत्याहुः स
र्वत्रानुबन्धसहितनिर्देशो विधौ गुणवृत्तिन्न किदित्यादौ नकारेत्संज्ञकः सो भवतीत्यादिक्र
मेण बोधः अनुवादे सत्यत इत्यादौ च नकारेत्संज्ञके सप्तमी परे इत्यादिक्रमेण बोधः
स्पष्टं चेदं निष्ठासंज्ञासूत्रे भाष्ये अत एवाटश्चेत्यादेर्नासङ्गतिः अन्यथा यत्राट
तत्र ६ सूत्रेणाच्परो नेष्यते च तत्र वृद्धिः यत्र प्रयोगे इष्यते वृद्धिस्तत्र नाडिति तदसङ्गतिः
स्पष्टैव अन्त्यं किम् वाचालः हलः किम् चिरिणोतीत्यादौ धातोरन्त्यस्य माभूत् ।
आद्योच्चारणमिति आद्यमुच्चारणमित्यर्थः भावे घञिति भावः तच्च प्रत्यासत्त्यैत
स्व २ च्छास्त्रप्रवर्तकाचार्याणामेवाद्यत्वं चाद्यानां तत्स्वरूपज्ञापकत्वम् उपस्थापकत्वाद्द
शोच्चारणक्रियत्वात् अत एवैकाच उपदेश इति सूत्रे कैयटेनोक्तमित्यस्याविधावु

उपादिविहितत्वा
नो नकारस्येत्सं
ज्ञकत्वे सत्युपदे
श इति भावः ३

अनवयवा ह्येकान्तास्तत्कदाचित्तत्रोपलभ्यत एव अयं तु न तथा तदर्थभूते विधेयेक
दाप्यदर्शनात् हलन्त्यमित्यत्रान्त्यशब्दः परसमीपबोधकः चुटू इत्यादावादिशब्दः स्व
समीपबोधकोऽनेकाल्शिदित्यादौ समीपे सामीप्यमूलकावयवत्वारोपेण बहुव्रीहिः स्प
ष्टं चेदमनुपदेशेऽजिति सूत्रे भाष्ये मपर्यन्तास्येति सूत्रे कैयटे च तेन डाललादाविशादौ च न दो
षः अत एवोपदेशेऽजिति सूत्रे उपदेशग्रहणं चरितार्थम् तद्धि अभ्र आ अदित इत्यादावा
दितश्चेतीट्प्रतिषेधाभावाय अनेकान्ता ह्यविहितत्वाद्गिरित्याहुः परे त्वेकान्ता एव शास्त्रे तत्रो
पलम्भादन्यत्रानुपलम्भाच्च अनवयवा हि काकादिरेकजातीयसम्बन्धेन गृहवृ
क्षादिरुपलभ्यते नैवमयम् किञ्चानवयवत्वे नैशाकत्रत्यपादौ लादेशत्वानुप
त्तिः प्रत्ययादित्वाभावात् एवमन्त्यत्वाभावादिष्टादेशस्यैत्वानापत्तिः उक्तार्थे
लाक्षणिकत्वे लक्षणैव दोषः किञ्चैकाच्चकारवैवर्थ्यापत्त्यावयवत्वमेवभ्यो
प्यम्॥

णित्यादेर्णादीनां हल् प्रत्याहारलिङ्गुत्वं तत्सिद्धिः अन्यत्र त्वन्त्यटकृत्वात्प्राय उच्चारणो ना
भिव्यक्तस्य तदव्यवधाने नैवेत्सञ्ज्ञा पदार्थोपस्थितिरनुबन्धविनिर्मुक्तस्यैव उपदे
शोत्तरकाले त्सञ्ज्ञेति नाज्झलाविति सूत्रे भाष्यात् धुडित्यादौ सानुबन्धाद्विभक्तिस्त
तेनैवानुबन्धविनिर्मुक्तो स्यैव उपदेशोत्तरकालेत्स पस्थितेस्तस्यैवार्थवत्त्वात्सुलभा इत्स(
ञ्ज्ञाकार्य्यन्तु यत्र सञ्ज्ञा तत्रानर्थकात्तदुपस्थाप्यएव स्पष्टं चेदं तित्स्वरितमिति सूत्रे कैयटे वे(
याकरणोच्चितत्वरक्षन तस्येच्चकारसदृशत्वेपि तत्त्वाभावात् विभक्त्यादिसञ्ज्ञापि सूत्रान्तर्गता(
नामेवेति तत्रैव न विभक्ताविति त्यादीनामप्रवृत्तिः अतएवेदमेड् श्रित्यादावपत्वात्सवर्णग्रहणं(
श्राप्तमत्रत्यय इत्यनेन न निषिध्यत इति भाष्योक्तं संगच्छते यत्त्वनेकाल्त्त्वेइशिशिग्रहणा
भावेपि शित्करणादेव सर्वादेशत्वमिति भाष्य उक्तम् तस्येत्सञ्ज्ञकशकारकरणाद्भूतपूर्वा
नेकाल्त्वमादाय सर्वादेशत्वमित्यर्थ इति न तद्विरोधः अत्र केचिदनुबन्धा अनेकान्ताः

Digitized by Panjab Digital Library | www.panjabdigilib.org

सि०कौ०

६

त् नचान्त्यस्ये तिसञ्ज्ञालोपाभ्यामपहारादिरन्त्येनेत्यसङ्गतिः सूत्रेष्वित्सञ्ज्ञायामपि
इगादिशब्देषु तदभावात् अन्त्येनेत्यस्य पदन्त्यसदृशेनेत्यर्थात् व्यक्तिपक्षे एवमेवो
चित्यात्सादृश्यमूलिकैव चात्रवत्यमित्ये त्याहुः अचिश्नुधात्विति सूत्रे इणइत्येवसि
द्धे य्वोरिति निर्देशादित्यपरे लोवेति त्वारस्त्रे भाव्येस्यपथम् हलन्त्यम् अत्र पदद्वयम्
समासेन्त्यशब्दस्यपूर्वनिपातापत्तेः कर्मधारययोग्यपदानां समासाभावस्यसूत्र
कारशैली सिद्धत्वाच्च यद्यपि सर्वोपि हल् तं तं समुदायमत्यन्त्यो भवति तथाप्यन्त्य
पदोपदेशपदाभ्यामत्यासत्त्या तात्त्विकत्वे रूपज्ञापकोच्चारण विषयसमुदायं प्रत्य
न्त्य इह गृह्यते अत एवमकारे तत्सञ्ज्ञा परित्राणार्थस्य मोरूकारस्वरितार्थः समुदा
योपदेश एव सर्वत्रस्वरूपविवक्षितात्पर्येणावयवानां नान्तरीकतया तेषामज्ञातस्वस्वरू
पज्ञापकत्वाभावात् उपदेशेन्त्यमिति तत्रविद्यमानमन्त्यमित्यर्थः तेनाइउ

६

एवमादिशब्देन परेषामाक्षेपादिग्रहणं प्रत्याहारेष्वादीनां ग्रहणं मा भूदित्यन्वेनेति
उभयोपादाने तु न दोषो लोके अपमादिरन्तो वेत्युक्ते वशिष्टमपि किञ्चिदस्तीति नि
यमेन प्रतीतेः परस्मिन्नसति पस्मात्पूर्वो नास्ति ॥ स आदिः पूर्वस्मिन्नसति यस्मात्प
रो नास्ति सोऽन्त्य इति लक्षणस्याव्यापकत्वे अकारादिग्रहणे इकारणकारादीनां
माद्यन्तत्वस्यैवानापत्तेः अत्राद्यन्तपदाभ्यामवयवत्वेन बोधकाभ्यां स्वघटितः
समवाय आक्षिप्तस्तस्मात्तस्य च लक्ष्ये प्रयोगाभावात्त्वकं सञ्ज्ञित्वमन्त्यस्य
तु न तत्कार्यं न तस्य तत्सञ्ज्ञा लोपाभ्याम पहारात् एतत्कलितार्थकथनमेव भाष्य
मूले चतस्वस्य च रूपस्येति स्वमित्यनुवर्त्तिपरत्वेन व्याख्यानं तु हेयमेवानुवृत्तौ फ
लाभावात् इतेति किम् अमङ्गणनेति णकारादिभिः प्रत्याहारो मा भूदिति सहग्र
हणाच्च समुदायवएवलभ्येति समुदायादेः वेक इत्यादौ विभक्तयुत्पत्तिः नादिमात्रा

Digitized by Panjab Digital Library | www.panjabdigilib.org

यमर्थः यण्णां न सम्प्रसारणोऽइति वचनात् यणस्य यणः पूर्वं सम्प्रसारणं पूर्वस्य
तु तन्निमित्तः प्रतिषेध इति अभ्यस्त संज्ञात्सूत्रे के यदस्तान्न न सम्प्रसारणेऽइति
सूत्रस्य भाष्यवितेधात् तत्राहि एतदेवज्ञापयति परस्य न पूर्वस्येति यण्णां सम्
प्रसारणाभ्यपस्य प्रतिषेध इत्याद्युक्तम् नहि न्यायेन सिद्ध एवमुक्तिः रचिता
तस्मान्न्यायस्यमनुक्तः एवविषयइतिबोध्यम् यथा पूर्वाऽपवादवाक्यार्थान्विना
नोत्सर्गवाक्यार्थः इति तदर्थस्तदपि न उक्तयुक्तेः नविभक्तौ तुस्माः इति शा
स्त्रपदार्थज्ञानमात्रेण पादीनामेतद्विषयत्वाभावबुद्ध्यातेषु हलन्त्यसूत्रप्रव
त्त्याकपतिङ्रूप विभक्ति पदार्थ ज्ञानं तुलभमिति दिक् अत्राप्युपदेश इ
ति सम्बध्यते तद्‌फललभ्यमाह सूत्रइति आदिरन्त्येन ओदितिति किम् अन्य
थावेन पूर्वेषामास्येपादिगादिप्रत्याहारेऽकारादिग्रहणं मा भूदिति रलमाद

आचार्याद्विविधाः लक्ष्यैकचक्षुष्काः लक्षणैकचक्षुष्का इति लक्ष्यावलोकनपूर्वकं तत्तल्लक्षणानि ये दधुस्ते पाणिन्या-
दयः ये लक्षणज्ञाता लक्ष्यसाधनं कुर्वन्ति ते लक्षणैकचक्षुष्का अस्मदादय इति व्यवस्थया ह लक्षणैकेति १

पृ॰ वा ३

लक्ष्यसंस्कारं नि लि
पत्वाद्विषयं तत्शास्त्र
स्य तत्र इ ४

लक्षणैकचक्षुष्कस्य तु उद्देश्यतावच्छेदकावच्छिन्ने सर्वत्रोत्सर्गकृतसंस्कारबुद्ध्या
उत्सर्गापवादयोर्विषयव्यवस्थानापत्त्या भुक्तवन्तम्प्रति प्रयुङ्क्ते इति
वाक्यस्यैवादशास्त्रविषयत्वापत्त्या च पूर्वमपवादशास्त्रपर्यालोचने न तद्विष
यविषयवाक्यापहावधारोत्सर्गेण संस्करोति अन्यथा विकल्पापत्तिरिति यथ
पि भुक्तवन्तं प्रतीति न्यायो लुगादिना जातनिवृत्तौ व्यभिचरित तथापि तत्राप्यनु
त्पत्तिरेवेति न दोषः न्यायानङ्गीकारे पि विकल्पापत्तेः तत्त्वाच्च अभिनिविश
न्ते इत्यस्य बुध्यालक्षणानवतीत्यर्थः लक्ष्यैकचक्षुष्कास्तु तत्तच्छास्त्रपर्यालो
चनं विनापि अपवादविषयम्परित्यज्योत्सर्गेण लक्ष्यसंस्कारं जानीते तस्या
पि शास्त्रप्रक्रियास्मरणपूर्वके प्रयोग एव धर्मोत्पत्तेः तदुक्तम् प्रकल्प्यवा
पवादविषयमुत्सर्गः प्रवर्तते इति प्रकल्प्य परित्यज्य यत्तु प्रकल्प्येवेत्यस्या

Digitized by Panjab Digital Library | www.panjabdigilib.org

पा० १०
१

न्यषष्ठ्यासमासेोन्त्यशब्दस्यचहलान्तो रूपमात्तस्यैवोभयत्रान्वयः एवञ्चहलसू
त्रान्त्यं हलन्त्यपान्त्यंचेतिबोधः अन्त्यरोहोः छिरइतिवत्षष्ठीति अत्रोच्चार्यपितुरे
कशेषनिर्द्देशो वोद्युक्तवा वत्त्या बोधः हलमीवोत्ताकारइत् हलन्त्यपान्त्यंचेतिके
षटोक्तव्याख्यायानुहलितसञ्ज्ञाभवति हलन्त्यमञ्चेदित्तिवदेतिदित्सूत्रम् नन्वेव
मपिनविभक्ताविति विभक्तिपदबोध्यसुप्तिङः बोधोहलन्त्यमितिवाक्यार्थबोधो
त्तरम् तद्बोधश्चापवादवाक्यार्थबोधोत्तरमित्यन्योन्याश्रयस्तादवस्थ्यएवेति
चेन्न अपवादवाक्यार्थबोधात्पूर्वमपदपदार्थोपस्थितावुत्सर्गवाक्यार्थबोध
प्रतिबन्धकाभावात् नचाभाववत्तानेप्रतियोगिज्ञानस्यैवप्रतियोगिज्ञानेऽभाव
ज्ञानस्यकारणताकस्यापिसम्मता प्रतियोगिज्ञानम्बिना निषेधवाक्यार्थाऽ
सम्भवाच्च इत्थंचापवादाऽमिनिविशानेपश्चादुत्सर्गइत्यस्यसत्त्वंभावः ॥

१

ओत्वं क्रियते ऽसोऽलत्र भेदो न सन्नपि सूत्रभेदो लोपात् यत्नाद्दोषापनेत्यनवद्यम् इति अच उपसर्गात्त
इति सूत्रस्य सूत्रभेदमित्यादिभाष्यप्रतीकस्यार्थः २

अत एव तत्र तत्र ज्ञापकपरसकलभाष्योच्छेदो नेति चेन्न योगविभागनियमज्ञा
पकाश्रयणेऽतिगौरवात् नहि वर्णाभिव्यक्तिजनककण्ठाद्यभिघातगौरवमेवादर्त्त
व्यं न तु ज्ञानजनकमनोव्यापारगौरवमिति राजाज्ञास्ति नच सहश्चासमनात्तग
च्छतीति सहेता मध्यमो वर्णो इत्यर्थे इत्यतो नान्योन्याश्रय इति वाच्यम् अन्योन्या
श्रयत्वपरिहारायानुवदता भाष्यकारेण कटीवीत्यत्र प्रश्लेषादि ङ् ण ताविभ्यत इण्ण
ताविभ्यत श्लेषादिः पूर्वोत्तरजभावबोधनात् किञ्च योगमर्यादयातत्तदुत्कार्य
लाभः आसमनादित्यस्यानन्वितार्थत्वं व्यर्थत्वञ्च स्फुटमेवानुमानमतः सूत्रा
वृत्त्या तत्परिहार इति हलन्त्यमिति भाष्येऽप्यन्योन्याश्रयमाशङ्क्य हलन्त्यमिति सूत्रं
भवति लकारश्चेदङ्गवतीति वक्तव्यमित्युक्ते कश्चोपनिर्देशाद्यासिद्धम् हल् च हल् च
हल् हलन्त्यमिदित्युक्तम् तत्रायमभावः कृतेकश्चोपग्रहलपदेन सम्बन्धसामा

Digitized by Panjab Digital Library | www.panjabdigilib.org

ला॰ ग्रो॰

६

तिवाच्यम् दशास्त्वावत्तो गोत्वात् नन्वपदेशोऽइदन्त्यम् अच् अनुनासिक इ(
तिसूत्रत्रयमस्त्व अजित्यनन्त्याच्यम् तृतीयेऽजित्यनुवृत्तिलाभमर्थ्याद्येचोदितम
वतितदर्थेनुनासिकएवेतिनियमाश्रयणाद्दुष्टमतो न दोषः योगविभागलाभमर्थ्य
[illegible]श्चानन्तरस्येतिन्यायम्बाधित्वा व्यवहितस्यापि तेन ननियमः मिदचो
न्त्यादितिज्ञापकाच्च नविपरीतनियमः एवञ्चहलन्त्यहणमपि व्यर्थमन्त्यान्त्याश्र
यश्चन नचपाणिनिसूत्रभेदपाठवणादावदृष्टहानिः तथाच तत्रेतत्रभाष्यमप्य(
पाणिनीयन्नभवतीतिवाच्यम् कल्प्यमानन्यासस्यलघुत्वेऽप्यदोषत्वात् सूत्र
भेदन्तुपाचरन्ति यत्रतदेवान्यत्सूत्रंक्रियतेभूयोवा यदितदेवोपसंहृत्यक्रिय
तेनालोसूत्रभेदइत्यच उपसर्गान्तेइतिसूत्रभाष्यात् नालोसूत्रभेदइत्यस्यदो(
षायेतिशेषः सतिसम्भवेदृष्टद्वारेवाङ्गानामदृष्टार्थत्वमितितदा[illegible]शयः ॥

अन्यथाऽनुनासिकविधेयत्वाभावकृतार्थे इत्यादिधातुष्वपि अच् इतिसूत्रमर्थवत्ताबुपदेशोऽचइत्संज्ञाकांक्षेतीत्यादेरसिद्धिरिति भावः ३

[illegible]त्तसूत्राक्षरैस्तं क्रियोदितैस्तावन् मात्रार्थलाभस्तमवे इष्टद्वारत्वाङ्गानामदृष्टार्थत्वमस्तं ४

सूत्रमध्यवर्तित्वाच तत्रत्याद्यम् २

७

अननारस्य विधिर्वा भवति वा व्यवेतस्येतिन्याय

भवेदुष्टद्वारेणाङ्ग[illegible]शार्थत्वमितिविव व: १६

सूत्रभेदमितिउधात्वर्थं सूत्रस्यपाणिनिप्रणीतस्यभेदंमात्राक्षरस्वरादिव्यत्ययमुपा[illegible]चरन्तिकथयन्तितंकमयं
यत्सूत्रभेदेपाणिनिप्रणीतमेवाशयान्तरभेदादन्यदन्यथाक्रियते अन्यथाकरणस्यदोषरूपत्वात् यदि
यदातदापाणिनि [illegible] सिमात्राक्षरमा(

Digitized by Panjab Digital Library | www.panjabdigilib.org

ग्रहणाभावस्य वक्तुं शक्यत्वात् तद्विषयकप्रयोगाणाम[illegible]नभिधानाच्च तस्माद्द्र
ष्टानुनासिकत्वमप्रामाणिकम् उरणपर इत्यत्र हल्ग्रहणं कर्त्तव्यमेव स्थलबे
लयो: सावर्ण्यं वदन्त्याहु: ननु हयेत्यादावकारोच्चारणे न तस्य हल्त्वप्रसङ्गोऽत
आह हकारादिष्विति नैपुनरन्तरेणाँ चमत्कुम्भनस्योच्चारणमपि भवतीत्युच्चैरुदात्त
इति सूत्रस्य भाष्यात् एषाद्याचार्यस्य शैली लक्ष्यते यत्तुल्यजातीयांस्तुल्यजाती
येषूपदिशति अचोऽस्तु हलो हल्षु इति प्रत्याहारेऽनुबन्धानामित्यत्र भाष्याच्चेति
भाव: स्यादेतत् न विभक्तौ विस्यादे: सार्थक्याय हलन्त्यमित्यस्योपदेशेऽन्त्यं हलिदि
त्यर्थविरूपकत्वे न हलन्त्यमादिरन्त्येनेत्यनयो: परस्परापेक्षत्वेनान्योन्याश्रया
द्धकारेत्संज्ञामबोधयित्वा हलामित्संज्ञाबोधनस्याशक्तेरयुक्तम् नच हय
वरेत्यादेरावृत्त्या शाषसरित्यन्तसमुदायमुद्दिश्य हलितीत्यनेन हल्संज्ञा विधेये
नमु[illegible] हलन्त्यमित्यत्र हलो न्त्यमिति षष्ठीतत्पुरुषत्वेन हल्प्रत्याहारान्तर्बहिरत्र समुदायान्त्यमिदि
त्यर्थे विगतेऽस्त्वेतदवाप्राप्या न विभक्तौ विस्यादेर्नैं [illegible] स्यात्तत्राह न विभक्तौ विति ४

हलन्त्यमिति सूत्रा
वृत्तिमवतारयति
स्यादेतदिति ४
[illegible]

प्रौ लेखवाशेषलीढ
माथानस्त्रविकाप्र
तिरितिवेदः ५

Digitized by Panjab Digital Library | www.panjabdigilib.org

न०१०

५

भावेन लतीत्यकारस्येत्संज्ञालोपयोरभावेन प्रत्याहारेषु ग्रहणापत्तस्यैव
भाष्यकृता सिद्धान्तितत्वेन हल्प्रत्याहारे लतीत्यकारस्यैवेशो मा मांसक्त्राय पस्यैवेत्यत्रानु-
नासिकपक्षेऽनुस्वारापत्तिर्दुर्वारा सोऽस्तीत्यादौ तु लोपापत्तिश्च अत एव प्रत्याहारेऽ क्षु ३
ऽनुबन्धानां कथमग्रहणमिति नेत्यनेन प्रत्याहारेषु वर्णसमाम्नाये च एतेऽनुबन्धा न
बोधकत्वात्तेषु प्रत्याहारार्थी अनुबन्धाः किं पुनस्तेषामग्रहणे न ग्रहणं कस्मान्नो
त्य[illegible]र्थकेनाच प्रत्याहारे शङ्काकृता न हल्प्रत्याहारे भाष्ये चाइउणित्यादिसूत्रचतुष्ट-
योपादानेनैवास्य प्रवृत्तिर्दर्शिता तत्र प्राधान्यं प्रत्याहारेषु ग्रहणार्थत्वरूपं हल्-
षु च तथोपदेशस्तेषाम् अच्षु तु स्वराणामेव तथोपदेश इति प्राधान्यात्तेषामेव
संज्ञित्वमिति भाष्ये स्पष्टम् न च हशादिप्रत्याहारेऽग्रहणस्यापत्तिरिति वाच्यम्
हकारादिषु पुनः पुनरकारोच्चारेणोच्चारणार्थावर्णरहितहल्मात्रघटितप्रत्याहारे ५

Digitized by Panjab Digital Library | www.panjabdigilib.org

नेसर्व्ववेदपारायणतुल्यंफलमितिभाष्येउक्तम् व्याकरणमुपक्रम्यवेदानाम्वेद
इतिछन्दोगश्रुतिरप्येतत्परैवेतिदिक् तत्प्रयोजनमाह सञ्ज्ञार्थानीति एतच्चो
पपादितंसञ्ज्ञाकरणायनंचलाघवेनशास्त्रप्रवृत्त्यर्थमितिबोध्यम् सञ्ज्ञार्थत्वो
पपत्तयेआह एषामिति अकारस्थेति तैः प्रत्याहारसिद्धिः अनन्त्यत्वात्स्यानु
क्तिः ह्रदन्तुल्यास्यस्तत्रस्यकैयटानुरोधेन परत्वस्यानुनासिकत्वेऽतोल्त्रेतिसू
त्रेपाणिनिर्लकारंनोच्चारयेत् प्रत्याहारेणैवनिर्वाहात् किञ्च असत्संज्ञक
त्वेपलमयदितस्तत्रेणबहुर्घट्टमात्रालाघवानुरोधेनपरप्रत्याहारेणैवव्यवह
रेत् किञ्च अनुबन्धानामच्प्रत्याहारेग्रहणाभावेआचारादप्रधानत्वाल्लोप
श्चवेत्ववत्तरइतिभाष्योक्तस्यतन्तीपहेतोरव्यापकतापत्तिः तवलोपस्यवलवत्त्वे
प्यिहल्प्रत्याहारसिद्धेः प्रागच्पदार्थानिष्पत्त्यभावेनोपदेशेऽजित्यस्यवाक्यार्थ

न चुत्वप्रवचनं
क्रियतसत्राह अ
नन्त्येति ४

Digitized by Panjab Digital Library | www.panjabdigilib.org

ता०प्र०
६

श्रुते श्रोतव्यः श्रुतिवाक्येभ्य इत्युक्तेः स्वकृतन्त्रव्याकरणे शाकटायनोऽपि इदमक्ष
रछन्दो वर्णशः समस्तुकानाम् यथाचार्य्या ऊचुः ब्रह्मा बृहस्पतये प्रोवाच बृहस्प
तिरिन्द्राय इन्द्रो भरद्वाजाय भरद्वाज ऋषिभ्य ऋषयो ब्राह्मणेभ्यस्तं खल्विममक्षर
समाम्नायमित्याचक्षते नभुक्त्वा ननक्तम्प्रब्रूया ब्रह्मराशिरिति ब्रह्मप्रतिपादको वर्ण
राशिरित्यर्थः तत्त्वञ्च नन्दिकेश्वरकृतकाशिकायाम् स्पष्टम् अतएव वृत्तिसम
वायार्थे वर्णानामुपदेशः कर्त्तव्य इति भाष्ये उक्तम् पाणिने लाघवेन [illegible]
शास्त्रप्रवृत्तिफलकोयः समवायो वर्णानां क्रमेण सन्निवेशस्तदर्थ इति तदर्थः
स चाणादि प्रत्याहारद्वारा शास्त्रप्रवृत्त्यर्थः एवंव्यापमुपदेशः पाणिनेरप्युक्त
त इति स्पष्टमेवोक्तम् मन्त्रोपदेशवच्चाजोपदेशापदप्रयोगः अतएवास्पष्टा

६

३ति १

Digitized by Panjab Digital Library | www.panjabdigilib.org

पद्येवेदमस्युच्छिन्नं चन्द्र... तारकादि एव मत्सरसमामात्यस्य न कश्चिदाधुनिकः क
र्त्तेत्येवमेवेदं पारमार्थिकं सर्वमात्मेति आधुनिकः शारीरो पुष्पितत्वन्ताम्मूल
कशास्त्रशास्त्रद्वारेण शास्त्रप्रयोगेणञ्च फलितत्वम् उक्तञ्चैतच्चतुर्दशसूत्रव्याख्यायान
न्दिकेश्वरकृतकाशिकायाम् नृत्यावसाने नटराजराजो ननाद ढक्कां नवपञ्च १४
वारम् उद्धर्त्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम् अत्र सर्वत्र सू
त्रेषु अन्त्यवर्णे चतुर्दशानाम् धात्वर्थं समुपादिष्टं पाणिन्यादीष्टसिद्धये इति धात्वर्थं
धातुमूलकशास्त्रशास्त्रप्रवर्त्यर्थम् अतएवानुबन्धकरणार्थं वर्णानामुपदेश
इत्युक्तम् आभ्य अत्र करणशास्त्रप्रयोगेणानुबन्धानां सादित्वं सूचितम् सकरणं
चोपदेशाकर्त्तृकर्त्तृकमेव प्रत्याहारैः तेन तद्व्यतिरिक्तस्यानादित्वं सूचितम् अ
तएव सनकाद्युद्धरणे वर्णस्य प्रलोपदेशत्वं सूचितम् तच्चाकृतित्वाभावेन सेऽ(

Digitized by Panjab Digital Library | www.panjabdigilib.org

ल०प्रो०
३

श्वरः अनुबन्धाश्च महेश्वरकृता एवेत्यनुपदं स्फुटीभविष्यति अमङणनमि
त्यत्र प्रत्याख्यानपरं भाष्यं तु किमदृष्टार्थमेव तदुच्चारणमुत दृष्टार्थमपीत्येवं वि
चारपरम् सर्वत्र प्रत्याख्यानमेवमपरमेव अन्यथाङणनामपि पारायणे ध
र्मश्रवणेन तत्र तत्र पाणिनिन्यासप्रत्याख्यानस्याप्यसङ्गतिः स्यात् तदुक्तमभि
कोपयचीति सूत्रे सामर्थ्ययोगान्नहि किञ्चिदत्र पश्यामि शास्त्रे यदनर्थकं स्या
दिति किञ्चिद्दृष्टादृष्टार्थवत्तु किञ्चिच्छुद्धादृष्टार्थवत् सर्वथानर्थकं न किञ्चिद
ति तदर्थः वृद्धिसूत्रस्य वर्णेनाप्यनर्थकेन न भवितव्यमिति भाष्यग्रन्थेऽ
नर्थकत्वबोधकार्थो राहित्यस्वरूपमिति न निष्प्रयोजनत्वस्वरूपानर्थक्येन तत्र
तत्र प्रत्याख्यानभाष्यासङ्गतिः अत एव सोऽयमक्षरसमाम्नायः पुष्पितश्च
न्द्रतारकवत्प्रतिमण्डितो ब्रह्मराशिरिति भाष्यमुपपादयोक्तं भर्तृहरिणा ॥

:फलित२
३

Digitized by Panjab Digital Library | www.panjabdigilib.org

पितस्त्रवर्त्तौ विरुध्येत नहि सान्धिकार्य्ये कृतेऽविकृतरूपश्रवणं भवतीति तत्र
पुनरच्यद्स्यार्थान्तरे शक्तिग्रहेणातद्विरोधाभावात् नचासन्धौ सन्देहः व्याख्या
नतो निर्णयसम्भवात् ननु चतुर्दशसूत्र्यामक्षरसमाम्नाय इति व्यवहारानु
पपत्तिः आम्नायसमाम्नायशब्दयोर्वेद एव प्रसिद्धेरित्यत आह माहेश्वराणी
ति महेश्वरादागतानीत्यर्थः महेश्वरप्रसादात्सूत्राणीति फलितम् एवं चै
वमानुपूर्विकाकृतिरेवैषा तत्प्रसादात् पाणिनिना लब्धा कृतिमूलकत्वादे
स्यैव वेदाङ्गत्वम् अत्र च प्रमाणम् येनाक्षरसमाम्नायमधिगम्य महेश्वरा
त् कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नम इति शिक्षावचनम् लणसूत्रे
णकारविषयाचार्य्यप्रवृत्तिर्नोपपद्यते व्याख्यानत इत्यादावाचार्य्यपदेन महे

Digitized by Panjab Digital Library | www.panjabdigilib.org

ल०श्री०

२

नं तज्जिज्ञासुरधिकारीत्यादिसूचितम् अइउण् एषां क्रमबोधकत्वेप्यादिर(
न्त्येनेत्यनेनैकवाक्यतयावृत्तिपरिच्छेदकत्वेन संज्ञासूत्रत्वम् क्रमस्य संज्ञाद्वा
रैवोपयोगात् एकवाक्यताचादिरकारादिरन्त्येनेतासहदृशेनणकारादिना संहोच्चा
र्यमाण आद्यन्ताविशिष्टानां संज्ञेति स्वौजसि(त्यादीनामप्येतदेकवाक्यतयासु
वादिसंज्ञार्थत्वेन संज्ञासूत्रत्वं स्वादिविधायकत्वञ्चेतिबोध्यम् एषु संहितायाः
अविवक्षया न संहिताकार्य्यम् अनुकरणत्वेन सौत्रत्वाच्चैवर्णेभ्यो नविभक्त्यु
त्पत्तिः कारप्रत्ययोपि नबाहुलकात् पत्तूपजीव्यविरोधात्संन्धिर्न तथाहि
अजादिसंज्ञाग्रहकाले आद्गुण इत्यादीनामनिष्पत्त्या तदप्रवृत्तावविकृत
रूपाकारादिषु गृहीताजादिपदशक्तिः पश्चादचूप्रत्याहारे ज्ञाते उपेन्द्र इत्यत्रा

चतुर्दशसूत्राणां अ इ उण् इत्यादि रूपवर्णानां अकारादिवर्णक्रमबोधकत्वेपि सू०

अच्वर्णाकारादिरन्त्येनेकारान्त्यवर्णावच्छिति वाच्यम् ३

नि दर्शने ३

२

Digitized by Panjab Digital Library | www.panjabdigilib.org

मुनित्रयमित्युक्तेर्ननु तं प्रन तच्छब्देन कथं प्राचीनाचार्योद्बोध इत्यत स्त्विग्विज्ञापार्थान्तरमाह मुनीति २

द्वितीया परिभाव्येति तच्छब्दस्य बुद्धिस्थपरामर्शकत्वात्प्राचामुक्तीस्ति
रस्कृत्येत्यर्थः मुनित्रयोक्तीर्विचार्येत्यर्थो वा परिभावस्तिरस्क्रियाः इति
कोशात्तिरस्कारार्थस्य धातोर्विचारार्थत्वेपि न बाधकम् धातूनामनेका
र्थत्वात् अतएव परीभुवोऽवज्ञाने इति संगच्छते एतेन स्वग्रन्थस्य प्राची
नग्रन्थैरगतार्थता सफलत्वं च ध्वनितम् भाविनोऽपि बुध्या विषयीकर
णादिदमिति निर्देशः सिद्धान्तप्रकाशकत्वेनोऽतितुच्छग्रन्थान्तरेभ्यः
सिद्धान्ताज्ञानेनावमानस्य तैरश्चा[illegible]रूपसन्तापस्य शामकत्वेन कौ
मुदीसादृश्यम् अनेन वैयाकरणानां सिद्धान्ताविषयस्त्वात्तां न प्रयोज

कौमुदीशब्देन सिद्धा
न्तकौमुदी सादृश्यं प
कुमुदस्य काशोकर्ष इति
निर्दिशति सिद्धा
न्तेति

Digitized by Panjab Digital Library | www.panjabdigilib.org

श्री १

सं०१२१०

पातञ्जले [illegible] न महाभाष्यस्यातिप्रशलीनत्वात्तत्रामालिकं ध्वनितं कृतेति स्वस्य तत्र तत्परिचारविचारः विकाशवत्ति दर्शिता श्रौढत्वं च दर्शितम् सकलशास्त्रविचारपूर्वकं महाभाष्यगूढार्थज्ञानवत्त्वम्भूतितत्वस्य सत्वात् उत्तरार्द्धेन स्वस्य मातापित्रोः स्वरूपत्वम्भूर्ध्वदर्शि १ याचकानामित्यपरश्लोके मत्ततनुत्तावतीन पूर्वकं स्वस्यभीवकालाधनभपञ्चशरूत्यत्वानि स्नारं यन्ध्यकरत्नोप्रवृत्तिर्दर्शिता ग्रन्थस्याचिन्तार्ज्ञे रचेतत्तामितिवचनात्तत्रशानिकथ्येवमकुलः प्रवृत्तिः शा

१

श्रीगणेशाय नमः पातञ्जले महाभाष्ये कृतभूरिपरिश्रमः शिवभट्टसुतो धीमान् सतीदेव्यास्तु गर्भजः १ याचकानां कल्पतरोररिकक्षहुताशनात् शृंगवेरपुराधीशाद्रामतो लब्धजीविकः २ नत्वा फणीशं नागेशस्तनुतेऽर्थप्रकाशकम् मनोरमोमार्धदेहं लघुशब्देन्दुशेखरम् ३ ग्रन्थसमाप्तिग्रन्थप्रचारादिप्रतिबन्धकदुरितप्रशमनायोचितमिष्टदेवतानमस्काररूपं मङ्गलमाचरन्शिष्यशिक्षायै व्याख्यातृश्रोतॄणामनुषङ्गतो मङ्गलाय निबध्नाति मुनित्रयमिति कारकविभक्तेर्बलवत्त्वा

च१

१

सेऽइति २ नत्वेति तृतीयेन नमस्कारात्मकमङ्गलपोतन पूर्वकं शेषमन्त्लोपूर्वकं स्वस्य नामापि दर्शितं नागोजीति उत्तरार्द्धेन ग्रन्थनाम दर्शितम् यथेन्दुशेखरो विउमयासहशोभतेऽर्धदेहत्वात्तथाऽत्र मनोरमेवोमा एतेन कौमुदीकृत्स्नाधापूर्वकं मनोरमामधीत्यायं प्रवन्तः कर्त्तव्यः पार्वतीप्रसत्तिमन्तराश्रिवस्येव मनोरमाविनाशशेन्दुशेखरस्य प्रतातोऽर्थदरतिभावः ३ विशेषकम्

Digitized by Panjab Digital Library | www.panjabdigilib.org

Acc No 39

S-C

Acc No 39

39

Digitized by Panjab Digital Library | www.panjabdigilib.org